अथ

कादम्बरी ७३

108/14

वाणभट्टप्रणीता

३ आद्यप्राग्नेः ३ जातिविरूय ३

कादं० ॐनमः सर्वज्ञाय सर्वदर्शिने श्रीगणेशाय नमः रजोजुषे जन्मनि सत्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे। अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः १ जयंत्यबा
णासुरमौलिलालिताः दशास्यचूडामणिचक्रचुम्बिनः सुरासुराधीशशिखान्तशायिनो भवच्छिदस्त्र्यम्बकपादपांसवः २ जयत्युपेंद्रः स चकार दूरतो बिभित्सया यः क्षणलब्ध
१ लक्ष्यया। दृशैव कोपारुणया रिपोरुरः स्वयं भयाद्भिन्नमिवास्रपाटलम् ३ नमामि भर्वोश्चरणाम्बुजद्वयं सशेखरैर्मौखरिभिः कृतार्चनं। समस्तसामंतकिरीटवेदिकाविटंकपी
ठोल्लुठितारुणांगुलि ४ अकारणाविःकृतवैरदारुणादसज्जनात्कस्य भयं न जायते। विषं महाहेरिव यस्य दुर्वचः सुदुःसहं सन्निहितं सदा मुखे ५ कटु क्वणंतो मलदायकाः
खलास्तुदंत्यलं बंधनशृंखला इव। मनस्तु साधुध्वनिभिः पदे पदे हरंति संतो मणिनूपुरा इव ६ सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतं। तदेव धत्ते हृद
येन सज्जनो हरिर्महारत्नमिव। तिनिर्मलं ७ स्फुरत्कलालापविलासकोमला करोति रागं हृदि कौतुकाधिकम्। रसेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव ८ ह
रंति कं नोज्ज्वलदीपकोपमैर्नवैः पदार्थैरुपपादिताः कथाः। निरंतरश्लेषघनाः सुजातयो महास्रजश्चंपककुड्मलैरिव ९ बभूव वात्स्यायनवंशसंभवो द्विजो जगद्गीतगुणोऽग्रणीः
सताम्। अनेकगुप्तार्चितपादपंकजः कुबेरनामांश इव स्वयंभुवः १० उवास यस्य श्रुतिशांतकल्मषे सदा पुरोडाशपवित्रिताधरे सरस्वती सोमकषायितोदरे समस्तशास्त्रस्मृति
बंधुरे मुखे ११ जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयैः ससारिकैः पंजरवर्तिभिः शुकैः। निगृह्यमाणा बटवः पदे पदे यजूंषि सामानि च यस्य शंकिताः १२ हिरण्यगर्भो भुवनांडकादिव क्ष
पाकरः क्षीरमहार्णवादिव। अभूत्सुपर्णो विनतोदरादिव द्विजन्मनामर्थपतिः पतिस्ततः १३ विवृण्वतो यस्य विसारि वाङ्मयं दिने दिने शिष्यगणा नवा नवाः। उषस्सु लग्नाः श्र
वणेऽधिकां श्रियं। प्रचक्रिरे चंदनपल्लवा इव १४ विधानसंपादितदानशोभितैः स्फुरन्महावीरसनाथमूर्तिभिः। मखैरसंख्यैरजयत्सुरालयं सुखेन यो यूपकरैरिवात्मजैः १५

सोमपामपात्रं

४ गुप्ताबेरूपाद्यतपुरोधाद्वपर्षः ४

कंठोमंदः क्रियासु

कुंगमदः क्रियासुः

६ गंगाप्रवाहमु भगीरथपथप्रवृत्तः। अयं किं विशिष्टः भगीभाग्यवान। रथपथप्रवृत्तः ६
एतान एनवधाः ८

सचित्रभानुर्जनयंमहात्मन्नांसुतोत्तमानांकृति। श्यास्त्रप्राज्ञिनाम। अवाप्यमध्येस्फटिकोपलानामलंक्रमेणकैलासमिवसमाभ्रत्ताम् १६ महात्मनोयस्यसुदूरनिर्गताः कलंक
मुक्तेंदुकलामलत्विषः। द्विषन्मनः प्राविविशुः कृताश्रवा गुणान्नसिंहस्यनखांकुशाइव १७ दिशामलीकालकभंगतांगतस्त्रयीवधूकर्णतमालपल्लवः। चकारयस्याध्व
रधूमसंचयोमलीमसः शुक्लतरंनिजंयशः १८ सरस्वतीपाणिसरोजसंपुटप्रमत्तहेमप्रममीकरंभसः। यशोंशुशुक्लीकृतसप्तविष्टपाजतः सुतोवाक्पतिरित्यजायते १९
द्विजेनतेनाक्षतकंठकौंठ्ययामहामनोमोहमलीमसांधया। अलब्धवैदग्ध्यविलासमुग्धयानिबद्ध्यमतिस्फुटाद्भुतकथा २० आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः पाक
शासनइवापरश्च्युतसुरधिमालामिवत्लायाभुवोभर्त्ताप्रतापानुरागावनतसमस्तसामंतचक्रः। चक्रवर्तिलक्षणोपेतश्चक्रधरइवकरकमलोपलक्ष्यमाणशंखचक्रलांछनोहरइ
वजितमन्मथोगुहइवाप्रतिहतशक्तिः कमलयोनिरिवविभागीकृतराजहंसमंडलोजलधिरिवलक्ष्मीप्रसूतिगंगाप्रवाहइवभगीरथपथप्रवृत्तोरविरिवप्रतिदिवसोपजायमानो
दयोमेरुरिवसकलभुवनतलोपजीव्यमानपादच्छायोदिग्गजइवानवरतप्रवृत्तदानार्द्रीकृतकरः कर्तामहाश्चर्याणामाहर्ताक्रतूनामादर्शः सर्वशास्त्राणामुत्पत्तिः कलानां
कुलभवनंगुणानामागमः काव्यामृतरसानामुदयशैलोमित्रमंडलस्योत्पातकेतुरहितजनस्यप्रवर्तयितागोष्ठीबंधानामाश्रयोरसिकानांप्रत्यादेशोधनुष्मतांधौरेयः साहसिकानाम धुरग्रभा ६४
ग्रणीर्विदग्धानांवैनतेयइवविनतानंदजननोवैण्यपृथुचापकोटिसमुत्सारितसकलारातिकुलाचलोराजाम्मुंजकोनाम। नाम्नैवयोनिर्भिन्नारातिहृदयोविरचितनरसिंहरूपाडंबरमेकविक्रमा
क्रान्तसकलभुवनतलोविक्रमत्रयायासितंचजहासेवबासुदेवमतिचिरकाललग्नमतिक्रान्तनृपतिसहस्रसंपर्ककलंकमिवक्षालयंतीयस्याविमलैकृपाणधाराजलैर्विरमुवासराजल
क्ष्मीः। यंश्चमनसिधर्मेणाकोपेयमेनंप्रसादेधनदेनप्रतापेवह्निनाभुजेभुवादृष्टौश्रियावाचिसरस्वत्यामुखेशशिनाबलेमरुताप्रज्ञायांसुरगुरुणारूपेमनसिजेनतेजसिसवित्राचवसतास

महो कठोमदकलहंसपर १

र्दंडसमयस्य प्रकृतिरिव विष्णोरव्याकृतेरनुकरोति भगवतो नारायणस्य। यस्य च मदकलकरिकुंभपीठपाटनमात्रसक्तौलग्नस्थूलमुक्ताफलेन दृढमुष्टिनिपीडनान्निष्ठ्यूतधाराजलबिंदुदं
का॰ दं॰ तुरेणेव कृपाणेनाकृष्यमाणा स्फुरदुरःकपाटघटितकवचसहस्रांधकारमध्यवर्तिनी करिकरटतटगलितमदजलासारदुर्दिनास्वभिसारिकेव समरनिशासु समीपमसकृदाजगाम
२ राजलक्ष्मीः। यस्य च हृदयस्थितानपि पतीन्दिधक्षुरिव प्रतापानलो वियोगिनीनामपि रिपुसुंदरीणामंतर्जनितदाहो दिवानिशं जज्वाल। यस्मिंश्च राजनि जितजगति परिपालयति
महीं चित्रकर्मसु वर्णसंकराः रतेषु केशग्रहाः काव्येषु दृढबंधाः शास्त्रेषु चिंता स्वप्नेषु विप्रलंभाः छत्रेषु कनकदंडाः ध्वजेषु प्रकंपाः गीतेषु रागविलसितानि करिषु मदविकाराः चापे श्च
षु गुणच्छेदाः गवाक्षेषु जालमार्गाः शशिकृपाणकवचेषु कलंकाः रतिकलहेषु दूतसंप्रेषणानि सार्यक्षेषु शून्यगृहाः न प्रजानामासन्। यस्य च परलोकाद्भयं मनःपुरिकालकेषु
भंगो नूपुरेषु मुखरता विवाहेषु करग्रहणं अनवरतमखाग्निधूमेनाश्रुपातं तुरंगेषु कशाभिघातो मकरध्वजे चापध्वनिरभूत्। तस्य च राज्ञः कलिकालभयपुंजीभूतकृतयुगानुकारि
णी त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालवविलासिनीकुचतटास्फालनजर्जरितोर्मिमालया जलावगाहनावतारितजयकुंजरकुंभसिंदूरसंध्यायमानसलिलयोन्म
दकलहंसकुलकोलाहलमुखरितकूलया वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत्। स तस्यां च विजिताशेषभुवनमंडलतया विगतराज्यचिंताभारनिर्वृतो द्वीपा
न्तरागतानेकभूमिपालमौलिमालालालितचरणयुगलो वलयमिव लीलया भुजेन भुवनभारमुद्वहन्नमरगुरुमपि प्रज्ञयोपहसद्भिरनेककुलक्रमागतैरसकृदालोचि
तनीतिशास्त्रनिर्मलमनोभिरलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः समानवयोविद्यालंकारैरनेकमूर्द्धाभिषिक्तपार्थिवकुलोद्गतैरखिलकलाकलापालोचनकठोरमति
भिरतिप्रगल्भैः कालविद्भिः प्रेमानुरक्तहृदयैरग्राम्यपरिहासकुशलैरिंगिताकारवेदिभिः काव्यनाटकाख्यानकालेख्यव्याख्यानादिक्रियानिपुणैरतिकठिनपीवरस्कंधोरुबाहु

कादं तमखड्गंकारनिपतिताराजलक्ष्मीरिव दक्षिणापथादागता चांडालकन्यका पंजरस्थं शुकमादाय देवं विज्ञापयति। सकलभुवनतलसर्वरत्नानामुदधिरिवैकभाजनं देवो· विहं
गमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमादायागताहमिच्छामि देवदर्शनसुखमनुभवितुमित्येतदाकर्ण्य देवः प्रमाणमित्युक्त्वा विरराम। उ
२ पजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामवलोक्य मुखानि को दोषः प्रवेश्यतामित्यादिदेश। अथ प्रतीहारी नरपतिवचनानंतरमुत्थाय तां मातंगकुमारी प्रावेशय
त्। प्रविश्य च सा नरपतिसहस्रमध्यवर्तिनमशनिभयपुंजितकुलशैलमध्यगतमिव कनकशिखरिणमनेकरत्नाभरणकिरणजालकांतरितावयवमिंद्रायुधसहस्र
संछादिताष्टदिग्भागमिव जलधरसमयदिवसमवलंबितस्थूलमुक्ताकलापस्य कनकशृंखलानियमितमणिदंडिकाचतुष्टयस्य गगनसिंधुफेनपटलपांडुरस्य नातिम
हतो दुकूलवितानस्याधस्तादिंदुकांतमणिपर्यंकिकानिषण्णमुद्धूयमानकनकदंडचामरकलापमुन्मयूखमुखकांतिविजयपराभवप्रणतेन शशिनेव स्फटिकमणिपादपी
ठे विन्यस्तवामपादमिंद्रनीलमणिकुट्टिमप्रभासंपर्कश्यामायमानैः प्रणतरिपुनिश्वासमलिनीकृतैरिव चरणनखमयूखजालकैरुपशोभमानमासन्नसोच्छ्वसितपद्म
रागकिरणपाटलीकृतेनाचिरमृदितमधुकैटभरुधिरारुणेन हरिमिवोरुयुगलेन विराजमानममृतफेनधवले गोरोचनालिखितहंसमिथुनसनाथपर्यंते चामरपवनन
र्तितांतदशे दुकूले वसानमतिसुरभिचंदनानुलेपनधवलितोरःस्थलमुपरिविन्यस्तकुंकुमस्थासकमंतरांतरा निपतितबालातपच्छेदमिव कैलासशिखरिणमपरशशिशंकया न
क्षत्रमालयेव हारलतया कृतमुखपरिवेषमतिचपलराजलक्ष्मीबंधननिगडशंकामुपजनयतेंद्रनीलकेयूरयुगलेन मलयजरसगंधलुब्धेन भुजंगद्वयेनेव वेष्टितबाहुशिखरमीष
द्दोलायितकर्णोत्पलमुन्नतघोणमुत्फुल्लपुंडरीकलोचनममलकलधौतपट्टायतमष्टमीचंद्रशकलाकारमशेषभुवनराज्याभिषेकसलिलपूतमूर्णासनाथं ललाटदेशमुद्वहंतमा

उर्णा मेषादिलोम्नि स्यादावर्ते चांतरा भ्रुवोरित्यमरः ४१

२अपनोंहस्तविशपः २प्रिपालुः२ रिणपाःहिः२

मोदितमालतीकुसुमशेखरमुषसि शिखरपर्यस्ततारकापुंजमिव पश्चिमाचलमाभरणप्रभापिशंगितांगतया लग्नहरहुताशमिव मकरध्वजमासन्नवर्तिनीभिः सर्वतः सेवासंगताभिरि
व दिग्वधूभिर्वारविलासिनीभिः परिवृतममलमणिकुट्टिमसंक्रांतप्रतिबिंबतया पतिप्रेम्णावकृष्य हृदयेनेवोह्यमानमशेषजनभोग्यतामुपनीतयाप्यसाधारण्या राज
लक्ष्म्या समालिंगितमपरिमितपरिवारजनमप्यद्वितीयमनंतगजतुरगसाधनमपि खड्गमात्रसहायमेकदेशस्थितमपि व्याप्तभुवनमंडलमासनगतमपि धनुषि निषण्णमुत्सा
दिताशेषद्विषदिंधनमपि ज्वलत्प्रतापानलमायतलोचनमपि सूक्ष्मदर्शनं महादोषमपि सकलगुणाधिष्ठानं कुपतिमपि कलत्रवल्लभमविरतप्रवृत्तदानमप्यमतिमदस्वभा
वमपि कृष्णचरितमकरमपि हस्तस्थितसकलभुवनतलं राजानमद्राक्षीत्। आलोक्य च सा दूरस्थितैव प्रचलितरत्नवलयेन रक्तकुवलयदलकोमलेन पाणिना जर्जरितमुखभा
गं वेणुलतामादाय नरपतिप्रबोधनार्थं सकृत्सभाकुट्टिममाजघान। येन सकलमेव तद्राजकमेकपदे वनकरियूथमिव तालशब्देन तेन वेणुलताध्वनिना युगपदावलितवदन
मवनिपालमुखादाकृष्य चक्षुस्तदभिमुखमासीत्। अवनिपतिस्तु दूरादालोकयेत्यभिधाय प्रतीहार्या निर्दिश्यमानां तां वयःपरिणामपांडुरशिरसा रक्तराजीवेक्षणेनानवरतव्या
यामतया यौवनापगमेप्यशिथिलशरीरसंधिना सत्यपि मातंगत्वे नातिनृशंसाकृतिनानुगृहीतार्यवेषेण धवलवाससा पुरुषेणाधिष्ठितामाकुलाकुलकाकपक्षधारिणा कनक
शलाकानिर्मितमप्यंतर्गतशुकप्रभाश्यामायमानं मरकतमयमिव पंजरमुद्वहता चांडालदारकेणानुगम्यमानामसुरगृहीतामृतापहरणकृतकपटयुवतिवेषस्य श्याम
तया भगवतो हरेरनुकुर्वतीं संचारिणीमिवेंद्रनीलमणिपुत्रिकामागुल्फावलंबिना नीलकंचुकेनावच्छन्नशरीरामुपरिरक्तांशुकरचितावगुंठनां नीलोत्पलस्थलीमिव निपतित
संध्यातपामेककर्णावसक्तदंतपत्रप्रभाधवलितकपोलमंडलामुदयदिंदुबिम्बकिरणच्छुरितमुखीमिव विभावरीमाकपिलगोरोचनारचिततिलकतृतीयलोचनामीशानमिवानुरचितकि

कादं॰ शतवेषामिवभवानीमुरस्थलनिवाससंक्रान्तनारायणदेहप्रभाश्यामलितामिवश्रियंकुपितहरहुताशनदह्यमानमदनधूममलिनीकृतामिवरतिमुन्मदहलिहलाकर्षणभयप्रप
लायितामिवयमुनांमतिबहलपिंडालक्तकरसरागपल्लवितपादपङ्कजांमचिरमर्दितमहिषासुररुधिररक्तचरणामिवकात्यायनींमांलोहितांगुलिप्रभापाटलितनखमयूखां खा॰
५ मतिकठिनमणिकुट्टिमस्पर्शमसहमानांक्षितितलेपल्लवभंगानिवनिधायसंचरन्तीमांपिंजरेणोत्सर्पिणानूपुरमणीनांप्रभाजालकेनानुरंजितशरीरतयापावकेनेवभगवतारूपैकप
क्षपातिनाप्रजापतिमप्रमाणीकुर्वताजातिसंशोधनार्थमालिंगितदेहामनङ्गवारणशिरोनक्षत्रमालायमानेनरोमराजिलतालवालकेनमेखलादाम्नापरिगतजघनस्थलांमतिस्थू
लमुक्ताफलघटितेनशुचिनाहारेणगंगास्रोतसेवकालिन्दीमालङ्घ्यकृतकंठग्रहांशरदमिवविकसितपुंडरीकलोचनांप्रावृषमिवघननीलकेशजालांमलयमेखलामिवचंदनपल्लवाव
तंसांनक्षत्रमालामिवचित्रश्रवणाभरणभूषितांश्रियमिवहस्तस्थितकमलशोभांमूर्छामिवमनोहरांमरण्यभूमिमिवरूपसंपन्नांदिव्ययोषितमिवाकुलीनांनिद्रामिवलोच
नग्राहिणीमरण्यकमलिनीमिवमातङ्गकुलदूषितामसूर्तामिवस्पर्शवर्जितामालेख्यगतामिवदर्शनमात्रफलांमधुमासकुसुमसमृद्धिमिवविजातिमनङ्गकुसुमचापलेखामि
वमुष्टिग्राह्यमध्यांयक्षाधिपलक्ष्मीमिवालकोद्भासिनीमचिरोपारूढयौवनामतिशयरूपाकृतिमनिमिषलोचनोददर्श।दृष्ट्वाचतांसमुपजातविस्मयस्यचाभून्मनसिमहीपतेः।अहोवि
धातुरस्थानेरूपनिष्पादनप्रयत्नः।तथाहि।यदिनामेयमात्मरूपोपहसिताशेषरूपसम्पदुत्पादिता।किमर्थमपगतस्पर्शसंभोगसुखेकृतंकुलेजन्म।मन्येचमातङ्गजातिस्पर्शदोषभया
दस्पृशतैयमुत्पादिताप्रजापतिना।अन्यथाकथमियमक्लिष्टतालावण्यस्य।नहिकरतलस्पर्शक्लेशितानामवयवानामीदृशीभवतिकान्तिः।सर्वथाधिग्विधातारमसदृशसंयोगकारि
णमतिमनोहराकृतिरपिक्रूरजातिर्जायेनेयंमरुस्थलीवसततनिन्दितरूपतारमणीयाप्युद्वेजयतीत्येवमादिचिन्तयन्तमेवराजानमीषदवगलितकर्णपल्लवावतंसाप्रगल्भवनितेव

भिरसकृद्दलितसमदरिपुगजघटापीठबंधैःकेसरिकिशोरकैरिवविक्रमैकरसैरपिविनयव्यवहारिभिरात्मनःप्रतिबिंबैरिवराजपुत्रैःसहरममाणः।प्रथमेवयसिसुखमतिचिरमु
वास।तस्यचातिविजिगीषुतयामहासत्त्वतयाचतृणमिवलघुवृत्तिस्त्रैणमाकलयतःप्रथमेवयसि[illegible]खमतिचिरमुवास॥तस्यचातिविजिगीषुतयामहासत्त्वतयाचतृणमिवल सुख
घुवृत्तिस्त्रैणमाकलयतःप्रथमेवयसिवर्तमानस्यापिरूपवतोपिसंतानार्थिभिरमात्यैरपेक्षितस्यापिसुरतसुखस्योपरिद्वेषइवासीत्।सत्यपिरूपविलासोपहसितरतिविभ्रमेला
वण्यवतिविनयवत्यन्वयवतिहृदयहारिणिचावरोधजने।सकदाचिदनवरतदोलायमानरत्नवलयोच्चर्चरिकास्फालनप्रकंपझणझणायमानमणिकर्णपूरःस्वयमार
ब्धमृदंगवाद्यःसंगीतकप्रसंगेनकदाचिदविरलविमुक्तशरासारशून्यीकृतकाननोमृगयाव्यापारेणकदाचिदाबद्धविदग्धमंडलःकाव्यप्रबंधरचनेनकदाचिच्छास्त्रालापेन।क
दाचिदाख्यानकाख्यायिकेतिहासपुराणाकर्णनेन।कदाचिदालेख्यविनोदेनकदाचिद्वीणया।कदाचिद्दर्शनागतमुनिजनचरणशुश्रूषया।कदाचिदक्षरच्युतकमात्राच्युतक
बिंदुमतीगूढचतुर्थपादप्रहेलिकाप्रदानादिभिर्वनितासंभोगसुखपराङ्मुखःसुहृत्परिवृतोदिवसमनयत्।यथैवचदिवसमेवमारब्धविविधक्रीडापरिहासचतुरैःसुहृद्भिरु
पेतोनिशामप्यनैषीत्।एकदातुनातिदूरोदितेनवनलिनदलसंपुटभिदिकिंचिदुन्मुक्तपाटलिम्निभगवतिमरीचिमालिनिराजानमास्थानमंडपगतमंगनाजनविरुद्धेनवामपार्श्व
वलंबिनाकौक्षेयकेनसन्निहितविषधरेवचंदनलताभीषणरमणीयाकृतिरविरलचंदनानुलेपनधवलितस्तनतटोन्मज्जदैरावतकुंभमंडलेवमंदाकिनीचूडामणिसंक्रां
तप्रतिबिंबच्छलेनराजाज्ञेवमूर्तिमतीराजभिःशिरोभिरुह्यमानाशरदिवकलहंसधवलाम्बरा।जामदग्न्यपरशुधारेववशीकृतसकलराजमंडला।विंध्यवनभूमिरिववेत्र
लतावती।राज्याधिदेवतेवविग्रहिणीप्रतीहारीसमुपसृत्यक्षितितलनिहितजानुकरकमलासविनयमब्रवीत्।देवद्वारस्थितासुरलोकमारोहतस्त्रिशंकोरिवकुपितश

कादं

५

द्यभिधानां वागासीदेवं ग्रयायार्यं परिस्फुटाक्षरालापताप्रकानामुपजातोत्कण्ठाकरिणां वैजिह्वापरिहीनां रिंखेवमुच्चारयत्येव तस्मिन्नंशिशिरकिरणांभम्बरतलस्य मध्यमध्यासीने ऽम्बरे दर्यंन्नाडिका
छेदप्रहतपटुपटहनादानुसारी मध्याह्नशंखध्वनिरुदतिष्ठत् तमाकर्ण्य च समासन्नस्नानसमयो विसर्जितराजलोकः क्षितिपतिरास्थानमंडपादुत्तस्थौ। अथ चलति महीपतावन्यो
न्यमतिरभससंचलनमवालितांगदपत्रभंगमकरकोटिपाटितान्युत्तरीयकपटानां माक्षेपदोलायमानकंठदाम्नां मंसस्थलोच्चलितकुंकुमपटवासधूलिपिंजरितदिशां मालोलमालती
कुसुमशेखरोत्पतितालिकदम्बकानामर्द्धावलम्बिभिः कर्णोत्पलैश्चुम्ब्यमानगंडस्थलानामंगमनप्रणामलालसानां महीमहीकपालचक्रः स्थलप्रेंखोलितहारलतानामुचितमु
मासीदतिमहान् संभ्रमो महीपतीनाम्। इतश्चेतश्च निःपतन्तीनां स्कंधदेशावसक्तचामरग्राहिणीनां कमलमधुपानमत्तजरत्कलहंसनादजनैरेणपदेरणितमणीनूपुरा
नूपुरराणां निनादेनैवारविलासिनीजनस्य संचरतीनां जघनस्थलास्फालनरसितरत्नमालिकानां मेखलानां मनोहारिणा झंकारेण नूपुररवाकृष्टानां च धवलितास्थानमंडपसोपा
नफलकानां भवनदीर्घिकाकलहंसकानां कोलाहलेन रसनारसितोत्कंठितानामतरविरावविरुतैर्मुखरितमंगडपसारसानां कूजितेन सरभसप्रचलितसामन्त
शतचरणतलाभिहतस्य चास्थानमंडपस्य निर्वातनिर्घोषगंभीरेणाकम्पयतेव वसुमतीं ध्वनिना प्रतीहारीणां च पुरः ससंभ्रमसमुत्सारितजनपदानां दंडिनां समारब्धेन च मुच्चैरुच्चारयतामा
लोकयतालोकयतेति तारतरदीर्घेण भवनप्रासादकुंजेषु प्रतिशब्दतया दीर्घभरतामुपगतेनालोकशब्देन राज्ञां च ससंभ्रमावर्जितमौलिलोलचूडामणीनां प्रणमतां ममलमणिप्रा
लाकादनुपरभिः किरीटकोटिभिरुल्लिख्यमानस्य मणिकुट्टिमस्य निस्वनेन प्रणामपर्यस्तानामतिकठिनमणिकुट्टिमनिपतितरणरणायितानां च मणिकर्णपूरणां निनादेन मंगलपाठ
कानां च पुरो यायिनां जय जीवेति मधुरवचनानुयातेन पठतां दिगन्तव्यापिना कलकलेन प्रचलितजनचरणाघातसंक्षोभभयादपहाय कुसुमप्रकरमुत्पततां च मधुलिहां हुंकृतेन संक्षो

भारैतिस्वरितपदंप्रहरनैः सन्निपतद्भिः केयूरकोटिताडितानां कणितमुखैः रत्नदाम्नां च मणिस्तम्भानां रणितेन सर्वतः क्षुभितमिव तदास्थानभवनमभवत्। अथ विसर्जितराजलोको विश्रम्य
तामिति तांबूलकरंकवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यन्तरं प्राविशत्। अपनीताशेषभूषणो दिवसकर इव विगलितकिरणजालः। चंद्रतारकासमूह इव गगनाभो
गः समुपाहृतसमुचितव्यायामोपकरणां व्यायामभूमिमयासीत्। तत्र च समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामः श्रमवशादुन्मिषन्तीभिः कपोलयोरीषदवगलितसितसिंदुवारकुसुम
मंजरीविभ्रमाभिरुरसि निर्दयश्रमच्छिन्नहारविगलितमुक्ताफलप्रकरानुकारिणीभिर्ललाटपट्टके अष्टमीचंद्रशकललोलत्सदमलविन्दुविडम्बिनीभिः स्वेदजलकणिकासंततिभिरलङ्क्रियमाण
मूर्तिरितस्ततः स्नानोपकरणसम्पादनसत्वरेण पुरः प्रधावता परिजनेन तत्कालं विरलजनेऽपि राजकुले समुत्सारणाधिकारमुचितमाचरद्भिर्दंडिभिरुपदिश्यमानमार्गो विततसितविता
नामनेकचारणगणविबध्यमानमंडलां गंधोदकपूर्णकनकमयद्रोणीसनाथमध्यामुपस्थापितस्फाटिकस्नानपीठां मेकान्तनिहितैरतिसुरभिगंधसलिलपूर्णैः परिमलावकृष्टम
धुकरकुलान्धकारितमुखैरातपभयान्नीलकर्पटावगुंठितमुखैरिव स्नानकलशैरुपशोभितां स्नानभूमिमगच्छत्। अवतीर्णस्य च जलद्रोणीं वारविलासिनीकरमर्दितसुगंधामल
कोपलिप्तशिरसो राज्ञः समन्तात्समुपतस्थुरन्यक्रकनिविरनिवद्धस्तनपरिकराम्बरसमुत्सारितवलयबाहुलताः समुत्क्षिप्तकर्णाभरणाः कर्णोत्सङ्गोत्सारितालकाः गृहीतजलकलशाः स्नाना
र्थमभिषेकदेवता इव वारयोषितः। ताभिश्च समुन्नतकुचकुंभमंडलाभिर्वारिमध्यप्रविष्टः करिणीभिरिव वनकरी परिवृतः स्नानकूर्णं रोजेन राजा जलद्रोणीसलिलादुत्थाय च स्नानपीठम
मलस्फटिकधवलं वरुणाद्वराजहंस इवारुरोह। ततस्ताः काश्चिन्मरकतकलशप्रभाश्यामायमानानलिन्यः द्रवमूर्तिमत्यः पत्रपुटैः काश्चिद्रजतकलशहस्ताः जन्यं द्रवपूर्णचन्द्रमंडलाविनिर्ग
तेन ज्योत्स्नाप्रवाहेणेव काश्चित्कलशीरिवेपश्रमस्वेदार्द्रशरीरा जलदेवता इव स्फाटिकैः कलशैस्तीर्थजलेन काश्चिन्मलयसरितेद्रवचन्दनरसमिश्रेण सलिलेन काश्चिदुत्क्षिप्तकलशापार्श्ववि

कादं॰

६

न्यस्तहस्तपल्लवाः प्रकीर्यमाणनखमयूखजालकाः प्रत्यङ्गुलिविवरविनिर्गतजलधाराः सलिलयंत्रदेवता इव काश्चिज्जातश्रममपनेतुमाक्षिप्तबालातपेनेव दिवसश्रियेव कनककलश
हस्ताः कुंकुमजलेनैवाराङ्गनाः क्रमेण राजानमभिषिषिचुः। अनन्तरमुदचरच्च स्फोटयन्निव श्रुतिपथमनेकप्रहतपटुपटहझल्लरीमृदङ्गवेणुवीणागीतनिनादानुगम्यमानो वंदि
वृन्दकोलाहलाकुलो भुवनविवरव्यापी स्नानशंखानामापूर्यमाणानां मुखरो ध्वनिः। एवं च क्रमेण निर्वर्तिताभिषेको विषधरनिर्मोकपरिलघुनी धवले परिधाय धौते वाससी शरदम्ब
रैकदेश इव जलक्षालनविमलतनुरतिधवलजलधरच्छेदशुचिना दुकूलपट्टपल्लवेन तुहिनगिरिरिव गगनसरित्स्रोतसा कृतशिरोवेष्टनः सम्पादितपितृजलक्रियो मन्त्रपूतेन तोयाञ्ज
लिना दिवसकरमभिप्रणम्य देवगृहमगमत्। उपरचितपशुपतिपूजश्च निष्क्रम्य देवगृहान्निर्वर्तिताग्निकार्यो विलेपनभूमौ झंकारिभिरलिकदम्बकैरनुबध्यमानपरिमलेन मृगमद
कर्पूरकुंकुमवाससुरभिणा चंदनेनानुलिप्तसर्वाङ्गो विरचितामोदिमालतीकुसुमशेखरः कृताम्बरपरिवर्तो रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सह भूपतिभिराहारमभि
मतरसास्वादजातप्रीतिरवनिपतिर्निर्वर्तयामास। परिपीतधूपवर्तिरुपस्पृश्य गृहीतताम्बूलस्तस्मात्प्रमृष्टमणिकुट्टिमप्रदेशादुत्थाय नातिदूरवर्तिन्या ससंभ्रमप्रधावितया प्रतीहार्या
प्रसारितमवलम्ब्यानवरतवेत्रलताग्रहणप्रसङ्गादतिजरठकिसलयानुकारिकरतलं करेणाभ्यन्तरसंचारसमुचितेन पारिजनेनानुगम्यमानो धवलांशुकजवनिकापरिगतपर्यन्त
तया स्फटिकमणिमयभित्तिनिबद्धमिवोपलक्ष्यमाणमतिसुरभिणा मृगनाभिपरिगतेनामोदिना चन्दनवारिणा सिक्तशिशिरमणिभूमिमविरलविप्रकीर्णेन विमलमणिकुट्टिमगगन
तलतारागणेनेव कुसुमोपहारेण निरन्तरनिचितमुक्ताकीर्णशालभंजिकानिवहेन सन्निहितगृहदेवतेनेव गंधसलिलक्षालितेन कलधौतमयेन स्तंभसंचयेन विराजमानमतिबहला
गुरुधूपपरिमलमाशिशिराविगलितजलनिवहधवलजलधरशकलानुकारिणा कुसुमामोदवासितप्रच्छदपटेन पट्टोपधानाध्यासितशिरोभागेन मणिमयप्रतिपादुकाप्रतिष्ठि

कन्यका प्रणनाम। कृतप्रणामायां च तस्यां मणिकुट्टिमोपविष्टायां स पुरुषस्तं विहङ्गमादाय पञ्जरगतमेव किंचिदुपसृत्य राज्ञे न्यवेदयदेवं वदीच्च देव विदितसकलशास्त्रार्थो राजनीतिप्रयोगकुश
लः पुराणेतिहासकथालापनिपुणो वेदिता गीतश्रुतीनां काव्यनाटकाख्यायिकाख्यानकप्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयं च कर्ता परिहासालापपेशलो वीणावेणुमुरजप्र
भृतीनां वाद्यविशेषाणामसमः श्रोता नृत्यप्रयोगदर्शननिपुणश्चित्रकर्मणि प्रवीणो द्यूतव्यापारे प्रगल्भः प्रणयकलहकुपितकामिनीप्रसादनोपायचतुरो गजतुरगपुरुषस्त्रीलक्षणाभि
ज्ञः सकलभूतलरत्नभूतोऽयं वैशम्पायनो नाम शुकः। सर्वरत्नानामुदधिरिव देवो भाजनमिति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता। तदयमात्मीयः क्रियतामित्युक्त्वा नरपतेः पुरो
निधाय पञ्जरमसावपससार। अपसृते च तस्मिन्विहङ्गराजो राजाभिमुखो भूत्वा समुन्नमय्य दक्षिणं चरणमतिस्पष्टवर्णस्वरसंस्कारया गिरा कृतजयशब्दो राजानमुद्दिश्यार्यामिमां प
पाठ। स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः। चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्। राजा तु तां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनमतिमहार्हहेमासनोपविष्टम
मरगुरुमिवाशेषनीतिशास्त्रपारगमतिवयसमग्रजन्मानमखिलमंत्रिमण्डलप्रधानममात्यं कुमारपालितनामानमब्रवीत्। श्रुता भवद्भिरस्य विहंगमस्य स्पष्टता वर्णोच्चारणे स्वरे च मधुरता
प्रथमं तावदिदमेव महदाश्चर्यमसंकीर्णवर्णप्रविभागामभिव्यक्तमात्रानुस्वारसंस्कारसंयोगविशेषसंयुक्तां पदे पदेऽतिपरिस्फुटाक्षरां गिरमुदीरयति। तत्र पुनरपरमभिमतविषये तिरश्चोऽपि
मनुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृत्तिः। तथा ह्यनेन समुत्क्षिप्तदक्षिणचरणेनोच्चार्य जयशब्दमियमार्यामस्मानुद्दिश्यातिपरिस्फुटतया संगीता। प्रायेण हि पक्षिणः पशवश्च भयाहार
मैथुननिद्रासंज्ञामात्रवेदिनो भवन्ति। इदं तु महच्चित्रमित्युक्तवति भूभुजि कुमारपालितः किंचित्स्मितवदनो नरपतिमवादीत्। देव किमत्र चित्रम्। एते हि शुकसारिकाप्रभृतयो विहङ्गविशेषा यथा
श्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन। तत्रापि जन्मोपात्तसंस्कारानुबंधेन वा पुरुषप्रयत्नेन वा संस्कारातिशयं उपजायत इति नातिचित्रम्। अन्यच्चैतेषामपि पुरा पुरुषाणामिवातिपरिस्फु

कादं ७ एवं बहुमानमवनिपतिनाभिहितो मुहूर्तमिव ध्यात्वा सादरमब्रवीत्। देव महतीयं कथा यदि कौतुकमाकर्ण्यतां। अस्ति पूर्वापरजलनिधिवेलावनलग्ना मध्यदेशालङ्कारभूता मेखलेव भुवो व
नकरिकुलमदजलसेकसंवर्द्धितैरतिविकचधवलकुसुमनिकरैरत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभिता मदकलकुररकुलदश्यमानमरिचपल्लवा करिकलभ
करमृदिततमालकिसलयामोदिनी मधुमदोपरक्तकेरलीकपोलकोमलछविना संचरद्वनदेवताचरणालक्तकरसरञ्जितेनेव पल्लवचयेन संछादिता शुककुलदलितदाडिमीफलद्रवार्द्रीकृतत पक्षिणः
लैरतिचपलकपिकुलकंपितकक्कोलच्युतपल्लवफलशबलैरनवरतनिपतितकुसुमरेणुपांशुलैः पथिकजनरचितलवङ्गपल्लवस्रस्तरैरतिकठोरनालिकेरकेतकीकेसरसरिपरि
गतप्रान्तैस्ताम्बूलीलतावनद्धपूगखण्डमण्डितैर्वनलक्ष्मीवासभवनैरिव विराजिता लतामण्डपैरुन्मदमातङ्गकपोलस्थलप्रस्रवणसलिलसिक्तेनेव निरन्तरमेलालतावनेन मदगन्धि
नान्धकारिता नखमुखलग्नेभकुम्भमुक्ताफललुब्धैः शबरसेनापतिभिरभिहन्यमानकेसरिशता प्रेताधिपनगरीव सदासन्निहितमृत्युभीषणा महिषाधिष्ठिता च समरोद्धतपताकिनीव बाणा वृक्षौ
सनारोपितशिलीमुखा विविक्तसिंहनादा च कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालङ्कृता च कर्णीसुतकथेव सन्निहितविपुलाचलाशशोपगता च कल्पान्तप्रदोषसंध्येव प्रनृत्तनी
निर्गुडी लकण्ठा पल्लवारुणा च अमृतमथनवेलेव श्रीद्रुमोपशोभिता वारुणीपरिगता च प्रावृडिव घनश्यामलानेकशतह्रदालङ्कृता च चन्द्रमूर्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च राजस्थि विधुर
तिरिव चमरमृगवालव्यजनोपशोभिता समदगजघटापरिपालिता च गिरितनयेव स्थाणुसंगता मृगपतिसेविता च जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता च कामिनीव चन्दनमृगमद
वृक्षः परिमलवाहिनी रुचिरागुरुतिलकभूषिता च सोत्कण्ठेव विविधपल्लवानिलवीजिता समदना च गलग्रीवेव व्याघ्रनखपंक्तिमण्डिता गण्डकाभरणा च पानभूमिरिव प्रकटितमधुकोशकपाता प्रकीर्ण
विविधकुसुमा च क्वचित्प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणिमण्डला क्वचिद्दशमुखनगरीव चटुलवानरवृन्दभज्यमानतुङ्गशालाकुला क्वचिदचिरनिर्वृत्तविवाहभूमिरिव हरि

तकुशसमित्कुसुमशमीपलाशशोभिता क्वचिदुद्धतमृगपतिनादभीतेव कण्टकिता क्वचिदुन्मत्तेव कोकिलकुलप्रलापिनी क्वचिदुन्मत्तेव वायुवेगाहततालस्वना क्वचिद्विधवेवोन्मुक्ततालपत्रा
क्वचित्समरभूमिरिव शरशतनिचिता क्वचिदमरपतितनुरिव नेत्रसहस्रसंकुला क्वचिन्नारायणमूर्तिरिव तमालनीला क्वचित्पार्थरथपताकेव वानराक्रान्ता क्वचिद्भूपतिद्वारभूमिरिव वे मल्लं
त्रलताशतदुष्प्रवेशा॰ क्वचिद्विराटनगरीव कीचकशतावृता॰ क्वचिदम्बरश्रीरिव व्याधानुगम्यमानतरलतारकमृगा॰ क्वचिद्गृहीतव्रतेव दर्भचीरजटावल्कलधारिणी॰ अपरिमितबहलपत्रसं
चयापि सप्तपर्णभूषिता॰ क्रूरसत्त्वापि मुनिजनसेविता॰ पुष्पवत्यपि पवित्रा॰ विन्ध्याटवी नाम। तस्यां च दण्डकारण्यान्तःपाति सकलभुवनतलख्यातमुत्पत्तिक्षेत्रमिव भगवतो धर्मस्य॰ सुरपति
प्रार्थनापीतसकलसागरसलिलस्य मेरुमत्सरादम्बरतलप्रसारितविकटशिरःसहस्रेणादिवसकररथगमनपथमपनेतुमभ्युद्यतेन अवगणितसकलसुरसमूहवचसा विन्ध्यगिरिणाप्यनुल्लं
घिताज्ञस्य जठरानलजीर्णवातापिदानवस्य सुरासुरमुकुटमकरपत्रभङ्गकोटिचुम्बितचरणरजसो दक्षिणाशावधूमुखविशेषकस्य सुरलोकादेकहुंकारनिपातितनहुषप्रकटप्रभावस्य भगव
तो महामुनेरगस्त्यस्य भार्यया लोपामुद्रया स्वयमुपरचितालवालकैः करपुटसेकसलिलसंवर्द्धितैः सुतनिर्विशेषैरुपशोभितं यादृशैस्तत्पुत्रेण च गृहीतव्रतेनाषाढिना सपवित्रभस्मविरचितत्रि
मार्ग पुण्ड्रकाभरणेन कुशचीरवाससा मौञ्जमेखलाकलितमध्येन गृहीतहरितपर्णपुटेन प्रत्युटजमटता भिक्षां दृढदस्युनाम्ना पवित्रीकृतमतिप्रभूतेध्माहरणाच्च यस्येध्मवाह इति पिता द्वितीयं नाम
चकार। शिशिरदिवाशुकहरितैः कदलीवनैः श्यामलीकृतपरिसरं सरिता च कलशयोनिपरिपीतसागरमार्गानुगतयेव दृढवेणिकया कावेर्या परिगतमाश्रमपदमासीत्। यत्र च दशर
थवचनमनुपालयन्नुत्सृष्टराज्यो दाशरथिर्लक्ष्मीविभ्रमविश्रामो रामो महामुनिमगस्त्यमनुवर्तमानः सह सीतया लक्ष्मणोपरचितरुचिरपर्णशालः पञ्चवट्यां कंचित्कालं सुखमुवास। चिरशून्येऽ
पि यत्र शाखानिलीननिभृतपाण्डुकपोतपंक्तयोल्लग्नतापसाग्निहोत्रधूमराजय इव लक्ष्यन्ते तरवः। बलिकर्मकुसुमान्युद्धरन्त्याः सीतायाः करतलादिव संक्रान्तो यत्र रागः स्फुरति लताकिसल

कादं
८

येषु। यत्र पीतोद्गीर्णजलनिधिजलमिव मुनिना निखिलमाश्रमोपान्तवर्तिषु विभक्तं महाम्भस्सु। यत्र च दशरथसुतनिशितशरनिकरनिपातनिहतरजनिचरबलबहुलरुधिरसि
क्तमूलमद्यापि तद्रागाविद्धनिर्गतपलाशमिवाभाति नवकिशलयमरण्यं। अद्यत्वेऽपि यत्र जलधरसमये गंभीरमभिनवजलधरनिवहनिनादमाकर्ण्य भावतो रामस्य त्रिभुवनवि
वरव्यापिनं चापघोषमस्मरंतो न गृह्णन्ति सस्यकवलमजस्रमश्रुजललुलितदीनदृष्टयो वीक्ष्य शून्या दशदिशो जरज्जर्जरितविषाणकोटयो जानकीसंवर्द्धिता जीर्णमृगाः।
यस्मिन्नेन नवशततमस्रगपानिहतनिःशेषवनहरिणप्रोत्साहितदेवकृतसीताविप्रलम्भः कनकमृगो राघवं मतिदूरं जहार। यत्र च मैथिलीवियोगदुःखदुःखितौ दशवदनविनाशापि प्रक्तौ सूत्कौ
चन्द्रसूर्याविव कबन्धग्रस्तौ समं रामलक्ष्मणौ त्रिभुवनभयं महद्धक्रतुः। अत्यायतेश्च यस्मिन्दशरथसुतशरनिपातितो योजनबाहोर्बाहू रामस्य प्रसादनागतनहुषाजगरकायशङ्कामकरो
तूसं
द्दृषिजनस्य। जनकतनयाचभर्त्तो विरहविनोदनार्थमुटजाभ्यन्तरलिखितो यत्र रामनिवासदर्शनोत्सुका पुनरिव परिणितर्लोर्हे ष्टसंतावनचरैर्द्दृघाप्यौ लोकन्ते। तस्य चैवंविधस्य संप्रत्यपि प्रक
टोपलक्ष्यमाणपूर्ववृत्तान्तस्यागस्त्याश्रमस्य नातिदूरे जलनिधियानप्रकुपितवरुणोत्साहिजेनौगस्त्यमत्सरात्रेदाश्रमसमीपवर्त्तापरद्वितीयवेधसा महाजलनिधिरुत्पादितः। प्रलयकालविहारि
ताम्बरदिविभागसंधिबंधं गगनतलमिव भुवि निपतितं आखिलरहमुद्भूतधरामंडलस्थानमिव सलिलपूरितं मनवरतमज्जदुन्मदशबरकामिनीकुचकलशालुलितजलमुत्फुल्लकुमुदकुवलय
कह्लारमुन्निद्रारविन्दमकरन्दनिस्यन्दवद्धचंद्रकं मलिकुलदंपेलान्धकारितसौगंधिकं मारसितसमदसारसं मम्बुरुहमधुपानमत्तकलहंसकामिनीकृतकोलाहलमनेकजलचरपतङ्ग
शतसंचलनचलितचंचलतवाचालवीचिमालमानिलोच्छासितकल्लोलशिशिरसीकरासारदुर्दिनमम्भोभिः नावतीर्णाभिरज्ञः कोशपाणिभिः स्नानसमयेषु वनदेवताभिः कैपकुसुमैः सु
रभीकृतमेकदेशावतीर्णमुनिजनापूर्यमाणकमण्डलुकलध्वनिमनोहरमुन्मिषदुत्पलवनमध्यवासिभिः सवर्णतया रसितानुमेयैः कादम्बकदम्बकैरसेवितं मभिषेकावतीर्णपुलिन्दराज

तपादैनपार्श्वस्थशिलापादपीठेनेतुहिनगिरिशिलातलसदृशेन प्रयत्नेन सनाथीकृतवेदिकं भुक्तास्थानमंडपमयासीत्। तत्रशयनतलनिषण्णः क्षितितलोपविष्टायापार्श्वे शनैः शनैर्हि
।नेताप्सिलतया खड्गवाहिन्या नवनलिनदलकोमलेन करसंपुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरेव निपतितभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन् मुहूर्तमिवासांचक्रे। ततो
नातिदूरवर्तिनीमनःपुरोहितवैशम्पायनमादायागच्छेति समुपजाततद्वृत्तान्तप्रश्नकुतूहलो राजा प्रतीहारीमादिदेश। सा क्षितितलनिहितजानुकरतला यथाज्ञापयति देव इति शिरसि कृतौं
यथादिष्टमकरोत्। अथ मुहूर्तादेव वैशम्पायनः प्रतीहार्या गृहीतपंजरः। कनकवेत्रलतावलम्बिनो किंचिदवनतपूर्वकायेनैसितकञ्चुकावच्छन्नवपुषा जरधचलितमौलिना गग
द्गदस्वरेणामन्दमन्दसंचारिणा विहङ्गजातिप्रीत्याजरत्कलहंसेनेव कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम। क्षितितलनिहितकरतलस्तु कंचुकी राजानं व्यज्ञापयत्। देव देव्यो विज्ञा
पयंति। देवादेशाद्देव वैशम्पायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्यानीत इत्यभिधाय गतेवतं स्मिन्राजा वैशम्पायनमपृच्छत्। कच्चिदभिमतमास्वादितमभ्यन्तरे भवता किंचिद
शनजातमिति स प्रत्युवाच। देव किं वा नास्वादितं। आमत्तकोकिललोचनच्छविनीलपाटलः कषायमधुरः प्रकामम्मापीतो जम्बूफलरसः। हरिनखरभिन्नमत्तमातङ्गकुंभमु
क्तरक्तार्द्रमुक्ताफलत्विषि खंडितानि दाडिमीबीजानि नलिनीदलहरितानि द्राक्षाफलस्वादूनि चंदलितानि स्वेच्छया प्राचीनामलकीफलानि। किंवा प्रलपितेन बहुना सर्वमेव देवी
भिः स्वयं करतलोपनीयमानं ममतायते इत्येवं वादिनोऽवचनमाक्षिप्य नरपतिरब्रवीत्। आस्तां तावत्सर्वमेवेदमपनयतु नः कुतूहलं मावेदयतु भवानादितःप्रभृति कार्त्स्न्येनात्म
नो जन्म कस्मिन्देशे भवान्कथं जातः केन वा नाम कृतं का माता कश्च ते पिता कथं वेदानामागमः कथं शास्त्राणां परिचयः कुतः कलाः समासादिताः किं जन्मान्तरानुस्मरणं उत वरप्रदानमथ
वा विहगवेषधारी कश्चित्प्रच्छन्नो निवससि। क्व वा पूर्वमुषितं किंयद्वा वयः कथं पञ्जरबंधः कथं चाण्डालहस्तगमनमिह वा कथमागमनमिति। वैशम्पायनः स्वयमुपजातकुतूहलेन

कादं॰ दुर्योधनइवोल्लसितशकुनिपक्षपातोनलिननाभइववनमालोपगूढोनवजलधरव्यूहइवनभसिसंदर्शितोन्नतिरखिलभुवनतलावलोकनप्रासादइववनदेवतानामधिप
तिरिवदंडकारण्यस्यनायकइवसर्ववनस्पतीनांसखेवविंध्यस्यशाखाबाहुभिरुपगूह्येवविंध्याटवीमवस्थितोमहान्जीर्णःशाल्मलीवृक्षः।तत्रचशाखाग्रेषुकोटरोदरेषु
९ पत्रवान्तरेषुस्कंधसंधिषुजीर्णवल्कलविवरेषुमहावकाशतयाविस्रब्धविरचितकुलायसहस्राणिदुरारोहतयाविगतविनाशभयानिनानादेशसमागतानिश
कुनिकुलानिप्रतिवसन्तिस्म।यैःपरिणामविरलदलसंहतिरपिसवनस्पतिरविरलदलनिचयश्यामलइवोपलक्ष्यते।दिवानिशंनिलीनैः।तेचतस्मिन्वनस्पतौवति
वाह्णांनिवासरजनीमात्मनीडेषुप्रतिदिनमुत्थायोत्थायाहारान्वेषणायनभसिविरचितपंक्तयोमदकलहलधरहलमुखोत्क्षेपविकीर्णबहुस्रोतसंभ्रममंबरतलेकलिंद
कन्यामिवदर्शयन्तःसुरगजोन्मूलितविगलदाकाशगंगाकमलिनीशंकामुपजनयन्तोःदिवसकररथतुरगप्रभानुलिप्तमिवगगनतलमुपपादयन्तःसंचारिणीमिवमर
कतस्थलींविडंबयन्तःशैवलपत्रावलीमिवांबरसरसिप्रसारयन्तोगगनवितानैःपक्षपुटैःकदलीदलैरिवदिनकरकरनिकरपरिखेदितान्याशामुखानिवीजयन्तो।विय
तिविसारिणींशष्पवीथीमिवारचयन्तःसेन्द्रायुधमिवांबरमादधानाविचरन्तिस्म।कृताहाराश्चपुनःप्रतिनिवृत्ताआत्मकुलायावस्थितेभ्यःशावकेभ्योविविधा
न्फलरसान्कलममंजरीविकारांश्चप्रहतहरिणरुधिरानुरक्तशार्दूलनखकोटिपाटलेनचंचुपुटेनदत्वाधरीकृतसर्वस्नेहेनासाधारणेनगुरुणादपत्यप्रेम्णातस्मिन्नेवको
टरेनिर्गृहीततनयाःक्षपाःक्षपयन्तिस्म।एकस्मिंश्चजीर्णकोटरेजाययासहनिवसतःपाश्चिमेवयसिवर्तमानस्यकथमपिपितुरहमेवैकोविधिवशात्सूनुरभवमतिप्रबलयाचा
भिभूतामेवजायमानस्यप्रसववेदनयाजननीमेलोकान्तरमगमत्।अभिमतजायाविनाशशोकदुःखितोपिखलुतातःसुतस्नेहान्निरुध्यप्रसरंतमपिशोकमेकाकी

मत्संवर्धनपरएवाभवत्।अतिपरिणतवयाश्चकुशचीरानुकारिणीमिवस्कंधावशिष्टजीर्णपिच्छजालजर्जरामवलंबमानोदेहशिथिलामपगतोत्पतनसंस्कारामपत्यपक्षसन्ततिमुद्वह
न्नुपारूढकम्पतयाचसन्तापकारिणीमिवलग्नांजरामिवविधुन्वन्नकठोरशेफालिकाकुसुमनालपिंजरेणकलममंजरीदलनमसृणितजीर्णोपान्तलेखेनस्फुटिता
ग्रकोटितोचंचुपुटेनपरनीडनिपतिताभ्यःशालिवल्लरीभ्यस्तण्डुलकणानादायादायतरुमूलनिपतितानिचशुककुलावदलितानिफलशकलानिसमाहृत्यपरिभ्रमितुमशक्तो
भु मह्यमददात्।प्रतिदिवसमात्मनाचमदुपभुक्तशेषमकरोदशनं।एकदातुप्रभातसंध्यारागलोहितेगगनतलकमलिनीमधुरक्तपक्षसम्पुटेवृद्धहंसइवमन्दाकिनीपुलिनादपर
जलनिधितटमवतरतिचन्द्रमसिपरिणतरंकुरोमपाण्डुनिव्रजतिविशालतामाशाचक्रवालेगजरुधिररक्तहरिसटालोमलोहिनीभिरातप्तलाक्षिकतंतुरंजितरसपाटलाभिरा
यामिनीभिरात्रिशिशिरकिरणदीधितिभिःपद्मरागरत्नशलाकासंमार्जनीभिरिवसमुत्सार्यमाणेगगनकुट्टिमकुसुमप्रकरेतारागणेसंध्यामुपासितुमुत्तराशावलम्बिनिमा
नससरस्तीरमिवावतरतिसप्तर्षिमंडलेतटगतविघटितशुक्तिसम्पुटविप्रकीर्णमरुणाकरश्रेण्याधौतगलितमुडुगणमिवमुक्ताफलनिकरमुद्वहतिधवलितपुलिनतटमुदन्वति
प्रवृत्तेनतुषारबिन्दुवर्षिणिविबुद्धशिखिकुलैर्विजृंभमाणकेसरिणिकरिणीकदंबकप्रबोध्यमानमदकरिणिस्येवेचजातेप्रभातेहरिपल्लवतरुकेसरकुसुमनिकरमुदस्यगिरि
शिखरस्थितेसवितारमिवोर्ध्वपल्लवाञ्जलिभिःसमुत्सृजन्तिकाननेरासभरोमधूसराश्चवनदेवताप्रासादानांतनूर्णाग्रशिखरेषुपारावतमालायमानाश्चधर्मपताकाश्चिवे
समुन्मिषन्तीष्वतपोवनाग्निहोत्रधूमलेखास्ववश्यायपशीकरिणिलुलितकमलवनेरतिखिन्नशबरसीमन्तिनीस्वेदकणिकापहारिणिवनमहिषरोमन्थफेनबिन्दुवाहिनिचलि
तपल्लवेलतालास्योपदेशव्यसनिनिविघटमानकमलसंपुटमधुशीकरासारवर्षिणिकुसुमामोदतर्पितालिजालेनिशावसानजातजडिम्निमन्दसञ्चारिणिप्रवातिप्राभातिकेमा

२भुजाभ्यंतरं२

तरिखिलैनैकमलप्रबोधमंगलपाठकानामिभगंडभित्तिमानानांमधुलिहांकुमुदोदरेषुकंबरमानरत्नपुटनिबद्धपक्षसंहतीनांमधुकरकुलहुंकारैःप्रभातशिशिरमारुताहतानांमुत्तमजलत

कादं० तरुशिखरैकमलप्रबोधमंगलपाठकानामपि शनैःशनैरुपरतरवाणामिव्याधसङ्क्रौंचरेमराजिषुवनमहिषेषित्तस्ततःसंचरत्सुवनचरेषुविजृम्भमाणेष्ट्रो

१० ग्लिष्टमयस्समालेभिवस्तपोवनिद्राजिहिलिततारकंचचुरुन्मीलयत्सुशनैःशनैरूलूकरेश्याधमस्क्रौंचरेमराजिषुवनमहिषेषु कर्णतालप्राधेन्द्रमेणचगगनमार्गमवतरतोदिवसकरारुणस्याँवचूलचामरकला

त्रहारिणीपम्पासरःकलहंसकोलाहलेसमुद्गसतिनतिशिखंरिमंडलेमनोहरैवनगजकर्णतालप्राधेन्द्रमेणचगगनमार्गमवतरतोदिवसकरजन्मनिरुत्ततारैयुनरि

पद्मोत्पलसमाणोमञ्जिष्ठारागलोहितैकिरणजालैःशनैःशनैर्दिनैर्भगवतिसवितरिपंपासरःपर्यन्ततरुशिखरसंचारिण्यर्ध्यसितगिरिशिखरैर्दिवसकरजन्मनिरुत्ततारैयुनरि

पद्मोत्पलसमाणोमञ्जिष्ठारागलोहितैकिरणजालैःशनैःशनैर्दिनैर्भगवतिसवितरियंयासरःपर्यन्ततरुशिखरसंचारिण्यर्ध्यसितगिरिशिखरैर्दिवसकरजन्मनिरुत्ततारैयुनरि

पद्मोत्पलसमाणोमञ्जिष्ठारागलोहितैकिरणजालैःशनैःशनैः प्रभासिभास्वतिभूतेषुप्रयातेषुयथाभिमतादिशाशकुन्तकुलेषुकुलायनि

र्वकपीतरवैर्नर्मभियत्तविवालातपेस्पष्टेजातेप्रसुप्तसिनविरणैरिवदिवसाष्टमभागभाजिस्यप्रभासिभास्वतिभूतेषुप्रयातेषुयथाभिमतादिशाशकुन्तकुलेषुकुलायनि

लीननिभृतशावसनाथैपिनिःशब्दतयाशून्यइवतस्मिन्वनस्पतौलीनीअवस्थितेएवतातेमयिचपितापाचारसंजातबलसमुल्लिघमानपक्षपुटेतातसमीपवर्तिनिकोटरगतेसह

सैवतस्मिन्महावनेसंत्रासितसकलवनचरःसरभसमुत्पतत्पतत्रियक्षपुटशब्दसमंततोभीतकरियोतचीत्कारपीवरःप्रचलितलताकुलितमत्तालिकुलक्वणितमांसलःपरिभ्रम

दुद्धोणवनवराहरवबंधुरःगिरिगुहासुप्तप्रबुद्धसिंहनादोपबृंहितःकम्पयन्निववनैत्तरूभगीरथावतार्यमाणगंगाप्रवाहकलकलबहलोभीतवनदेवताकर्णितोमृगयाकोलाहल

ध्वनिरुदचरत्।आकर्ण्यतमहंजन्मश्रुतपूर्वमुपजातवेपथुरर्भकतयाजर्जरितकर्णविवरोभयविह्वलःसमीपवर्तिनःपितुःप्रतीकारबुद्ध्याजराशिथिलपक्षपुटान्तरमविशम्।अनन्तरंच

सरभसमितोगजयूथपतिलुलितकमलिनीपरिमलःइतःक्रोडकुलदश्यमानभद्रमुस्तारसामोदइतःकरिकलभभज्यमानसल्लकीकषायगंधइतोनिपतितशुष्कपत्रमर्मरध

निरितोवनमहिषविषाणकोटिकुलिशाभिघातवल्मीकधूलिरितोमृगाकदम्बकमितोवनगजकुलमितोवराहयूथमितोवनमहिषवृन्दमितःशिखण्डिमयूरसंविरुतमितः

रा

कन्दरीकुचचंदनपंकलिखितरङ्गं मुपानन्नातकेतकीरजःपटलवद्धकूलपुलिनैर्मासन्नाश्रमागततापसक्षालितार्द्रवल्कलकषायपाटलतरजलैमुपतटविटपिपक्वबीजनिफली

जितैर्मविरलतमालवीथिकान्धकारिताभिर्वालिनिर्वासितेनैवसंचरतोप्रतिदिनमृष्यमूकवासिनासुग्रीवेणावलूनफलपत्रपुटविगलितजलबिन्दुसेकसुकुमारकिसल

याभिर्लतामंडपतलस्थितशिलाशिलमणुलास्वताएवाभिर्नेककुसुमपरिमलवाहिनीभिर्वनदेवताभिःप्रवासवासिताभिरिवबनराजीभिरुपरुद्धतीरैमपरसागरशङ्कि

भिःसलिलैर्भारातुमवतीर्णैर्जलधरैरिवबहलपद्मिनीमलिनैर्वनकरिभिर्नवरत्नमापीयमानमगाधमनन्तमप्रतिमर्ममयांनिधानंपम्पाभिधानंपद्मसरः।यत्रचविकचकुवलयप्र

भाश्यामायमानपयस्युरगृन्धाधिपमूर्तिमद्रामशापप्रसानीवमध्यवारिण्यामालोकन्तेचक्रनाम्नांमिथुनानि।तस्यैवचपद्मसरसःपश्चिमेतीरेराघवशरप्रहारजर्जरितजीर्णताल

तरुखंडस्यचसमीपेरिमाजकरदंशानुकारिणानरदंजगरेणामहतामावेष्टितमूलतयाबद्धमहालवालरचंतुङ्गस्कंधावलम्बिभिर्निलवैछित्तैरहिनिर्मोकैर्धौतोत्तरीयवदिक्

चक्रवालपरिमाणमिवगृह्णन्ताभुवनान्तरालानिविप्रकीर्णेनशाखासंचयेनप्रलयकालताण्डवप्रसारितभुजसहस्रमुत्पतितपादकलशेखरमिवविरम्भपितुमुद्यतःपुराणतयापतनभ

याद्दिवगगनस्कंधलग्नोनिखिलशरीरव्यापिनीभिरतिरहोन्नताभिर्जीर्णतयाशिराभिरिवपरिगतोव्रततिभिर्जरातिलकबिंदुभिरिवकंटकैराविततनुरितस्ततःपरियीतसागरस

लिलैर्गगनागतैःपत्ररथैरिवपर्णरवान्तरेषुनिलीयमानैःस्वर्णमधुभारालसैरीगीकृतपक्षवैर्जलधरपटलैरथैर्द्यमाशिखरदेशरत्नुङ्गतयानन्दनवनश्रियमिवालोकयितुम्

भ्युद्यतःसमीपवर्तिनांमुपरिसंचरतांमम्बरतलगमनखेदायासितानांरविरथतुरङ्गमाणांस्कंधपरिस्नुतैःफेनपटलैःसंदेहिततूलराशिभिर्धवलीकृतशिखरशाखोवनगज

कपोलकंडूयनलग्नमदनिलीनमत्तमधुकरमालेनलोहशृङ्खलाबंधनिश्चलेनेवकस्यस्यापिनामूलेनसमुपेतःकोटराभ्यन्तरनिविष्टैःस्फुरद्भिःसजीवद्रुमधुकरपटलै

काद॑ चशरभसविमुक्तबर्हभारधारिणीभिर्वनगजव्यापिनां ध्वानैः सर्वतः प्रचलितमिव तदरण्यमभवत्। अचिराच्च प्रशान्ते तस्मिन्मृगयाकलकले निःशब्दमूकजलधरवृन्दानुकारि
११ णि मथनावसानोदधिजलवारिणि सागर इव स्तिमिततामुपागते कानने मन्दीभूते भयेऽहमुपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां
प्रसार्य संत्रासतरलतारकः शैशवात्किमिदमिति समुपजातविस्मयो दिदृक्षुरिवादिशं चक्षुः प्राहिणवम्। अभिमुखमापतच्च तस्मादहं नानारवमर्जुनभुजदण्डसहस्र
विप्रकीर्णमिव नर्मदाप्रवाहमनिलबलचलितमिव तमालकाननमेकीभूतमिव कालरात्रीणां यामसंघातमञ्जनशिलास्तम्भसमूहमिव क्षितिकम्पविचूर्णितम
न्धकारपूरमिव रविकिरणाकुलितमनेकपरिवारमिव परिभ्रमन्तमिव दारितरसातललोकमिव दानवलोकमशुभकर्मसमूहमिवैकत्र समागतमशेषदण्डकारण्यनि
वासिमुनिजनशापसार्थमिव सज्वरनैरन्तरशरनिकरवर्षिरामनिहतदूषणबलमिव तदरण्यध्यानात्पिशाचतामुपगतं कलिकालबन्धुवर्गमिव समुद्गतमिव
गाहोत्थितप्रस्थितमिव वनमहिषयूथमचलशिखरस्थितकेसरिकरालमयतनधीर्णमिव कालमेघपटलमखिलरूपविनाशाय धूमकेतुजालमिव समुद्गतमन्धका
रितारोषकाननमनेकसहस्रसंख्यमतिभयजनकमुन्यातवेतालव्रातमिव शबरसैन्यमद्राक्षम्। मध्ये च तस्यातिमहतः शबरसैन्यस्य प्रथमे वयसि वर्तमानमतिकर्कशतादौ
यमिव निर्मितमेकलव्यमिव जन्मान्तरागतमुद्भिद्यमानश्मश्रुराजितया प्रथममदलेखामंश्यमानगण्डभित्तिमिव गजयूथपतिकुमारकं मासितकुवलयश्यामलेन देहप्रभाप्र
वाहेण कालिन्दीजलेनेव पूरयन्तमरण्यमाकुटिलाग्रेणास्कन्धावलम्बिना कुन्तलभारेण केसरिणमिव गजमदमलिनीकृतेन केसरकलापेनोपेतमायतललाटमुन्नति
गुरुघोणमुपनीतस्यैकैककर्णाभरणतां भुजगफणामणेरंशुपटलैः सुरभिलोहितीकृतेन पर्णशयनाभ्यासात्प्रपक्षवराहकोडैर्वा मयाखेलेन विराजमानमविरह

५घरित

तगजकपोलगृहीतेन समदपरिमलवाहिनाऽलिकागुरुपङ्केनेव कृष्णमिवेपीमिदेन कृताङ्गरागमुपरितन्यस्तमदान्धेन परिभ्रमता भ्रमाप्रछत्रानुकारिणा मधुकरकुलेन तमालप
त्रवेनेव निवारितातपमालोलकर्णपद्मव्याजेन भुजबलनिर्जितया भयप्रयुक्तसेवया विंध्याटव्येव करतलेनोपमज्यमानगण्डस्थलस्वेदजलेरवमापाटलया हरिणकुल
कालरात्रिसंध्यायमानयाक्षेणितादृशैव दृष्ट्या रज्यपत्तमोषाविभागामाजानुलम्बेन वनकुञ्जरकरप्रमाणमिव उत्कीलानिर्मितेन चण्डिकारुधिरबलिप्रदानार्थमसकृन्नि
शितशस्त्रोल्लेखविषमितशिखरेण भुजयुगलेनोपशोभितमजगरागालग्राहिणा हरिणरुधिरबिन्दुनोस्वेदजललाविनेन गुञ्जाफलमिश्रैः करिकुम्भमुक्ताफलैर्वि विरचि
ताभरणेन विंध्यशिलातलविशालेन वक्षस्थलेनोद्भासमानमचिरतन्त्रमाभ्यासादुत्क्षिप्तोदरमिभमदमलिनेमालानस्तम्भद्वयमुपहसन्तमिवोरुदण्डद्वयेन लाक्षालो
हितकौशेयपरिधानमकारणेऽपि क्रूरजातितयाबद्धत्रिपताकोग्रभ्रुकुटीकरालेन ललाटपट्टेनावलम्भनभ्याशयाधितयामत्परिग्रहामिति कात्यायन्यात्रिशूलेनेवाङ्कितमुपजा
तपरिचयैरनुगच्छद्भिः श्रमवशादुद्गीर्णविनिर्गताभिः स्वभावपाटलतयातिरक्ताभिः पिहरिणशोणितमिव स्रवन्तीभिर्जिह्वाभिर्वेष्टमानस्वेदैर्विवृतमुखत्वात्तयासमदन्ददंष्ट्राभ्र
दत्तानशल्लमकेसरिसटानिर्वेर्णकभागानुद्वहद्भिः स्थूलवराटकमालिकापरिगतकण्ठैर्महावराहदंष्ट्राप्रहारजर्जरैः स्वल्पकायैरपि महाप्राज्ञैः सारमेयैरनुपजातकेसरैरिव केसर
रिकिशोरकैर्मृगवधवैधव्यदीक्षादानदक्षैरनेकवर्णैः श्वभिः शतिप्रमाणाभिश्च केसरिणामभयप्रदानयाचनार्थमागताभिः सिंहीभिरिव कोलेयकुटुम्बिनीभिरनुगम्यमानं कै
श्चिद्गृहीतचमरवालगजदन्तभारैः कैश्चिदुच्छ्रितपल्लवबद्धमधुपुटैः कैश्चिन्मृगपतिभिरिव गजकुम्भमुक्ताफलनिकरसनाथपाणिभिः कैश्चिद्यातुधानैरिव गृहीतपिशिताहारैः
कैश्चित्प्रमथैरिव केसरिचर्मधारिभिः कैश्चित्क्षपणकैरिव मयूरपिच्छवाहिभिः कैश्चिच्छिशुभिरिव काकपक्षधरैः कैश्चित्कृष्णचरितमिव दर्शयद्भिः समुत्खातविधृतगजदन्तैः कैश्चि

अनुरक्ता लुब्धका यस्मिन् २

कादं· जलदागमदिवसमिव जलधरच्छायामलिनाम्बरैरनेकशरजालैः शबरहस्तैः परिवृतमरण्यमिव सहवृद्धेनानुकम्पमभिनवजलधरमिव मयूरपिच्छचित्रचापधारिणं बकशावसमिव

१२ गृहीतनैकचक्रं अरुणानुजमिव बद्धतानेकमहाऽजगरशिविषघः नागरपानं भीष्ममिव त्रिशंकुप्रयुक्तं शबरशिबरमिव सततविभ्रमगजकुम्भविद्याधशौर्यमेवमानसवेगं। पराशर

मिवयोजनगंधानुसारिणं घटोत्कचमिव भीमरूपधारिणं अक्लराजकन्यकाकेशपाशमिव नीलकंठचंद्रकाभरणं हिरण्याक्षदानवमिव महावराहदंष्ट्राविभिन्नवक्षस्य

लमतिशायिनीमिव कृतबहुबन्दिपरिग्रहं पिशिताशिनमिव रक्तलुब्धकं गीतमिव निषादानुगतमम्बिकात्रिशूलमिव महिषरुधिरार्द्रकायमभिनवयौवनमपि क्षपितबहुवय

संकृतशासमेयसंग्रहमर्थिफलमल्पाशिनं। कृष्णमर्थकृद्दर्शनं स्वछन्दप्रचारमपि दुर्गैकशरणं क्षितिभृत्पादानुवर्तिनमपि राजसेवानभिज्ञमपत्यमिव विंध्यस्यांशावतारमिव कृतान्तस्य सहोद

रमिव पापस्य सारमिव कलिकालस्य भीषणमपि महासत्त्वतया गम्भीरमिवोपलक्ष्यमाणमनभिभवनीयाकृतिं मातङ्गकनामानं शबरसेनापतिमपश्यं। अभिधानेन तु तस्य पश्चादहमश्रौषं।

आसीच्च मे मनसि अहो मोहप्रायमेषां जीवितं साधुजनविगर्हितं च चरितं। ॥तथाहि॥ पुरुषपिशितोपहारो धर्मबुद्धिराहारः साधुजनविगर्हितो मधुमांसादिः श्रमो मृगया शास्त्रं शिवारुतमुपदेष्टारः सद

सतां कौशिकाः प्रज्ञा शकुनिज्ञाने परिचिताः श्वानः राज्यं शून्यास्वटवीषु आपानकमुत्सवः मित्राणि क्रूरकर्मसाधनधनूंषि सहाया विषदिग्धमुखा भुजङ्गा इव सायकाः गीतमुन्मादकारि मुग्धमृगा

णां कलत्राणि बुद्धिगृहीताः परयोषितः क्रूरात्मभिः शार्दूलैः सह संवासः पशुरुधिरेण देवतार्चनं मांसेन बलिकर्म चौर्येण जीवितं भूषणानि भुजंगमणयो वनगजमदैरङ्गरागो यस्मिन्नेव का

नने निवसन्ति तदेवोत्खातमूलमशेषतः कुर्वन्तीति चिन्तयत्येव मयि स शबरसेनापतिरटवीपरिभ्रमणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलितरोरधः छायायामवतारितकोदण्डः त्वरितपरिजनो

पनीतपल्लवासने समुपाविशत्। अन्यतमस्तु शबरयुवा ससंभ्रममवतीर्य तस्मात् करकमलयुगपरिशोभिताम्भसः सरसो वैदूर्यद्रवानुकारि प्रलयदिवसकरकिरणोपतापात् द्रवीकृतमिवाम्बरैकदेशमिव विली

कपिञ्जलकुलकलकूजितैः प्रियैः कुररकुलकथितैर्मितैर्मृगपतिनखभिद्यमानकुम्भकुञ्जरशरसिक्तमिव मौक्तिकपङ्कमलिनानां वराहरूपदन्तैरियमभिनवशष्पकवलरसश्यामलाहरि

णरोमन्थफेनसंहतिरियमभिमदगन्धगजमदकण्डूयनपरिमलालीनमुखरमधुकरविरुतैरियमानियन्त्रितरुधिरबिन्दुसिक्तशुष्कपत्रपाटलारुरुपदवी एतद्विरदवराणामदि

तविरयपल्लवपटलमेतत्त्वप्रकुलक्रीडितमेष नखकोटिविलिखितविकटपत्रलेखो रुधिरपाटलः करिमौक्तिकदलदन्तुरो मृगपतिमार्ग एषा प्रत्यग्रप्रसूतवनमृगी

गर्भरुधिरलोहिनी भूमिरियमटवीवेणिकानुकारिणी पच्चरस्य यूथपतेर्मदजलमलिना संचारवीथी चमरीयं किरियमनुगम्यतामुद्धुतमृगकारीषपांशुलालाञ्छितते म

ध्यास्यतामियं वनस्थली तरुशिखरमारुह्यतामालोक्यतां दिशि एषमाकर्ण्यतामयं शब्दो गृह्यतां धनुरेवं हितैः स्थीयतां विमुच्यतां श्वान इत्यन्योन्यमभिवदतां मृगयासक्तस्य मह

तो जनसमूहस्य तरुगहनान्तरितविग्रहस्य क्षोभितकाननं कोलाहलमशृणवं। अथ नातिचिराद्देवानुलेपनार्द्रमदरुः घनिधीरेण गिरिविवरविजृम्भितप्रतिनादगम्भीरेण

प्राणजलधरसितानुकारिणा गजयूथपतीनां कण्ठगर्जितेन रभसरसारमेयविलुप्यमानावयवानां मालोलकातरतरलतरतारकाणामेणकानां च करुणानुकूजितैर्निह

तयूथपतीनां वियोगिनीनामनुगतकलभानां चास्थिताऽस्थिता समाकर्ण्य कलकलमुत्कर्णपल्लवानामितस्ततः परिभ्रमन्तीनां प्रत्यग्रपतिविनाशशोककरीर्घोणाकरिणीनां

चीत्कृतैर्नैकतिपयदिवसप्रसूतानां च वृद्धैधेनुकानां त्रासपरिभ्रष्टपोतान्वेषिणीनामुन्मुक्तकरार्तमतिकरुणमारसन्तीनामाक्रन्दितैर्नतनुत्रिसरमुत्पतितानामाकुला

मृगया

१· कारिणां कुलकारिणां चंचत्र्यस्थानां कोलाहलेनैरूणानुसारप्रधावितानां च मृगनयनां युगपदेति रभसस्यारयाताभिहतायां भुवः कम्पमिव जनयतां च रणप्राप्तैनैकर्णानामुरुधम्या

नां च मदकलकुररकामिनीकण्ठकुजितकलेन शरनिकरवर्षिणां धनुषां निनादेन पवनाहतिक्वणितधाराणामसीनां च वनमहिषस्कन्धपीठपातिनां रणितेन फलानां

कादं॰ कर्षणव्याक्षिप्तप्रकोष्ठेभग्नकण्टकानुकारिणंवामबाहुमिवतिन्नप्रोथोंमुहुर्मुहुर्दत्तचञ्चुप्रहारंमुहुःकूजन्तंमामाकृष्यतातमपगतासुमकरोत्।मांतुस्वल्पशरीरत्वाद्भयसम्पीडिताङ्गंसात्सा
१५ वशेषत्वादायुषःकथमपितत्पक्षपुटान्तर्गतंनालक्षयत्।उपरतंचतातमवनितलेशिथिलशिरोधरमधोमुखममुञ्चत्।अहमपितच्चरणान्तरालप्रवेशितशिरोधरोनिभृतमङ्कदे
पानिलीनैःस्नेनैवसंहायितं।अवशिष्टपुण्यतयानुपवनवशात्पुञ्जितस्यमहतःशुष्कपर्णराशेरुपरिनिपतितंमामात्मानमपश्यम्।अङ्गानिमेयेननैनावशीर्यन्त।यावच्चासौतस्मात्तरुशिख
रान्नावतरतितावदहमेवजीर्णपर्णसवर्णतयोरस्फुरोपलक्ष्यमाणोमूर्च्छितःपितरमुपरतमुत्सृज्यनृशंसःस्वप्राणपरित्यागयोग्येऽपिकालेबालतयाकालान्तरभुवःस्नेहरसस्यानभिज्ञोजन्मसह
भुवाभयेनैवकेवलमभिभूयमानःकिञ्चिदुपजाताभ्यांपक्षाभ्यामीषत्कृतगमनावष्टम्भोलुठन्नितस्ततःकृतान्तमुखकुहरादिवविनिर्गतंमामात्मानंमन्यमानोनातिदूरवर्तिनःशबरसुन्दरीक
र्णपूररचनोपयुक्तपल्लवस्यसंकर्षणपटनीलेनच्छाययोपहसन्तमिवगराधरच्छविमच्छैःकालिन्दीजलच्छेदैरिवविरचितच्छदस्यवनकरिमदसलिलैरिवसंसिक्तकिशलयस्यविन्ध्याटवीकेश
पाशश्रियमुद्वहतोदिवाप्यन्धकारितशाखान्तरस्यादृष्टविषसूर्यकिरणमतिगहनंमपरस्येवपितुरुत्सङ्गमतिमहतस्तमालविटपिनोमूलदेशमविशम्।अवतीर्यचसतेनसमयेनक्षितितल
विप्रकीर्णानसंख्यातानेकशिखण्डिनोनेकलतापाशसंयतानाबद्ध्यपर्णपुटैस्त्वरितगमनःसेनापतिगतेनैववर्त्मनातामेवदिशमन्वगच्छत्।मांतुलब्धजीविताशंप्रत्यग्रपितृमरणशोकशु
ष्कहृदयमतिदूरपातादायासितशरीरंसंत्रासजातवेपथुंसर्वतोपतापिनीचलवतीपिपासापरवशमकरोत्।अनयाचकालकलनयासुदूरमतिक्रान्तःसपापकृदितिपरिकलय्यकिंचिदु
न्नमितकंधरोभयचकितयादृशादिशोवलोकयन्तृणेऽपिचलतिप्रतिनिवृत्तःसैवापरुद्धितंतमेवपदेपदेपापकारिणोमुखेस्यैमाणोनिष्क्रम्यतस्मात्तमालतरुमूलात्सलिलसमीपमुपसर्तुंप्र
यत्नमकरवम्।अनुपजातपक्षतयाचनातिस्थिरचरणसंचारस्यमुहुर्मुहुरधोमुखेनैर्यततोमुहुश्चिपीडितंपतन्तमात्मानमेकयापक्षपाल्यासंधारयतःक्षितितलसंसर्पणश्रमातुरस्यानभ्या

सवशारैकंमनवरतमुन्मुखस्यस्थूलंस्थूलंनिश्वसतोधूलिधूसरस्यसंसर्पतोममाभून्मनसि।अतिकष्टदशास्वपिजीवितनिरपेक्षानभवन्तिखलुजगतिप्राणिनांप्रवृत्तयः।नास्तिजीवि
तादन्यदभिमततरमिहजगतिजन्तूनाम्।एवमुपरतेऽपिगृहीतनाम्नितातेयदहमविकलेन्द्रियःपुनरेवप्राणिमि।धिङ्मामकरुणमतिनिष्ठुरंसोढपितृमरणशोकदारुणंयेनमयाजीव्यतेऽहह
तंमपिनापेक्षितेखलंखलुमेहृदयं।अहंहिलोकान्तरमुपगतायांमम्मायांनियम्यशोकावेगंमांप्रसवदिवसात्प्रभृत्यतिपरिणतवयसापिसतातातेनतैस्तैरुपायैःसंवर्धनक्लेशमतिमहान्तमपिस्नेह
वशाद्गणयतायन्मयापरिपालितस्तत्सर्वमेकपदेविस्मृतमिति।अतिकृपणाःखल्विमेप्राणाःप्रत्युपकारिणमपितातमद्यापिगच्छन्तंनानुगच्छन्ति।सर्वथानकंचिन्नखलीकरोतिजीविततृ
ष्णांपरीतप्रायवस्थमपिमामेषायासयतिजलाभिलाषोमन्येचागणितपितृमरणशोकस्यनिर्दयतयैवकेवलमियंममसलिलपानबुद्धिः।दूरेऽपिदूरतश्चसरः।तथाहिजलदेवतानूपुररवानु
कारिहंसघाविकलहंसविरुतमेतदस्फुटमाकर्ण्यतेसारसरासितानि।अयंचविप्रकर्षाद्विरलतामुपयातःसरोमुखविसर्पणाविरलःसंचरतिनलिनीखण्डपरिमलो।दिवसस्यचेयमतिकष्टावस्थावर्तते।तथाहि।
रविरम्बरमध्यातवर्तीस्फुरन्तमातपमनवरतमनलधूलिनिकरमिवविकिरतिकरैरधिकामुपजनयतितृषम्।आतपस्पर्शसंतप्तपांशुपटलदुर्गमाभूमिः।अतिप्रबलपिपासासहनावसन्नानि
गात्राणिप्रभवन्तिनमेनात्मनः।असमर्थोऽस्मिप्रभुःस्वयंनागन्तुम्।आत्मनःसीदतिमेहृदयम्।अन्धकारतामुपयातिचक्षुः।अपिनामविधिरनिच्छतोऽपिमेमरणमद्यैवोपपादयेत्।इतिचिन्तयत्येवमयितस्मात्सर
सोनातिदूरवर्तिनितपोवनेजाबालिर्नाममहातपामुनिःप्रतिवसति।तत्तनयश्चहारीतनामामुनिकुमारकःसनत्कुमारइवविद्यावदातचेताःसमानवयोभिरपरैस्तपोधनकुमारैरनुगम्यमा
नःस्नानोपस्पर्शनार्थंतेनैवपथाहूतीयंदस्वभगवानिविभावसुरितितेजस्वितयादुर्निरीक्ष्यमूर्तिरुद्यन्निवदिवसकरमण्डलादुत्कीर्णमूर्तिस्तडिद्भिरिवविरचितावयवस्सकनकद्रवेणेवघटितरूपःपालितमूर्तिरायै
ऽरुणलोचनौदेहप्रभयास्फुरन्मासबालातपमिवदिवसंसदावानलमिवदवनमुपदर्शयन्नंसलोहलोहिनीनामनेकतीर्थाभिषेकपवित्रानांमंसस्थलावलम्बिनीनांजटानांनिकरेणो

कारं पैतःस्कंधसितशिखाकलापः धांश्ववनदिपत्पांकृतकपटवद्वेबंधद्भगवान्पावकः तपोवनदेवतानूपुरानुकारिणा धर्मशासनकटकेनेव स्फाटिकेनाक्षवलयेन दक्षिणश्रवणावल
१५ म्बिना विराजमानः सकलविषयोपभोगनिरस्तार्थमुपपादितेन ललाटे त्रिसत्येनेव भस्मत्रिपुंड्रकेनालंकृतो गगनोन्मुखचलाकारिण्या स्वर्गमार्गमिव दर्शयता सततमुद्विग्ने
स्फाटिककमंडलुनाध्यासितवामकरतलः स्कंधदेशावलम्बिना कृष्णाजिनेन नीलपीतभासा तपस्तृष्णया निपीतेनोन्नतरूपगच्छता धूमपटलेनेव परीतमूर्तिः अभिनवबिससूत्रनिर्मितेने
परिलघुतया पवनलोलेन निर्मांसविरलपार्श्वपञ्जरमिव गणयता वामांसावलम्बिनोपवीतेनोद्भासमानो देवतार्चनार्थमागृहीतवनलताकुसुमपूर्णपर्णपुटस्नना
पारिप्लवदेशोणीघाटदंडेन व्यायतसव्येतरपाणिर्विषाणोत्खातानां मुद्वहतो स्नानमृदमुपजातपरिचयेन नीवारमुष्टिसंवर्द्धितेन कुशकुसुमलतोपास्यमानलोलदृष्टिना तपोवन
मृगेणानुगम्यमानो विटपद्ववकोमलवल्कलावृतशरीरो गिरिरिव सभस्मचलो शङ्कर इवोसहुरास्वादितसोमः पद्मनिकर इव दिवसकरमरीचिपायी नदीतट इव सततजलक्षा
लनाविरलजटः करिकलभ इव विकचकुमुददलशकलसितदशनो दुर्योधन इव शकुनानुगतो नक्षत्रराशिरिव चित्रमृगाकृतिकाश्लेषोपशोभितो ग्रीष्मकालदिवसदृव स्नपितदोषो
जलधरसमय इव प्रशमितरजःप्रसरो वरुणदव इव कृतोदवासो हरिरिवोपनीतनरकभयः प्रदोषारम्भ इव संध्यापिङ्गलतारकः प्रभातसमय इव बालाजपकपिलो रविरथ इव दृ
महादेवः ढनियमिताक्षचक्रः सुराजेव निगूढमंत्रसाधनः स्थापितविग्रहो जलधिरिव कमंडलुशंखमंडलावर्तगर्तो भगीरथ इव देवगंगावतारो मधुकर इव सहदनुभूतपुष्करवनावासो वनच
रोपि कृतमहालयप्रवेशो असंयतोपि मोक्षार्थी सामप्रयोगपरोपि सततावलम्बितदंडः सुप्तोपि प्रबुद्धः सन्निहितनेत्रद्वयोपि परित्यक्तवामलोचनः तदेव कमलसरः सिस्नासुरूपा
गमत्। प्रायेणाकारणमित्राण्यतिकरुणार्द्राणि सतां खलु भवन्ति सदा चेतांसि। यतः समांतदवस्थं मामालोक्य समुपजातदयः समीपवर्तिनमेकं मुनिकुमारकमन्यतममब्रवीत्। अ

नेमिन्दुमंडलादिव प्रस्यन्दितं सुतमिव मुक्ताफलनिकरमत्यच्छतया स्पर्शनानुमेयं हिमजडमरविन्दकोषरजःकषायमम्भः कमलिनीपत्रसम्पुटेनान्यग्रोद्धृतोच्चैर्धौतपङ्कनिर्मलांश्च मृणालि
काः समुपाहरत्। आपीतसलिलश्च शबरसेनापतिः स्नातांश्च नालिकाः प्राशिकवीरद्वैसेंहिकेपः क्रमेणाद्वपात्। अपगतश्रमश्चोत्थाय यथास्थितानुसारसकलेन शबरसैन्येनानुगम्यमानः श
नैः शनैरभिमतां दिशमयासीत्। एकतरश्च जरच्छबरस्तस्मात्पुलिन्दवृन्दादनासादितहरिणपिशितः पिशिताशनमिवातिविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यल
म्बत। अन्तर्हिते च तस्मिन् शबरसेनापतौ स जीर्णशबरः पिबन्निवास्माकमायूंषि रुधिरबिन्दुपाटलया कपिलभ्रूलतापरिवेषभीषणया दृष्ट्या गणयन्निव शुककुलकुलायस्थानानि श्येन
इव विहगामिषास्वादलालसः सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत्। उत्क्रान्तमिव तस्मिन् क्षणे तदालोकनभीतानां शुककुलानामसुभिः। किमिव हि दुष्करमकरुणानाम्। यतः स मने
कतालतुङ्गमभ्रंकषशाखाशिखरमपि सोपानैरिवायत्नेन पादपमधिरुह्य जातानुपजातोत्पतनप्राक्रीन् कांश्चिदल्पदिवसजातान् गर्भच्छविपाटलान् शाल्मलीकुसुमशङ्कामुपजन
यतः कांश्चिदुद्भिद्यमानपक्षतया नलिनीसंवर्तिकानुकारिणः कांश्चिदर्कफलसदृशान् कांश्चिल्लोहितायमानचञ्चुकोटीन् ईषद्विघटितदलपुटपाटलमुखानां कमलमुकुलानां श्रियमुद्वहतः नी५
कांश्चिदनवरतशिरःकम्पव्याजेन निवारयत इव प्रतीकारासमर्थानेकैकशः फलानीव तस्य वनस्पतेः शाखासंधिभ्यः कोटरान्तरेभ्यश्च शुकशावकानग्रहीत्। अपगतासूंश्च कृत्वा क्षितावपा
तयत्। तातस्तु तं महान्तमकाण्ड एव प्राणहरमप्रतीकारमुपप्लवमुपनतमवलोक्य द्विगुणतरोपजातवेपथुर्मरणभयादुद्भ्रान्ततरलतारकां विषादशून्यामश्रुजलप्लुतां दृशमितस्ततो दि
क्षु विक्षिपन्नुच्छुष्कतालुरात्मप्रतीकाराक्षमः संत्राससंस्रस्तसंधिशिथिलेन पक्षसम्पुटेनाच्छाद्य मां तत्कालोचितं प्रतीकारं मन्यमानः स्नेहपरवशो मद्रक्षाकुलः किंकर्तव्यताविमूढः क्रोडभागेन
मामवष्टभ्य तस्थौ। असावपि पापः क्रमेण शाखान्तरैः संचरमाणः कोटरद्वारमागत्य जीर्णासितभुजङ्गभोगभीषणं प्रसार्य विविधवनवराहवसाविस्रगन्धिकरतलमनवरतकोदंडगुणा

श्र

कादं॰ नेवध्यमानस्वर्गमार्गगमनसोपानसेतुभिरिवोपलक्ष्यमाणामासन्नवर्तिनीभिस्तपोधनसम्पर्कादिवापगतकालुष्याभिस्तरङ्गपरम्परासंक्रान्तरविबिम्बपंक्तिभिस्तापसदर्शनागतसप्तर्षि

१५ मालाविगाह्यमानाभिरिवांतिविकचकुमुदवनेम्पच्चिजनमुपासितुमवतीर्णग्रहगणाभिरिवेनिषासरूजीहेभिर्दीर्घिकाभिः परिवृतंमनिलावनमितशिखाभिः प्रणम्यमानमिवंवनल

ताभिरनवरतमुक्तकुसुमैरभ्यर्च्यमानमिवपादपैरांवद्धपल्लवपुराञ्जलिभिरुपास्यमानमिवविविलच्छाभिरनवरतमुक्तकुसुमैरभ्यर्च्यमानमिवपादपैरांवद्धपरपैरुटजाजिरप्रकीर्ण

शुष्कश्यामाकमुपसंगृहीतामलकलवलीलवङ्गकर्कंधुकदलीलकुचचूतनालफलंमध्ययनमुखरवटुजनंमनवरतश्रवणगृहीतवषट्कारवाचालशुककुलमनेकसारिकोद्घुष्यमा

णसुब्रह्मण्यमरण्यकुक्कुटोपभुज्यमानवैश्वदेवबलिपिण्डमासन्नवापीकलहंसकपोतोपभुज्यमाननीवारबलिमेणीनिह्वापल्लवोपलिह्यमानमुनिबालकंमुनिकार्यार्धदग्धसमिसिमा

यमानकुशसमित्कुसुमंमुपरिलग्ननालिकेररसस्निग्धशिलातलंमचिरत्रुसवल्कलरसपाटलभूतलंरक्तचन्दनोपलिप्तमादित्यमण्डलनिहितकरवीरकुसुमोपमितमनतोविक्षिप्तभस्मले

खालंकृतमुनिजनभोजनभूमिभागंशालाग्रशमगकरूयमानिष्काश्यमानप्रवेश्यमानजरद्वन्धतापसैमिभकलभकाद्वेपिभुजायमानैः सरस्वतीभुजलताविगलितैरक्षवलयैरिवं

चित्रितं

प्रणालपाकलैः कंदमाधितमंमचिन्तनार्थमेणकपिविषाणोत्खन्यमानविविधकन्दमूलमम्बुपूर्णपुष्करपुटैर्वनकरिभिरापूर्यमाणविरयालबालकंमपिकुमारकाकृष्यमाणवन

वराहदंष्ट्राजरालरूग्णशालूकमुपजातपरिचयैः कलापिभिः पक्षपुटपवनसंधुक्ष्यमाणमुनिहोमहुताशनंमारब्धामृतचरुचारुगंधंमर्धपक्वपुरोडाशपुण्यपरिमलामोदितंमविच्छि

न्नाज्यधाराहुतिहुतभुग्भंकारमुखरितमुपचर्यमाणातिथिवर्गंपूज्यमानपितृदैवतमर्च्यमानहरिहरपितामहमुद्दिश्यमानश्राद्धकल्पंव्याख्यायमानयज्ञविद्यमालोच्यमानधर्मशा

स्त्रंपठ्यमानविविधपुस्तकंविचार्यमाणसकलशास्त्रार्थमारभ्यमाणपर्णशालमुपलिप्यमानाजिरमुपमृज्यमानोटजाभ्यन्तरमावध्यमानध्यानंसाध्यमानमंत्रमभ्यस्यमान

परंपरा॰ एवणपुत्र:चित्रितद: तद्दिरा रजार

अरण्यो॰ योगमुपक्षिप्यमाणवनदेवतावलिंनिर्वर्त्यमानमुञ्जमेखलंमप्रक्षाल्यमानवल्कलमुपसंगृह्यमाणसमिधंसंस्क्रियमाणकृष्णाजिनंगृह्यमाणगवेधुकंशोष्यमाणपुष्करबीजंग्र

पूमा॰ थ्यमानाक्षमालंन्यस्यमानत्रिदण्डकमापूर्यमाणकमण्डलुमदृष्टपूर्वंकलिकालस्यासंस्थानंमनृतस्याश्रुतपूर्वंमनङ्गस्याञ्जयोनिमिवत्रिभुवनवंदितमसुरारातिमिववकरितवराहनरसिंह

रूपंसांख्यमिवकपिलाधिष्ठितंमथुरोपकण्ठमिवबलावलीढदर्पितधेनुकंमुदयनमिववानन्दितवत्सकुलंकिंपुरुषाधिराज्यमिवमुनिजनगृहीतजलकलशाभिषिच्यमानद्रुमंनिदाघसमया

तट: वसानमिवप्रत्यासन्नजलप्रपातंजलधरसमयमिवववनगहनमध्यसुखप्रसुप्तमहारिमानिलस्फुरितमिवशिलापाकलप्रहारसंचूर्णिताच्छास्थिसंचयंखाण्डवविनाशोद्यतार्जुनमिवप्रारब्धाग्नि

भोजनं कार्यंसुरभिविलेपनधरमपिसततविभूतहव्यधूपगंधमातङ्गकुलाध्यासितमपिपवित्रमुच्छ्रितधूमकेतुमपिप्रशान्तोपद्रवंपरिपूर्णद्विजपतिसनाथमपिसदासन्निहिततरु

गहनान्धकारमतिरमणीयंमपरमिवब्रह्मलोकमाश्रममपश्यं।यत्रचहविर्धूममलिनतानचरितेषु मुखरागः शुकेषु नकोपेषु तीक्ष्णताकुशाग्रेषु नस्वभावेषु चंचलताकदली

दलेषु नमनःसु चक्षूरागः कोकिलेषु नपरकलत्रेषु कंठग्रहः कमण्डलुषु नसुरतेषु मेखलाबंधोव्रतेषु नैर्ष्याकलहेषु स्तनस्पर्शोहोमधेनुषु नवनितासु पक्षपातः कृकवाकुषु नविद्याविवादे

भ्रान्तिरनलप्रदक्षिणेषु नशास्त्रेषु वसुसंकीर्तनंदिव्यकथासु नतृष्णासु गणनारुद्राक्षवलयेषु नशरीरेषु मुनिबालनाशः क्रतुदीक्षयानयत्नेपुना रामानुरागोरामायणेनयौवनेन

मुखभंगविकारोजरयानधनमदेनमानेन यत्रचमहाभारतेशकुनिवधः पुराणेवायुप्रलपितंवयः परिणामेद्विजपतनंउपवनचन्दनेषुजाड्यमग्नीनांभूतिमत्त्वंएणकानांगीतव्यस

नं शिखण्डिनांनृत्यपक्षपातः भुजङ्गमानांभोगः कपीनांश्रीफलाभिलाषोमूलानामधोगतिः।तस्यचैवंविधस्यमध्यभागमलंकुर्वाणस्याललक्तकालोहितलोलपल्लवस्यमुनिजनावलम्बि

तरुण्याजिनजलकरकसनाथशाखस्यतापसकन्यकाभिर्मूलभागरचितपीतानकपञ्चाङ्गुलस्यहरिताभिर्मुनिभिः परिपीयमानालवालजलस्यमुनिकुमारकावद्धकुशचीरदाम्नोद्दृश्यतेगो

कादं मयोपलिप्तविविक्तभूतलस्य तत्क्षणारचितकुसुमोपहाररमणीयस्यानातिमहतः। परिमंडलतया विस्तीर्णावकाशस्य रक्ताशोकतरोरधः छायायामुपविष्टमत्युग्रतपोभिर्भुवन
१६ मिव सागरैः कनकगिरिमिव कुलाचलैः क्रतुमिव वैतानवह्निभिः कल्पान्तकालदिवसमिव द्वादशभिरविभिः कालमिव कल्पैः समन्तान्महर्षिभिः परिवृतमुग्रशापभीतयेव कम्पितदेहया प्रण
यिन्येव विहितकेशग्रहया क्रुद्धयेव कृतभ्रूभङ्गया मत्तयेवाकुलितगमनया प्रसाधितयेव प्रकटितनिजकयानरया हीनतयेव भस्मधवलया धवलीकृतविग्रहं मायामिमीमिष्ठपलित
पांडुराभिः तपोभिर्विजित्य मुनिजनेन मारविलयधर्मपताकाभिरिवोर्ध्वार्जिताभिरमरलोकमारोढुं पुण्यरज्जुभिरिवोपसंगृहीताभिर्जिह्वस्पृष्टुस्पर्शनपरारेः कुसुममंजरीभिरिवोद्धृताभिर्ज
टाभिरुपशोभमानमुपचरितभस्मत्रिपुंड्रकेण तिर्यक्प्रवृत्तगंगास्रोतस्त्रयेणेव हिमगिरिशिलातलेनेव ललाटपट्टेनोपेतमधोमुखचन्द्रकलाकाराभ्यामवलम्बितवलिशिथिलाभ्यां भ्रू
तनोत्पतनजनितविषममुखरवैः प्रचलद्भिः खुरपुटैर्जर्जरितवसुंधरैर्मुरजवाद्यमिवाभ्यसंतमुत्कीर्णमिव जंघासु विस्तारितमिवोरसि घटितमिव मुखे प्रसारितमिव कंधरायामुल्लिखितमिव पा

र्श्वयोर्द्विगुणीकृतमिवोरुदेशे जवप्रतिपक्षमिव गरुत्मतस्त्रैलोक्यसंचरणसहायमिव मारुतस्यांशावतारमिवोच्चैःश्रवसो वेगसब्रह्मचारिणमिव मनसो हरिचरणमिव सकलवसुंधरोल्लंघन

क्षमं कुमुदगहनानां मिव मानैः सप्रचारैः मधुमासमिव विकसिताशोकपाटलं व्रतिनमिव भस्मधवलपुंड्रकांकितमुखं कमलवनमिव मधुपदह्नि पिञ्जरकेसरं ग्रीष्मदिवसमिव महायाममुपेतं भुजंगम

मिव सरागत्यभिमुखं मुदधिपुलिनमिव शंखमालाभरणं भीतमिव स्तब्धकर्णं विद्याधरराज्यमिव चक्रवर्तिनरवाहनोचितं सूर्योदयमिव सकलभुवनाश्चर्यमश्वातिशयमिन्द्रायुधमद्राक्षीत्। दृष्ट्वा च

तमरद्यपर्वममानुषलोकोचिताकारमखिलत्रिभुवनराज्योचितमशेषलक्षणोपपन्नमश्वरूपातिशयमतिधीरप्रकृतेरपि चन्द्रापीडस्य तस्योपसर्पणीये विस्मयो हृदयमासीच्चास्य मनसि सरभसवि

कामन २

मानसवत्पक्षे २ गह्वर ३ कुबेरः एधाम्रूपव २ परिवर्तन १

कादं वर्तनचलितवासुकिभ्रमितमन्दरेणमथ्यमानाज्जलनिधिजलमिदमप्युद्धृतमनुद्धरताएवंकिंनामरत्नमुद्धृतंसुरासुरलोकेवरंनारोहिताचमेरुशिलातलविशालमस्यवक्षःस्थलमारूढं लेनकिमासादितंत्रैलोक्यराज्यफलमुखैः

३९ प्रबलाविस्मितस्त्रीर्दयोवंचितः खलुजलधिनाशतमखः मन्येचभगवतोनारायणस्यनयनयथामियताकालेननायमुपगतोयेननाधापितांगरुडारोहणव्यसनितां परित्यजतिअहोखल्वतिशयितत्रिदशराज्यसमृद्धि

रियंतातस्यराज्यलक्ष्मीः यदेवंविधान्यपिसकलत्रिभुवनदुर्लभानिरत्नान्युपकरणतामायान्तितेजस्वितयामहाप्राणतयाचसर्वदेवानेवेयमस्याकृतिः यस्यपमारोहणेशक्तामिवमेजनयतिनहिसामान्यवा

सिजिनाममानुषलोकोचिताः सकलत्रिभुवनविस्मयजननपरेदृश्यतेअभवंत्याकृतयः देवतान्यपिहिमुनिजनशापवशात्कृतनिजशरीरपरित्यागान्यवतीर्णानिवनोपनीतानिशरीराण्यध्यासते। एवंचश्रूयते

पुराकिलस्थूलशिरानाममहातपामुनिरखिलत्रिभुवनललामभूतामप्सरसंरंभाभिधानांशशाप। साकिलश्लोकमयमहायापवन्तरयेनिवेशमात्मानमप्यनरदयेतिविख्यातावडवाभूत्वामुनिका नागरी

वत्यांप्रजाधन्वानंराजानमुपसेवमानामर्त्यलोकेमहान्तंकालमुवास॥ अन्येचमहात्मानोमुनिगणपरिश्यीतप्रभावानानाकारीभूत्वावभ्रमुरिमंलोकं संपायमनेनापिगणपभाजाभवितव्यं

महाभुजाकेनापि॰ आवेदयत्येवमनाक्षरणामसारदिव्यतामित्येवंचिन्तयन्नेवारुरुक्षुरासनादुदतिष्ठत। मनसाचतंतुरंगमम्मुपसृत्यमहात्मन्सर्वथायोसिसोसिनमोस्तुतेमर्षणीयोयमारोहणातिक्रमोस्मा सोरयः

कमपरिज्ञातानिदेवतान्यपिअनुचितपरिभवभाञ्जिभवंतीत्यामंत्रयांबभूव। विदिताभिप्रायइवतमिन्द्रायुधःस्फुटललितशिरःकेसरस्फाहुतिकृष्टकुञ्जिकेनकरतारकेणतिर्यक्सुखाविलोकामुहुर्मुहुर्लापयताचि

तितलमुत्खातधूलिधूसरितक्रोडरोमराजिनादक्षिणखुरेणारोहणायाह्वयन्निवस्फुरितघ्राणविवरघर्घरध्वनिमिश्रमधुरमर्पूषहुंकारपरम्परानुबद्धमतिमनोहरंहेषारवमकरोत्। अथतेनम

धुरहेषितेनदत्तारोहणाभ्यनुज्ञइवेन्द्रायुधमारुरोहचन्द्रापीडः॥ समारुह्यचतंप्रादेशमात्रमिवाखिलंत्रैलोक्यंमन्यमानोनिर्गम्यप्रलयजलधरविमुक्तोपलासारपरुषेणजर्जरयन्निवश्रवणमति

निष्ठुरेणखुरपुटनादेनखुररजोनिरुद्धघ्राणविवरघोरघोषेणाहेषितेनवधिरीकृतसकलभुवनविवरमशिशिरकिरणदीधितिपरामर्शस्फुरितविमलफेनलवकेनोद्धीकृतेनकुन्तलतावनेनो

प्रार्थना८ संकुचित८ अर्कागेर२ अग्रभागेन१ प्राप्तः१ समूहेन१

कौशलं१ क्रा

पिषुसर्वदेशभाषासुसर्वसंज्ञासुसर्वशिल्पेषुछंदःसुअन्येष्वपिकलाविशेषेषुपरंकौशलमवाप। सहजोवांस्यश्रमंमभ्यस्यतोवृकोदरस्येवशैशवएवाविर्भूतसर्वलोकविस्मयजननीमहाप्राणता। यदृच्छ

याक्रीडतोपिपतितैनैनकरतलाकुञ्चितकर्णपल्लवावनताः सिंहकिशोरकाक्रम्याक्रान्तास्तइवगजकलभकामनश्चलितुमपिनशेकुः। एकेकेनकृपाणप्रहारेणतालद्रुमपंक्तीलतानालमिवमृणालदंडानिवेलुलाव

सकलराजन्यवंशपावनरावानलस्यपरशुरामस्येवचनाराचाः शिखरशिलाभिदोबभूवुः दशपुरुषसंवाह्नयोग्येनचायोदंडेनश्रममकरोत्। ऋतेचमहाप्राणतायाः सर्वाभिरन्याभिर्विद्याभिःकला

भिरनुचकारतंवैशम्पायनः। चंद्रापीडस्यतुसकलकलाकलापपरिचयबहुमानेनशुकनासगौरवेणसहपांसुक्रीडनतयासहसंवर्धनतयाचसर्वविस्रंभस्थानंद्वितीयमिवहृदयंसचवैशम्पायनः

परंमित्रमासीत्। निमिषमपितेनविनैकाकीस्थातुंनशशाक। वैशम्पायनोपितंमुहूर्तमपिदिवसकरमिवदिवसोनुगच्छन्क्षणमपिनविरहयांचकार। एवंसर्वविद्यापरिचयमाचरतश्चन्द्रापीडस्यत्रिभुवन

विलोभनीयोमन्मथरससंदेहसागरस्यसकललोकहृदयनयनानंदजननः चंद्रोदयइवप्रदोषस्यबहुविधरागविकारभंगुरः सुरधनुःकलापइवजलधरसमयस्यमकरध्वजस्यायुधभृतः कु सुंदर

सुमप्रसवइवकल्पपादपस्याभिनवोदियमानरागरमणीयः सूर्योदयइवकमलवनस्यविविधविलासयोग्यः कलापइवशिखंडिनोयौवनारंभः प्रादुर्भवन्रमणीयस्याप्यतिगुणतरांरमणीयतांपुपो प्रसारण

ष। लब्धावसरोमिभवकैरवनिकरवर्तीविभ्रमाणांसममन्मथः। लक्ष्म्यासहविस्तारंवक्षःस्थलं। श्रीकजनमनोरथैःसहापूर्यन्तोरुदंडद्वयं। अरिजनेनसहतनिमानमाजगाममध्यदेशः। त्यागेनसहप्रथि

मानतानितंबभागः। प्रतापेनसहानुरोहरोमराजिः। अहितजनकलत्रालककलताभिःसहप्रलंबतामुपययौभुजयुगलं। चरितेनसहधवलतामभजतलोचनयुगलं। मांत्र्यासेहगुरुर्वभूवउरस्थलमरिखदेशः

स्वरेणसहगंभीरतांजगाममतरस्यं। एवंचक्रमेणसमारूढयौवनारंभंपरिसमाप्तसकलकलाकलापविज्ञानमधीताशेषविद्यंचावगम्यानुमोदितमाचार्येश्चन्द्रापीडमानेतुंराजाबलाधिकृतंबलाहकनामा विसंप मन

नमाहूयबहुतुरगपदातिबलपरिवृतमतिप्रशस्तेहनिप्राहिणोत्। सतंमंगलविद्याग्रहंद्वास्थैःसमावेदितःप्रविश्यचक्षितितलचुम्बिचूडामणिनाशिरसाप्रणम्यस्वसंभ्रममिसमुचितेराजसमीपएवस

अने

का·दं· हूमकरतलगतदर्पणाः स्फुरितरत्ननिकरमंडलाद्रवपौर्णमासीरजन्यः काश्चिदार्द्रालक्तकरसपाटलितचरणपुटाः कमलपरिगीतवालातपाइवनलिन्यः काश्चित्ससंभ्रमगतिगलितमे
खलालापाकुलितचरणाकिशलयाः श्रृंखलासंदानमंदसंचारिण्यइवकरिण्यः काश्चिज्जलधरदिवसश्रियइवेन्द्रायुधरागरुचिराम्बरधारिण्यः काश्चिद्धूसितधवलनखमयूख
३१ अग्रभागप्रहिलवानूपुररवाकृष्टकलहंसकानिव चरणपुटानुद्वहन्त्यः काश्चित्करतलस्थितस्थूलमुक्ताहारयष्टयो रतिमिव मदनविनाशशोकगृहीतस्फटिकाक्षवलयां विडम्बयन्त्यः काश्चि
त्पयोधरान्तरालगलितमुक्तालतास्तनुविमलस्रोतोजलद्वलाञ्जितचक्रवाकमिथुनाइवसरितः काश्चिन्नूपुरमणिकिरणसंमुत्थितेन्द्रायुधतया प्रावृषानुगतगृहमयूरिकाइव वि
राजन्यः काश्चिदधरपीतोज्झितमणिचषकाः स्फुरितरागैर्मधुरसमिवाधरपल्लवैः स्रवन्त्यो हर्म्यतलानि ललनाः समारुरुहुः। अन्याश्च मरकतवातायनविवरविनिर्गतमुखमंडलावि
कचकमलकोशपुटामम्बरतलसंचारिणीं कमलिनीं दर्शयन्त्योऽदृशुः। उदपादि च सहसा ससंभ्रमसंचलनजन्मा प्रचुरचारणमधुकरसारणास्फालितवीणारवकोलाहलबहलो रसनारवा
संपुत्र कूलितमहंसारसरसितसंभिन्नस्फुरितचरणतलताडितसोपानजातगंभीरध्वनिप्रहृष्टगृहमयूरोद्भासिशिखण्डिनां केकारवैरनुगम्यमानो नवजलधररवपवकितकलहंसकुलकोलाहलको
मलोन्मकरध्वजविजयघोषणानुकारी परस्परसंक्षिद्दनादणितताररहारमणीनां रमणीनां श्रोत्रहारी हर्म्यकुक्षिषु प्रतिरवनिर्हादी भूषणानां निनादः। मुहूर्तादिव युवतिजननिर
न्तरतया नारीमयाइव प्रासादाः सालक्तकपदकमलविन्यासैः पल्लवमयमिव क्षितितलमंगनांगप्रभाप्रवाहेण लावण्यमयमिव नगरं ञ्जाननमंडलनिवहेन चंद्रबिम्बमयमिव गगनतलं। आ
तपनिवारणाद्योतितकरतलजालकेन कमलवनमयमिव दिक्चक्रवालमाभरणांशुकलापेनेन्द्रायुधमयइवातपो लोचनमयूखलेखासंतानेन नीलोत्पलमयइव दिवसो बभूव। कौतुकप्रसारितनि
श्चललोचनानां च पश्यन्तीनां तासामादर्शमयानीव स्फटिकमयानीव हृदयानि विवेश चन्द्रापीडः। क्रमेण चाविर्भूतमदनरसानां च तासामन्योन्यतः सपरिहासाः साविभ्रमाः ससंभ्रमाः सेर्ष्याः सोत्प्रासाः सासूयाः स
सोपालंभाः

तुला· कोटिविशेष

विलासाः समन्मथाः सस्पृहाश्च तत्क्षणमतिरमणीयाः प्रससुरालापाः। तथाहि त्वरितगमनेमामपि प्रतिपालय दर्शनोन्मत्ते गृहाणोत्तरीयं मुग्धे समुच्छ्वासयालकलतामानत्रावलंबिनीमूढे चन्द्रलेखामु
पाहर स्खलत्पहारकुसुमस्खलितचरणापतसि मदांधे संयमय मदनिश्चेतने केशकलापमुत्क्षिप चन्द्रापीडदर्शनव्यसनिनि काञ्चीदाम समुत्सर्पय वाले कपोलदोलायितं कर्णपल्लवमरदृश्ये निपतति दंत
पत्रं गृहाण यौवनोन्मत्ते वलोकाश्रेज्जने नस्थगय पयोधरभारमंशुकपातलज्जाशिथिलीभूतमाकलय दुकूलं मलीकमुग्धे द्रुततरमागम्यतां कुतूहलिनि निरीहि मे दर्शनान्तरमसंतुष्टेकिपदालोक
सेतरलहृदये परिजनमवेक्षस्व पिशाचिके विगलितोत्तरीयांशुकाहस्यसे जनेनान्धनयनेन पश्यसि सखीजनं मनेकभंगिपूर्णे दुःखमकारणापासितत्वद्याजीवसि मिथ्याविनीते किं व्य
परेक्षावीक्षितैर्विस्रब्धमालोकय यौवनशालिनि किं पीडयसि पयोधरभारेणातिकोपने पुरतो भवमत्सरिणि किमेकाकिनी रुणात्सि वातायनं मनङ्गपरवशे मदीयमुत्तरीयांशुकमुत्तरीयतां नयसि
रागासवमत्ते निवारयात्मानमुन्मिषितधैर्ये किं धावसि गुरुजनसमक्षमुद्धतसत्त्वभावे किमेवमाकुलीभवसि मुग्धे निगूहस्व मदनज्वरमुलकजालं मसाधारणे किमुन्नाम्यसि विबुधविकारैर्विविधा
ङ्गभङ्गवलनायासितमध्यभागास्थासि घर्मेभूमात्हृदये स्वभवनान्निर्गतमपि नात्मानमवगच्छसि कौतुकाविष्टे विस्मृतासि निश्वसितुमन्तः संकल्परचितरतसमागमसुखरसनिमीलितेस
मुन्मीलयलोचनयुगलमनिज्ञा मत्पयमनङ्गशरप्रहारमूर्छिते शशिकिरणनिवारणाय कुरु शिरसि उत्तरीयांशुकपल्लवमपि पतिव्रताव्रतग्रहगृहीते दृष्टव्यमपश्यन्ती वंचयसि लोचनयुग
55 लं हतासि अधमे मुषितासि परमनुषदर्शनपरिहारव्रतेन प्रसीदोत्तिष्ठ सखि यस्य रतिविरहितं सा साविभ्रमं भगवन्तमगृहीतमकरध्वजाङ्कं मकरध्वजं मन्ये मस्पासितातपत्रान्तरेणालिकु
लनीलेशिरसि तिमिरशंकानिपतितद्विशिशिरकरकिरणकलापो मालतीकुसुमशेखरो लक्ष्यते एतदस्य कर्णाभरणमरकतप्रभाश्यामायितमुपरचितविकचशिरीषकुसुमकर्ण
पूरमिव कपोलतलमाभाति। अयमस्य हारान्तर्विभ्रमानुगमणिकिरणकलापछलेन हृदयं विविक्षुरभिनवयौवनरागइव बहिः स्फुरति। एतद्देनेन कवामरकलापान्तरे रितरएव वीक्षि

का॰ उं तंमेतत्किमपिवैशम्पायनेनसहसंमंत्रयतोऽस्यदशनमयूखलेखाधवलीकृतदिक्चक्रवालंहसितमिवोत्सुकपच्छतिहृदितरागेणोन्नतीपांशुकप्रान्तेनबलाहकस्तुरगखुरजन्मानमाल्लधके
प्रोक्षुरेणुमपहस्तयन्ननेनलक्ष्मीकरकमलकोमलतलःसमुत्क्षिप्यतिर्यक्तुरंगमस्कंधेनिक्षिप्तस्तरणापद्रवःसलीलमयमनेनजनानांरूपयावनार्यभुजानिजितलोकदीर्घबाहुःशिरस्त्राणपु
३२ क्षकोशशोभीदिग्गजेनेवत्रोवल्लकवलग्रासवांछयाप्रसारितःकरः।धन्यासायालक्ष्मीरिवनिजकमलंकरतलमिदमस्यवसुंधरासपत्नीग्रहिष्यति।धन्याचदेवीविलासवतीसकलमही
मंडलभारधारणक्षमोदिग्गजइवककुभागर्भेणयथायमूढइत्येवंविधानिचान्यानिचवदंतीनांतासामापीयमानइवलोचनपुटैराहूयमानइवभूषणरवैरनुगम्यमानइवहृदयैर्निबध्यमान
रत्नाभरणरत्नरश्मिरज्जुभिरुपकृष्यमाणइवनवयौवनवलिभिःशिथिलभुजलताविगलितधवलवलयनिकरैःपदेपदेविवाहानलइवकुसुममिश्रैर्लाजाञ्जलिभिर
वकीर्यमाणश्चंद्रापीडोराजकुलसमीपमाससाद।क्रमेणचयामावस्थिताभिरनवरतकरटस्थलगलितमदमषीपंकधाराभिरंजनगिरिमालामलिनाभिःकुञ्जरघटाभिरंधकारितदिङ्मुखतयाजल
धरदिवसायमानमुद्दंडधवलातपत्रसहस्रसंकटमनेकद्वीपान्तरागतनृपशतसमाकुलंराजद्वारमासाद्यतुरंगमादवततार।अवतीर्यचकरतलेनवैशम्पायनमवलम्ब्यपुरःसविनयंप्रस्थितेनवला
हकेनोपदिश्यमानमार्गःत्रिभुवनमिवपुञ्जीभूतमाग्रहीतकनकवेत्रलतैःसितवारबाणधारिभिःसिताङ्गरागैःसितकुसुमशेखरैःसितोष्णीषैःसितवेषपरिग्रहतयाश्वेतद्वीपसंभवैरिवकञ्चुकिपुरुषै वर्म्म
रिवातिप्रमाणैर्दिवानिशमालिखितैरिवोत्कीर्णैरिवतोरणस्तंभनिषण्णैर्द्वारपालैरनुज्झितद्वारदेशमनेकसंयमनचन्द्रशालिकाविटंकवेदिकासंकटशिखरैरभ्रंकषैरपहसितकैलासशिखरशोभैरम
लसुधावदातैःसप्राकारैरिवमहाप्रासादैरनेकवातायनविनिर्गतयुवतीजनभूषणकिरणसहस्रतयाकनकमयमिवजालकेनेवविराजमानंरचितेनवितानेनविराजमानैर्मन्दिरोत्सङ्गधनिवहाभि
राशीविषसंकुलाभिःपातालगुहाभिरिवातिगंभीराभिरायुधशालाभिरुपेतमबलाचरणालक्तकसरक्तमणिशिलैःशिखरनिलीनशिखिकुलकलकलैःक्रीडापर्वतकैरुपशोभि

चतुःस्याल शिरोग्रह३

सुरदः२ स्तिन४ मिश्रित१

न्नालनीलोत्पलकलिकाकाननशङ्कनेसरङ्गंगाजलतलंपल्लवैर्वर्णोमुदंडैर्मायूरातपत्रसहस्रांधकारिताविदिङ्मुखतयास्फुरितरागमन्मथचापकलापकैश्माशमिवजैर्लधरविम्बंमुद्गतफेनपुंजधवलित
मुखतयांनवरतवलीनचतुलतपार्थंप्रलयसागरजलकल्लोलसंघातमिवसमुन्नतमहर्षपर्यन्तंप्रमेयोमम्भसैन्यमपश्यत।तच्चसागरजलमिवचन्द्रोदयेनचन्द्रापीडनिर्गमेनसकलमेवसंचचालाक्षीयं
महभिकपोर्चप्रणामलालसाःसरभसमपनीतातपत्रभूम्याशिरसःपरस्परोत्पीडनकुपितनुरङ्गनिवारणायासितान्संराजपुत्राःपर्यवारयन्नेकैकशोऽभिप्रतिनामग्रहणमावेद्यमानंवलाहकेनप्रचलितमुकु
टमणिरागकिरणेङ्गमणिमण्डलेनानुरागमिवोद्वहद्भिःसंघटितसेवाञ्जलिमुकुलनयाधीवराज्याभिषेककलशावैर्निर्मलसलिलग्रकमलैरिवदूरावनतैःशिरोभिःप्रणेमुः।चन्द्रापीडस्तुतान्सर्वान्सम्मान्ययथार्हमन
न्तरमुत्तुरंगमाधिरूढेनानुगम्यमानोवैशम्पायनेनराज्यलक्ष्मीनिवासयोग्यपुण्डरीकाकृतिनासकलाजन्यकुलकुमुदखण्डचन्द्रमंडलेनतुरङ्गसेनासवन्तीपुलिनायमानेनक्षीरोदफेनधवलितवासुकिफणामंड
लछविनास्थूलमुक्ताफलकलापजालकाहतेनोपरिविहितकलंकेसरिणामुद्दहतातिमहताकार्तस्वरदंडेनध्रियमाणेनातपत्रेणानिवारितातपभयतःसमुद्धूयमानचामरकलापपवननर्तितकर्णपल्लवःपुरःप्रधाव
तातरुणवीरपुरुषप्रायेणानेकसहस्रसंख्येनपदातिपरिजनेनजयजयजीवजीवेतिमधुरवचसामंगलप्रायमनवरतमुच्चैःपठताबन्दिजनेनस्तूयमानोनगराभिमुखःप्रतस्थे।क्रमेणचतमासाद्यतविग्रहमन
ङ्गःमिवावतीर्णनगरमनुप्राममालोक्यसर्वएवयशस्विकःसकलव्यापारोजनिकरोऽस्यविबुध्यमानकुमुदवनानुकारीजनोऽभवत्।सर्वेस्मिंसम्प्रतिमुखकलापविन्यस्तचापविरक्ताकृतिःकार्तिकेयोविरम्यपतिकुमारश
त्वमहोवयमतिपुण्यभाजोयैरिमोममानुषीमस्याकृतिमजःसमारूढप्रीतिरसविस्तारितेनकुतूहलोत्तानितेनलोललोचनयुगलेनानिवारितापरपामंतःसफलानोऽद्यजातंजन्मवनाःसर्वथानमोऽस्तुतस्मैन्नारायणायधारिणे
भगवतेचन्द्रापीडरूपेणैवपुण्डरीकेक्षणायमकरकेतवंदर्तितदर्जनाद्विचितप्रणामाञ्जलिर्नगरलोकः।प्रणामाम्।सर्वतश्चसमुद्घाटितकपाटपुटप्रकटवातायनसहस्रतयाचन्द्रापीडदर्शनकुतूहलात्नगरमपिसमुन्मीलितलोचन
मिवहमिवाभवत्नगरंजनपरिसमाप्तसकलविषयविधागद्दाविर्गतोयमागच्छतिचन्द्रापीडइतिसमाकर्ण्यलोकनकुतूहलिन्यःसर्वस्मिन्नेवनगरेसंभ्रममुत्सृष्टार्धपरिसमाप्तप्रसाधनव्यापाराःकामि

स्वर्णेन६

का॰र॰ कज्जनेनास्थानमंडपागतेनचयथासमुचितासनोपविष्टेनप्रश्नाश्यतादुरोदरक्रीडामभ्यस्यताष्टापदक्रीडाव्यापारमास्फालयतापरिवादिनीमालिखताचित्रफलकेभूमिपालप्रतिबिम्बमाव
ध्नताकाव्यगोष्ठीमातन्वतापरिहासकथामभिनन्दताबिंदुमतींचिन्तयताप्रहेलिकांभावयतानरपतिकृतकाव्यसुभाषितानिपठताद्विपदींगृह्णताकविगुणानुत्किरतापत्रभंगानालपतावारवि
३३ लासिनीजनमाकर्णयतावैतालिकगीतिमनेकसहस्रसंख्येनधवलोष्णीषपट्टीस्निग्धविकटकिरीटशिरसासानिर्भरशिखरलग्नज्ञातपमंडलेनेवकुलपर्वतचक्रवालेनमूर्धाभिषिक्तेनसामन्तलो
केनाधिष्ठितैमास्थानोत्थितभूमिपालसंवर्तितानांचकुथानांरत्नास्तरणानांचराजिभिरनेकवर्णैरिन्द्रायुधपुञ्जैरिवविराजितसभापर्यन्तंममलमणिकुट्टिमभूमिसंक्रान्तमुखनिवहप्रतिबिम्बतयाविकच
कमलपुष्पप्रकरमिवसम्पादयतागतिवशरणितनूपुरपरिहार्यहाररसनारवमुखरेणस्कंधावसक्तकनककरंडचामरेणनिर्गच्छताप्रविशताचानवरतंवारविलासिनीजनेनाकुलितमेकदेशनिषण्ण
चामीकरयष्टिखलांसंयतश्वगणामिनस्ततःप्रचरितापरिमितकस्तूरिकामृगपरिमलवासितदिङ्मुखमनेककुब्जवामनकिरातवर्षधरबधिरजडमूकसंकुलमुपाहृतकिन्नरमिथुनमानीतवनमानुषमा
बद्धमेषकुक्कुटकुररकपिञ्जललावकयुद्धमुत्कूजितचकोरकादम्बहारीतकोकिलमालयमानफलकसारिकमभिपतितमदपरिमलामर्षविजृम्भितैर्वनगजैर्मृद्गैःशिखरिणांजीवितैरिवगुहानिवासिभि
र्गृहीतैःपंजरगतैःकेसरिभिरुत्त्रास्यमानैःकाञ्चनभवनप्रभाजनितदावानलशंकैर्लोलताराकैर्भ्रमद्भिर्भवनहरिणकदम्बकैर्लोचनप्रभयापाण्डुरीकृतदिगन्तरैर्मुद्धमकेकारवानुमीयमानमरकतमणि
कुट्टिमस्थितशिखंडिमंडलंमतिशिशिरचंदनविटपिच्छायानिषण्णनिद्रायमाणगृहसारसंमन्तःपुरेणचबालिकाजनप्रस्तुतकंदुकपंचालिकाक्रीडेनाविरतसंवाद्यमानदोलाशिखरक्वणितघंटाझंकारर
रिताशामुखेनभुजंगनिर्मोकपंक्तिमयूरद्रियमाणहारेणसौधशिखरादवतीर्णमवलितपारावतकुलतयास्थलोत्पलिनीवनेनेवशोभितेनान्तःपुरिकाजनप्रस्तुतनरपतिचरितविडम्बनक्रीडेनाध्व
मन्दुरापरिभ्रष्टागतैश्चलुनभवनदाडिमीफलैर्लेशखंडिताकुःशालस्कटकारपञ्जरैरभिभूतकुब्जवामनकिरातकरतलाछिन्नानिभूषणानिविकिरद्भिःकपिभिराकुलीकृतेनपञ्जरकसारिकाप्रकाशितसुरतक्रि

प्रालापलज्जितावरोधजनेनप्रासादसोपानारोहणचलितैश्चलानांचरणपवसक्तैःपदेपदेरणद्भिस्तुलाकोटिवलयैर्मुखरीकृतकूजिताभिर्भवनकलहंसमालाभिर्धवलीकृताजिरेणधौतधवलदुकूलोत्तरी
यैःकलधौतदंडावलम्बिभिःपलितपांडुरमौलिभिर्वयःपरिणामेपिजरत्सिंहैरिवापरित्यक्तसत्त्वावष्टंभैःकंचुकिभिरधिष्ठितेनसमुपेताभ्यन्तरंसजलजलधरसनाथमिवकृष्णागुरुधूपपटलैःसनीहारसमयमिवया
मकुञ्जरघटाकरशीकरैःसनिशामिवतमालवीथिकान्धकारैःसबालातपमिवरक्तांशुकैःसतारागणमिवमुक्ताकलापैःसवर्षासमयमिवधारागृहैःसतडित्कृतमिवहेममयीभिर्मयूरयष्टिभिःसगृहदेवतमिवशा
लभंजिकाभिःशिवभवनमिववृद्धाराजस्थितदंडपाणिप्रतीहारगणमुत्कृष्टकविगद्यमिवविविधवर्णश्रेणीप्रतिपाद्यमानानेकाभिनवार्थसंचयंमत्सरसांगणमिवप्रकटमनोरमारंभंदिवसकरोदयमिवोत्त्रस
त्पद्माकरकमलामोदितंमुमुक्षाकिरणमिवविजितलक्ष्मीकृतमलोपकारंनाटकमिवप्रकटपताकांकंशोणितपुरमिवबाणयोग्यावासोपेतंपुराणमिवयथाभागस्थितसकलभुवनकोशंपूर्णचन्द्रोदयमिवमदुकरस
हस्त्रसंवर्द्धितरत्नाकरंदिग्गजमिवाविच्छिन्नमहादानसंतानंप्रलयएमिवसकलजीवलोकव्यवहारकारकारणंसत्त्वहिरण्यगर्भमीशानबाहुदण्डमिवमहाभोगिमंडलसहस्राध्यासितप्रकोष्ठंमहाभारतमिवा
नजगीताकर्णनानंदितनरेंद्रवृन्दमिवकुलक्रमागतम्भीमपुत्रघोतसकलपरिपालितंव्याकरणमिवप्रथममध्यमोत्तमपुरुषविभक्तिस्थितनिर्देशकारकाख्यातसंप्रदानक्रियाव्ययप्रपंचसुस्थि
तंमुदधिमिवभयान्तःप्रविष्टसपक्षभूभृत्कुलसहस्रंमुधानिरुद्धसमागममिवचित्रलेखादर्शितत्रिभुवनाकारंबलियज्ञमिवपुराणपुरुषवामनाधिष्ठिताभ्यन्तरंशक्रकूपक्षप्रदोषमिवबर्जितशशिकिरणाक
लापयवलाम्बरचितानंनरवाहनदत्तचरितमिवान्तःसंवर्धितप्रियदर्शनराजदारिकागंधर्वदत्तोत्कंठंमहातीर्थमिवसद्योनेकपुरुषप्राप्ताभिषेकफलंप्राग्वंशमिवनानासवपात्रसंकुलंनिशासमयमिवा
नेकनक्षत्रमालालंकृतंप्रभातसमयमिवपर्यस्तिकाग्रगानुमेयमित्रोदयंगांधिकभवनमिवस्नानधूपविलेपनवर्णकोज्ज्वलंतांबूलिकभवनमिवकृतलवलीलवंगैलाकंकोलपत्रसंचयंप्रथमवेश्यासमागममभि
वाविर्भितहृदयाभिप्रायचेष्टाविकारंकामुकजनमिववहुलचाटुसंलापसुभाषितरसास्वादरंजनालप्रावृट्स्वर्तमंडलमिवदीयमानमणिपातसहस्रालंकरणकृतलेख्यपत्रसंचयंधर्मारण्यमिवाशेषजनमनःप्रह्ला

का॰ रत्नं महावनमिव विविधश्वापदद्विजोपभुक्तं रामायणमिव कपिकथासमाकुलं माद्रीकुलमिव नकुलालंकृतं संगीतभवनमिवानेकस्थानावस्थापितमृदंगं रघुकुलमिव भरतगुणानन्दितं ज्योतिषमिव ग्रहणमोक्ष
कलाभागनिपुणं नारदीयमिव बाध्यमानराजधर्मं यंत्रमिव विविधशब्दरसलब्धास्वादं मृदुकाव्यमिवान्यावनिर्जितस्वभावाभिप्रायावेदकं महानदीप्रवाहमिव सर्वदुरितापहं धनमिव नकस्यचिन्नाकांक्षणीयं
३४ संध्यासमयमिव दृश्यमानचंद्रापीडोदयं नारायणवक्षःस्थलमिव श्रीरत्नप्रभाभासितदिगन्तं बलभद्रमिव कादम्बरीरसविशेषवर्णनाकुलमतिं प्रदर्शणमिव प्रासनोपवेशादर्शितभूमंडलं स्कंदमिव शक्ति
श्रीशरपत्रचंचलं कुलाद्रिनाराचाशमिव सर्वदोषजातशंकं वेश्याजनमिवापगतपरलोकभयं अन्त्यजजनमिवागम्यविषयाभिलाषि अगम्यविषयासक्तमपि प्रशंसनीयमनेकभरणामिव कृतकृतसुकृतविचारणानिपु
णं सुचरितमिवादिमध्यावसानकल्याणाकं वासवास्त्रमिव परिस्फुरत्पद्मरागरत्नश्रीक्रियमाणाजिरं दिव्यमुनिगणमिव कलापिसनाथवेदकेतुशोभितं भारतसमरमिव कृतवर्मशिलीमुखचक्रसंभार
भीषणं पातालमिव महाकंचुकिसहस्राधिष्ठितं वर्षपर्वतसमूहमिवान्तःस्थितापरिमाणार्घ्यहेमकूटं महाद्वारमपि दुःप्रवेशं अवंतिविषयगतमपि मागधजनाधिष्ठितं स्फीतमपि भ्रमत्रग्गलोकं राजकुलं वि
वेश। ससंभ्रमोपगतैः कृतप्रणामैर्महाप्रतीहारमंडलैरनुपस्थियमानमार्गः सर्वतः प्रचलितेन च पर्यवकृतावस्थानेन चंद्ररपर्यन्तमौलिशिथिलितचूडामणिमरीचिचुम्बितवसुधातलेन राजलोकेन प्रत्येकशः प्रतीहा
रनिवेद्यमानेन सादरं प्रणम्यमानः पदे पदे बाह्यान्तरविनिर्गताभिः शिवाकुशलाभिरन्तःपुरवृद्धाभिः क्रियमाणावतरणकमंगलो भुवनान्तराणीव विविधप्राणिसहस्रसंकुलानि सप्तकक्षान्तराण्यतिक्रम्याभ्य
न्तरावस्थितं मनवरतपास्तग्रहयामिकानीलकरतलैः करचरणलोचनवर्जं माक्षितलोहजालारतया शरीरैः रक्लानस्तंभैः रिवगजमदपरिमललोभमनिरंतरनिलीनमधुकरपटलजटिलैः कुलक्रमाग
तैरनुरागानन्वितैरनुरक्तैर्महाप्राणतयातिकर्कशतया चरानवेरशीतिमायाकारसंभाव्यमानपराक्रमैः सर्वतः शरीररक्षाधिकारनियुक्तैः पुरुषैः परिवृतमुभयतो वारविलासिनीभिरनवरतमुद्धूयमानधवल
चामरं ममरनदीपुलिनतलशोभिनि। सुरकुञ्जरमिव मंदाकिनीवारिशिशिरं हंसधवले शयनतले निषण्णं संपितरमपश्यत। आलोकपेति च प्रतीहारवचनानन्तरमतिदूरावनतेन चलितचूडामणिना शिरसा कृतप्र

रज्जुनिर्मितभषणं ५ भूषणं ६ गंभीरेण ३ ललाटास्थि २

मितं मुज्ज्वलपट्टकंबलावगुंठितकनकपर्याणाभिः प्रचलचामरकलापचुम्बितबलकर्णपल्लवाभिः कुलयुवतिभिरिवोपानद्दशिक्षाविनयनिभृताभिर्यामकरेणुभिरभ्यूपकण्ठानशालमालानस्तंभनि
षण्णेन वनवनजलधरगर्जितघोषगंभीरैर्मनुगानवीणावेणुस्वरम्यमास्फालितवर्वरिकावर्धरैरनवरतसंगीतमृदंगध्वनिमतिमनोहरं किञ्चिदामीलितलोचनत्रिभागेणावामदशनकोटिनिषण्णहस्तेन नि
श्चलकर्णतालेनाकर्णयतो सलीलमुभयपार्श्वप्रलम्बितवर्णकम्बलतया विंध्यगिरिणेवाभिछन्नधातुविचित्रपक्षसंपुटेनाघोरणगीतानन्तरकृतमंद्रकंठगर्जितेन मदजललवशावलगंडस्थलैरभितश्रवणपुटे
न रजनिकरबिंबचुम्बितसंवृत्तकाम्बुरविरम्बकेन कर्णाजशाललम्बिना काञ्चनमयेन कृतकर्णपूरमिवांकुशेन मुखमुद्वहता मदजलमलिनेन द्वितीयेनेव कर्णचामरेणाकपोलतलदोलायमानेन मधुक
रकुलेनालंकृतयमाणेनात्पुरंतयापूर्वकायस्यातिवामनतया जघनभागस्य पातालतलादिवोत्सृष्टतानि शगसमयेनेव परिस्फुरत्साईचंद्रेन छत्रमालिनेन पारदारंभणेव प्रकटितरुचिरकोमलानुणापुष्करेण
वामनरूपेणेव कृतत्रिपदीविलासेन स्फटिकमणिशिलातटेनेव लग्नसिंहमुखप्रतिमेन प्रसाधितेनेव लोलकर्णपत्रवाहतमुखेन गंधमादननाम्ना गंधहस्तिना सनाथीकृतैकदेशं मुज्ज्वलपट्टकंबलप
रप्रास्तपृष्ठेश्वरसितमधुरबंठिकारवमुखरकंठैर्मंजिष्ठारागलोहितस्कंधकेसरवालपल्लवैर्वनगजरुधिरपाटलसटैरिव केशरिभिः पुरोनिहितयवससाद्रिद्रिरवरोपविघमंदुरायाले रासन्नमंग
लगीतध्वनिदत्तकर्णैरन्तःकपोलधृतमधुररसविलुलितलाजकवलैर्भूमि याल्लव छत्रभैर्मन्नुरागतैस्तुरंगमैरुद्भासितमधिकरणमंडपगतैश्चाग्यैर्विविधैरनुयुवत्रासवनोपविष्टैर्दूर्मनमपेश्विधर्माधि
कारिभिर्महापुरुषैरधिष्ठितमधिगतसकलग्रामनगरस्वेदरस्वर्वटनामभिरेकभवनमिव जगदखिलमालोकयद्भिरशालिखितसकलभुवनव्यापारतयाधर्मराजनगरयाणिकमिव दर्शयद्भिरधिकारस्थानलेखकै
रालिख्यमानपासनसहस्रैरभ्यन्तरावस्थितनरपतिनिर्गमप्रतीक्षणापरेणास्थानेव दूमंडलेन कनकमयार्धचंद्रताराणगणशनशावलेश्वर्मफलकैर्निशासमयमिव दर्शयतास्फुरितनिशितकरवालकरप्र
रोहकरालितातपेनैकप्रवणपुरस्सरितधवलदंतपत्रेणोद्वेवद्भौलिकलापेन धवलचंदनस्थासकखचितभुजेनोरुदंडद्वयेन विविधवस्त्रपरिधानविमुक्तपद्मकेन बद्धासिधेनुकेनान्ध्रद्रविडसिंहलप्रायेण सेव

अलंकृतम ५ सेवनसत्रमालास्पात्स नविंशतिमौक्तिके ५

कादं॰ नेयमाकृतिरीदृशी त्रिभुवनलालनीया क्लेशमतिमहान्तमियंतं कालं लंभिता। कथमसि सोढवानतिदीर्घामिमां गुरुजनयंत्रणां। अहो बालस्यापि सतः कठोरस्येव ते महद्धैर्यं। अहो विगतशिशुजनक्री
डाकौतुकलाघवमर्भकस्यापि ते हृदयं। अहो गुरुजनस्योपरि भक्तिरसाधारणी। सर्वथा यथा पितुः प्रसादात्समस्ताभिरुपेतो विद्याभिरालोकितोसि एवमचिरेणैव कालेनानुरूपाभिर्वधूभिरुपेतमालोकयिष्यामी
३५ त्यभिधाय सलज्जास्मितावनतमास्यं मुखप्रतिबिम्बगर्भे विकचकमलकृतकर्णापूरच्छायावतंसं स्वकपोले पर्यचुम्बदेनं। एवं च तत्रापि नातिचिरमिव स्थित्वा क्रमेण सर्वान्तःपुराणि दर्शनेनानन्दयामा
स। निर्गम्य राजकुलद्वारावस्थितमिंद्रायुधमारुह्य तथैव तेन राजपुत्रलोकेनानुगम्यमानः शुकनासं द्रष्टुमयासीत्। यामावस्थितविविधगजघटासंकटमनेकतुरगसहस्रसंबाधमपरिमितजनस
मूहसम्मर्दसंकुलमेकदेशोपविष्टैः सहस्रशोनिबद्धचक्रवालैरनेककार्यागतैर्दर्शनोत्सुकैः समंततो विविधशास्त्रज्ञैर्जनैरुन्मीलितलोचनैश्चीवरस्कन्धनाविनयानुरागिभिर्धर्मपरैः शिवागमुंडिभिः शाक्यशासन
पथधौरेयैरकपटैर्भिक्षुभिः याज्ञुपतैर्द्विजैश्च दिवानिशमासेव्यमानमभ्यंतरसेवाप्रविष्टानां च सामंतानां जवनोपविष्टपुरुषोत्संगावस्थितद्विगुणकृपाभिरतिचिरावस्थितिनिर्वेदप्रसुप्ताधोरणाभिश्च पर्याणाभिः
सपर्याणाभिश्चानिश्चलावस्थानमभ्यूयसरायिताभिः पातशः करिणीभिराकीर्णसुधाधवलनामभगृहद्वारमासाद्य सत्वरप्रधावितैर्द्वारदेशावस्थितैः प्रतीहारपुरुषैरनिवार्यमाणोपि राजकुलवद्राजपुत्रो वाह्यांग
ण एव तुरगादवततार। द्वारदेशावस्थित तुरंगमश्च वैशम्पायनमवलम्ब्य पुरःप्रधावितैः समुत्सारितपरिजनैस्तथैव प्रतीहारमंडलेनुपदिश्यमानमार्गस्तथैव चलितमुकुटकोटिभिर्नरेंद्रवृंदैः सेवासमवस्थि
तैरुत्थायोत्थाय प्रणम्यमानस्तथैव प्रचंडप्रतीहारहुंकारभयमूकीभवत्परिजनानि प्रचलितवेत्रलताचकितसामंतचक्रचरणाघातदलितवसुंधराणि कक्षान्तराणि निःसरमाणस्तथैव नवसुधावदातप्रासाद
सहस्रानिरन्तरं द्वितीयमिव राजकुलं शुकनासभवनं विवेश। प्रविश्य चानेकसहस्रनरेन्द्रमध्योपविष्टमपरमिव पितरमुपदर्शितविनयो दूरादवनतेन मौलिना शुकनासं ववन्दे। तं शुकनासः ससंभ्रममुत्थायानुप
र्येणोत्थितराजलोकः सादरमभिमुखदत्ताविरलपदः प्रहर्षविस्फारितलोचनागतानंदजलकणः सहवैशम्पायनेन प्रेम्णा गाढमालिलिंग। आलिंगितोन्मुक्तश्च सादरमुपनीतमपहाय परमासनमवना

वेव राजपुत्रः समुपाविशत्। अनन्तरं च वैशम्पायनः समुपविष्टे च राजपुत्रे शुकनासवर्जमन्यदखिलमवनिपालचक्रमुज्झितनिजासनमवनितलमभजत। स्थित्वा तूष्णीं क्षणमिव शुकनासः समुद्गतप्री
तिपुलकैः शरीरावेद्यमानहृदयहर्षप्रकर्षमब्रवीत्। तात चंद्रापीड अद्य खलु देवस्य तारापीडस्य समस्तमविघ्नमुपारूढयौवनमालोक्य सुचिराद्भुवनराज्यफलप्रीतिर्जाता। अद्य सम्यक् सर्वा गुरुजना
शिषः फलितमनेकजन्मान्तरोपात्तमवदातं कर्माद्य प्रसन्नाः कुलदेवताः नास्य पुण्यभाजो भवादृशाः सकलभुवनविस्मयहेतवः पुत्रतां प्रतिपद्यंते। क्व वयः क्व चेयममानुषी शक्तिः क्व चेदमशेषविद्या
ग्रहणसामर्थ्यं अहो धन्याः प्रजा यासां भरतभगीरथप्रतिमो भवानुत्पन्नः पालयिता। किं खलु कृतमवदातं कर्म वसुंधरया ययासि भर्ता समासादितो। दूरिवद्धाः स्थलनिवासासद्गृह्यमानिनी हता खलु ल
क्ष्मीर्या विग्रहवती भवंतं नोपसर्पति। सर्वथा कल्पकोटीर्महावराहदंष्ट्रावलयेनबाहुना वह भुवनभारं सह पित्रेत्यभिधाय च स्वयमाभरणवसनकुसुमाङ्गरागादिभिरभ्यर्च्य विसर्जयांचकार। विसर्जितश्चोत्था
याजः पुरं प्रविश्य द्रष्टुं वैशम्पायनमातरं मनोरमाभिधानीं निर्गम्य समारुह्येन्द्रायुधं पित्रा पूर्वपरिकल्पितं प्रतिच्छंदकमिव राजकुलस्य द्वारावस्थितपूर्णकलशमावद्धहरितपल्लववंदनमालं समुच्छ्रितसि
तपताकासहस्रमभ्याहतमंगलतूर्यरवपूरितदिगंतरमुपरचितविकचकमलकुसुमप्रकरमचिरकृताग्निकार्यमुज्वलवेशविरचितपरिजनमुपपादितारोपगृहप्रवेशमङ्गलं कुमारभवनं जगाम। तत्र च श्रीमंडपा
वस्थिते शयनीये मुहूर्तमुपविश्य सह तेन राजपुत्रलोकेनाभिषेकादिकमशनावसानमशेषमकरोद्दिवसविधिं। अभ्यन्तरे च शयनीयगृहे स्वयमिंद्रायुधस्यावस्थानमकल्पयत्। एवं प्रायेण चास्योदंतेन तद्दहः
परिणतिमुपययौ। गगनतलादवततार रत्नादिवसश्रियः पद्मरागनूपुरमिव स्वप्रभापिहितरंध्रं रविमंडलमुन्मुक्तयावरं पपात। सलिलप्रवाहहरिरथचक्रमार्गानुसारेण दिवसकरस्य वासरालोकः प्रतीचीककुभमग
मत्। अभिनवपल्लवलोहिततरेनैकरेणावाशोमुखप्रसृतेन दिवसकरबिंबेन वासरः कमलरागमशेषमपार्त्। कमलिनीपरिमलचपयरिवपागतालिमालाकुलितकंठकालपाशैरिव चक्रवाकमिथुनमा
कृष्यमाणं विजघटे। करपुटैरादिवसाज्जमापीतमरविन्दमधुरसमिव रक्तातपच्छलेन गगनगमनखेदाद्दिवसकरबिंबं ववाम। क्रमेण च प्रतीचीकर्णपूरस्फोत्पलेलोव। नरमुपगते भगवति गभस्तिमा

कादं० लिनि समुल्लसितायामम्बरतलतडागविकचकमलिन्यां संध्यायां कुंकुमागुरुपंकपत्रलताभिरिव तिमिरलेखाभिः स्फुरंतीषु दिशां मुखेष्वलिकुलमलिनेनेव कुवलयवनेन रक्तकमलाकर इव तिमिर

३९ निकरेणोत्सार्यमाणे संध्यारागे कमलिनीपरिपीतमातपमुन्मूलयितुमंधकारकरपल्लवेष्विव विशत्सु रक्तकमलोदराणि मधुकरकुलेषु शनैः शनैश्च निशाविलासिनीमुखावतंसपल्लवे गलिते संध्यारागे रित्तु

विहितेषु संध्यावंदनवलिपिंडेषु शिखरदेशप्रतिमितासु नान्दीमयूरास्वपि मयूरयष्टिषु गवाक्षविवरनिलीनेषु प्रासादलक्ष्मीकर्णोत्पलेष्विव पारावतेषु विगतविलासिनीसंवाहनानि

श्वसत्कांचनपीठासु मूकीभूतघंटास्वंतःपुरदोलासु भवनसहकारशाखावलम्बितपंजरेषु विनमतालयेषु पंजरशुकसारिकानिवहेषु संगीतकविरामविश्रान्तवारांगनाकरार्प्यमाणासु वीणासु पुत्रनूपुरशब्दोपशमनिभृ

तेषु भवनकलहंसेष्वपनीयमानकर्णशंखचामरनक्षत्रमालामंडनेषु मधुकरशून्यकपोलभित्तिषु मत्तवारणेषु प्रदीयमानेषु राजवल्लभतुरंगमंदुरादीपेषु प्रविशंतीषु प्रथमयामकुंजरघटासु कृतराजलस्य

पनेषु निष्क्रामत्सु पुरोहितेषु विसर्जितराजलोकविरलपरिजनेषु विस्तारितेष्विव राजकुलकक्षान्तरेषु ज्वलितदीपिकासहस्रप्रतिबिम्बचुम्बितेषु कृतविकचचम्पककल्पोपहारेष्विव मणिभूमिकुट्टिमेषु नियमितदीपालोका

सु रविविरहार्तनलिनीविनोदनागतबालातपास्विव भवनदीर्घिकासु निद्रालसेषु पंजरकेसरिषु समारोपितकार्मुकेषु गृहीतसायकेषु यामिकेष्वंतःपुरं प्रविष्टे मकरकेतावतंसपल्लवेष्विव सरागेषु कर्णपूरी

क्रियमाणेषु सुरतदूतीवचनेषु सूर्यकान्तमणिभ्यो दिवसंक्रान्तानलेष्विव प्रज्वलत्सु मानिनीनां शोकविधुरेषु हृदयेषु प्रदोषसमये चन्द्रापीडः प्रज्वलितदीपिकाचक्रवालपरिवारः पद्भ्यामेव राजकुलं

गत्वा पितुः समीपे मुहूर्तं स्थित्वा दृष्ट्वा च विलासवतीं मातरं स्वभवनमनेकरत्नप्रभाशबलं भुजगराजफणामंडलमिव हृषीकेशः शयनमधिशिश्ये। प्रभातायां च निशीथिन्यामुत्थाय परममभ्यनुज्ञातः पित्राभि

नवमृगयाकौतुकाकृष्यमाणहृदयो भगवत्यनुदित एव सहस्ररश्मावारुह्येन्द्रायुधमग्रतो बालेयकप्रमाणानां कर्षद्भिश्चामीकरशृंखलाभिः कौलेयकानां जरद्व्याघ्रचर्मवसनकंचुकधारिभिरनेकवर्णप

टचीरकोटिबद्धमौलिभिरुपचितश्मश्रुगहनमुखैरेककर्णावसक्तहेमजालीपुटैर्विरलविरलैर्नवयौवनश्रमोपचितोरुपिंडकैः कोदंडहस्तैः श्वपोषकैर्नगरतरुजनकोलाहलैः प्रधावद्भिः पुरुषैः क्रियमाणगमनोत्सा

होपहृततुरगपदातिः स्तोकेनैव ययौ। तत्र च कर्णान्तावकृष्टमुक्तैश्चकितकुवलयपलाशकान्तिभिर्भल्लैर्मदकलकरेणुकुंभभित्तिभिदुरैश्च नाराचैश्चापटंकाररवभयचकितवनदेवताद्दृष्टवी स्थितान्वनवराहान्केसरिणः

णामभेद्योहीत्यभिदधानो दूरादेव प्रसारितभुजयुगलः प्रायनतललाटो सद्गुरुष्ट्विमूर्तिरानन्दजलपूर्यमाणलोचनः समुद्गतपुलकतया स्विद्यन्निवैकीकुर्वन्निव पिबन्निव तया पिता विनयावनतमालिलिंग

आलिंगितोन्मुक्तश्चापि पितुश्चरणसमीपेऽपि भूमौ कृतमुत्तरीयं तांबूलकरंकवाहिन्या सत्वरमासनीकृतमपनयापनयेति शनैर्वदन्नग्रचरणेन समुत्सार्य चंद्रापीडः क्षितितल एव निषसाद। अनंतरं निर्दि

ते तत्समासने राज्ञा सुतनिर्विशेषमुपगूढो वैशम्पायनो न्यषीदत्। तस्मिन्मुहूर्तमिव स्थित्वा विस्मृतचामरोत्क्षेपनिश्चलानां वारविलासिनीनां साभिलाषैर्नीलवलितकुवलयदामदीर्घैरजिह्मितैस्तरल

तारसारैरवलुप्यमानो ध्यविपातैश्शम्भु पुत्रवत्सलां मातरं समभिवादयितुं दर्शनलालसां यथाक्रमं सर्वजननीर्द्रष्टुं नैशनंदयेति विसर्जितः पित्रा सविनयमुत्थाय निवारितपरिजनो वैशम्पायनद्वितीयोऽन्तःपुरं प्रवे

शापोऽयेन राजपरिजनेनोपदिश्यमानवर्त्मा प्रासादानुपययौ। तत्र धवलकंचुकावगुंठितशरीरैरनेकशतसंख्यैः श्रियमिव क्षीरोदकल्लोलैः समंतात्क्षुद्रान्तर्वंशिकैः परिवृतां मतिप्रसन्नाकाराभिः कषायरक्ताम्बर

धारिणीभिः संध्याभिरिव सकललोकवंद्याभिः प्रलम्बश्रवणपाशाभिर्विदितानेककथावृत्तान्ताभिर्भूतपूर्वाः पुण्याः कथाः कथयंतीभिरितिहासं वाचयंतीभिः पुस्तकं दधतीभिर्धर्मोपदेशान्निवेदयंतीभिर्जरत्प्रव्राजि

काभिर्विनोद्यमानामुपरचितस्त्रीवेषभाषेण गृहीताविकटप्रसाधनेन वर्षवरजनेन संसेव्यमानामनवरतविधूयमानबालव्यजनकलापामङ्गनाजनेन च वसनाभरणकुसुमपटवासताम्बूलतालवृन्तांगरागभृंगा

रधारिणा मंडलोपविष्टेनोपास्यमानां पयोधरान्तरावलम्बितमधवलदुकूलमध्यप्रवृत्तां गंगाप्रवाहमिव मेदिनीमासन्नशयनस्य दर्पणतलपतितमुखप्रतिबिम्बामर्कमंडलप्रविष्टशशिबिम्बामिव समुपसृत्य मातरं

ननाम। सा तु ससंभ्रममुत्थाय सपर्यां संपादनहेऽपि पार्श्ववर्तिनि परिजने स्वयमेव कृतावतरणमंगलं तां प्रस्नुतपयोधरक्षरणतत्पयोबिंदुचंचलेन द्रवीभूयस्नेहाकुलेन निर्भरं बद्धहृदयेनांतः शुभशतानि

ध्यायंती मूर्धन्युपाघ्राय सुचिरमाश्लिष्यत्। अनन्तरं च तथैव कृतनयो। चिरसमुपचारमाश्लिष्य वैशम्पायनमात्स्वयमुपविश्य विनयादवनितले समुपविशन्तमात्यबलाद्दनिच्छन्तमपि चन्द्रापीडमुत्संगमारोपित

वती। ससंभ्रमपरिजनोपनीतायामासंद्यामुपविष्टे च वैशंपायने चंद्रापीडं पुनः पुनराश्लिष्य ललाटदेशे चाक्षिभुजशिखरयोश्च मुहुर्मुहुः करतलेन परामृशन्ती विलासवती तमवादीत्। वत्सकठिनहृदयस्ते पिता ये

का॰ ३९

हीतताम्बूलं तस्मिन्नेव मुहूर्ते स्थित्वा इन्द्रायुधसविधमगमत्। तत्र चानुपविष्ट एव तुरगोपवर्णनप्रायालापकथाः कृत्वा सत्पर्याणापनीतौ त्वरमाणोन्मुखे यथास्वं विनियोगपरिजने तृणापहृत्य स्वयमेवेन्द्रायु
धस्य पुरो यवसमवकीर्य निर्गत्य राजकुलं गमयासीत्। तेनैव क्रमेण बलोकाराजानमागत्य निशामनैषीत्। अपरेद्युश्च प्रभात एव सर्वान्तःपुराधिकृतं मवनियुक्तैः परमसम्मतैर्मनुमार्गागतया प्रथममेव पार्श्ववय
सि वर्तमानया च राजकुलसंवासप्रगल्भया अनुज्झितधैर्यया किञ्चिदुपारूढयौवनया शक्रगोपालिकालोहितरागेणांशुकेन रचितावगुण्ठनया सबालातपयेव पूर्वया ककुभा प्रत्यग्रदलितमनःशिलाचूर्णवर्णेना
ङ्गलावण्यप्रभाप्रवाहेणामृतरसनदीप्रवाहेणेव भवनमेरयन्त्या तलपल्लवैराहुग्रासभयात्सूर्यहायरजनिकरमण्डलमवतीर्णया राजकुलदेवतयेव मूर्तिमत्या क्वणितमणिनूपुराकुलितचरणयुगलया कूजत्कल
हंसाकुलितकमलयेव कमलिन्या महार्हमेखलाकलापकलितजघनस्थलया नातिनिर्भरोद्भिन्नपयोधरया मन्दमन्दभुजलताक्षेपप्रेषितनखमयूखच्छलेन धाराभिरिव लावण्यरसमनवरतं स्वरन्त्या दिङ्मुखविस
र्पिणा हारलतानां रश्मिजालेन निमग्नशरीरतया क्षीरसागरेण मग्नवरुणपत्नीव बलस्पर्शावहलताम्बूलरुचिना अनुकारिताधरलेखया समसुवृत्ततुङ्गनासिकया विकसितपुण्डरीकधवललोचनया मणिकुण्डलमकरपत्र
भङ्गकोटिकिरणतया हितकपोलतलया सकर्णोत्पलमिव मुखमुद्वहन्त्या पर्युषितधूसरचन्दनरसतिलकालङ्कृतललाटया मुक्ताफलप्रायालङ्कारया रागैधिपराजलक्ष्म्येव उपपादिताङ्गरागया नवचनलेखयेव कोम
लतनुलतया त्र्यम्बकसुप्रतिबिम्बचरणया मरकतशालयेव वेश्ममध्यया मेरुवनलतयेव कनकपत्रालङ्कृतया महानुभावाकारया कन्यया अनुगम्यमानं कैलासनामानं कञ्चुकिनं मायाजौ अपश्यत्। संकृतप्रणामः समुपेत्य क्षि
तितलविनिहितदक्षिणकरो व्यज्ञापयामास। कुमार महादेवी विलासवती समाज्ञापयति। इयं खलु कन्यका महाराजेन पूर्वं कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्रलेखाभिधाना बालिका सती बन्दिजनेन सहा
नीयान्तःपुरपरिचारिकामध्यमुपनीता। मया चास्या विगतनाथाया राजदुहितेति समुपजातस्नेहया सुतानिर्विशेषमियन्तं कालमुपलालिता संवर्धिता च। तदियमिदानीमुचिता भवतस्ताम्बूलकरङ्कवाहिनीति कृत्वा मया प्रेषि
ता। न चास्यामायुष्मता परिजनसामान्यदृष्टिना भवितव्यम्। बालेव लालनीया। स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया। शिष्येव द्रष्टव्या। सुहृदिव सर्वविश्रम्भेष्वभ्यन्तरीकर्तव्या। दीर्घकालसंवर्धितस्नेहतया स्वसुतायामिव

च मे हृदयमस्यां लिप्यति चलत्वान्नस्यामपि पक्षपातो महाभिजनराजवंशप्रसूता चेतीयमेवंविधानि पतन्ति स्वयमेवेयमर्भत्वे विनीततया कतिपयैरेव दिवसैः कुमारमाराधयिष्यति। केवलं मम चिरकालोपचिता बलवती प्रेम
प्रवृत्तिरस्यामविदितशीलश्चायं कुमार इति सन्दिश्यते। इति सर्वथा तथा कल्याणिना प्रयतितव्यं यथेयमतिचिरमुचिता परिचारिका भवतीत्यभिधाय विरतवचसि कैलासे कृताभिवादनप्रणामां पत्रलेखामनिमिषलोचन
श्चिरमालोक्य चन्द्रापीडो यथाज्ञापयत्यम्बेत्युक्त्वा कञ्चुकिनं प्रेषयामास। पत्रलेखा तु तद्दिवसात्प्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा न रात्रौ न सुप्तस्य नासीनस्य नोत्थितस्य न क्रमतो न राजकुलगतस्य छायेव क्षणमपि राजसूनोः
पार्श्वं मुमोच। चन्द्रापीडस्यापि तस्या दर्शनात्प्रभृति प्रत्यग्रोपचीयमाना महती प्रीतिरासीत्। अभ्यधिकं च प्रतिदिनमस्याः प्रसादमकरोत्। आत्महृदयादव्यतिरिक्तामिव चैनां सर्वविश्रम्भेष्वमन्यत। एवं च समतिक्रामत्सु दिवसेषु
राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुपकरणसम्भारसंग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकं च तं कदाचिद्दर्शनार्थमुपागतमुपारूढविनयमपि विनीततरमिच्छन्कर्तुं शुकनासः सविस्तरमुवाच। तात चन्द्रा
पीड विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमन
ञ्जनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम्। अशिशिरोपचारहार्योऽतितीव्रो दर्पदाहज्वरोष्मा। सततममूलमणिमन्त्रगम्यो विषमो विषयविषास्वादमोहः। नित्यमस्नानशौचवध्यो बलवान् रागमलावलेपः। अजस्रमक्षपा
वसाना प्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीत्यतो विस्तरेणाभिधीयसे। गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्परा सर्वा। अविनयानामेकैकमप्येषामायतनं किमुत स
मवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पु
रुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मा
र्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः। गुरुवचनममलमपि सलिलमिव म

कादं॰ हृदयं जनयति श्रवणगतं शूलमिव विशदमभव्यस्य। इतरस्य तु करिण इव शंखाभरणमाननशोभासमुदयमधिकतरमुपजनयति सकलमतिमलिनमपि दोषजातं गुरूपदेशः। प्रशमहेतुः परिणाम इव पलित
५८ रूपेण शिरसिजजालममलीकुर्वन्गुणरूपेण तदेव परिणमयति। अयमेव चानास्वादितविषयरसस्य ते कालउपदेशस्य। कुसुमशरशरप्रहारजर्जरिते हि हृदये जलमिव विगलत्युपदिष्टं। अकारणं च
भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य। चंदनप्रभवो न दहति किमनलः। किं वा प्रशमहेतुनापि न प्रचंडतरीभवति वडवानलो वारिणा। गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानमनुपजात
पलितादिवैरूप्यमजरं वृद्धत्वमनारोपितमेदोदोषं गुरुकरणमसुवर्णविरचनमग्राम्यं कर्णाभरणमतीतज्योतिरालोको नोद्वेगकरः प्रजागरः। विशेषेण तु राज्ञां। विरला हि तेषामुपदेष्टारः। प्रतिशब्दक इव राज
वचनमनुवदति जनो भयात्। उद्दामदर्पश्वयथुस्थगितश्रवणविवराश्चोपदिश्यमानमपि ते न शृण्वंति। शृण्वंतोपि गजनिमीलनमाचरंतः खेदयंति हितोपदेशदायिनो गुरून्। अहंकारज्वरदाहमूर्छांधकारि
तो विह्वला हि राजप्रकृतिः। अलीकाभिमानोन्मादकारीणि धनानि। राज्यविषविकारतंद्राप्रदा राजलक्ष्मीः। आलोकयतु तावत्कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमं। इयं हि सुभटखड्गमंडलोत्पलवनभ्र
मरी लक्ष्मीः क्षीरसागरात्पारिजातपल्लवेभ्यो रागमिंदुशकलादेकांतवक्रतामुच्चैःश्रवसश्चंचलतां कालकूटान्मोहनशक्तिं मदिराया मदं कौस्तुभमणेरतिनैष्ठुर्यमित्येतानि सहवासपरिचयवशाद्विरहवि
नोदनचिह्नानि गृहीत्वैवोद्गता। न ह्येवंविधमपरमपरिचितमिह जगति किंचिदस्ति यथेयमनार्या। लब्धापि दुःखेन खलु परिपाल्यते। दृढगुणपाशसंदाननिस्पंदीकृतापि विनश्यति। उद्दामदर्पभटसहस्रोल्लासि
तासिलतापंजरविधृतापि अपक्रामति। मदजलदुर्दिनांधकारगजघटितघनघटापरिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयति। न कुलक्रममनुवर्तते। न शीलं प
श्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं परिपालयति। न सत्यमनुबुध्यते। न लक्षणं प्रमाणीकरोति। गंधर्वनगरलेखेव पश्यत
त एव नश्यति। अद्याप्यारूढमंदरपरिवर्तावर्तभ्रांतिजनितसंस्कारेव परिभ्रमति। कमलिनीसंचरणव्यतिकरलग्ननलिननालकंटकेव न क्वचिन्निर्भरमाबध्नाति पदं। अतिप्रयत्नविधृतापि परमेश्व

शरभांश्चमरान्महिषान्कुरंगांश्च सदर्पानघोल्लघ्यान। अन्यांश्च जीवत एव महाप्राणतया स्फुरतो जग्राह। समारूढे च मध्यमह्नः सवितरि वनात्स्नानोत्थितेनेव श्रमसलिलबिंदुवर्षमनवरतमुत्सृ
ता मुहुर्मुहुर्दशनविधृतखलीनेन श्रमशिथिलमुखगलितफेनिलरुधिरलवेन पर्याणपट्टकानुसारोच्छ्रितफेनराजिना कर्णावतंसीकृतमुत्फुल्लकुसुमस्तबकमलिपटल
झंकारमुखरं वनगमनचिह्नं पल्लवस्तबकमुद्वहतेंद्रायुधेनोह्यमानः समुद्भूतस्वेदजलयाजरीकृतमंडनेन मार्गरुधिरलवशतशबलेन वारवाणेन द्विगुणतरमुपजनितकांतिरनेकरूपा
नुसारसंभ्रमपरिभ्रष्टछत्रधारितयाच्छत्रीकृतेन नवपल्लवेन निवार्यमाणातपो विविधवनलताकुसुमरेणुधूसरो वसंतजं दवविग्रहवान् अश्वखुररजोमलिनललाटाभिव्यक्तावदातस्वेदले
खो दूरविच्छिन्नेन पदातिपरिजनेन शून्यीकृतपुरोभागः प्रजविततुरंगमाधिरूढैरल्पावशिष्टैः सह राजपुत्रैरेवं मृगयापतितैर्वनमहिषैरेवं वराहैरेवं शरभैरेवं हरिणैरिति तमेव मृगयावृत्तांतमुद्गारयन्भव
नमाजगाम। अवतीर्य च तुरंगमात्ससंभ्रमप्रधावितपरिजनोपनीते समुपविश्यासने वारबाणमवतार्यापनीय चाशेषं तुरंगमाधिरोहणोचितं वेषपरिग्रहमितस्ततः प्रचलिततालवृंतपवनापनी
यमानश्रमो मुहूर्तं विशश्राम। विश्रम्य च मणिरजतकनककलशसनाथामनवरतविन्यस्तकांचनपीठां स्नानभूमिमगात्। निर्वर्तिताभिषेकव्यापारस्य च विविक्तवसनपरामृष्टवपुषः स्वच्छदुकूलपट्टावक
लितमौलेर्गृहीतधौतधवलवाससः कृतदेवार्चनस्य चांगरागभूमावुपविष्टस्य राज्ञा विसर्जिता महाप्रतीहाराधिष्ठिता राजपरिचारिकाः कुलवर्धनासनाथाश्च विलासवतीदास्यः सर्वांतःपुरप्रेषिताश्चांतःपुरप
रिचारिकाः पटलके विनिहितानि विविधान्याभरणानि माल्यांगरागान्वासांसि चादाय पुरस्तस्योपतस्थुः। उपनीतानि तानि च यथाक्रममादाय ताभ्यः प्रथमं स्वयमुपलिप्य वैशंपायनमुपरचितांगरागो दत्वा
च समीपवर्तिभ्यो यथार्हमाभरणवसनांगरागकुसुमानि विविधमणिभाजनसहस्रसंबाधं शरदंबरतलमिव स्फुरिततारागणमाहारमंडपमगच्छत्। तत्र च द्विगुणीकृतकुथासनोपविष्टः समीपोपविष्टेन तद्गुण
वर्णनपरेण वैशंपायनेन यथार्हभूभागोपवेशितेन च राजपुत्रलोकेन इदमस्मै प्रदीयतामिदमस्मै प्रदीयतामिति प्रसादविशेषदर्शनसंवर्धितसेवारसेन सहाहारं विविधमकरोत्। उपस्पृश्य पीत्वा च धूपवर्तिं

कादं
३९

मग्निकार्यधूमेनेव मलिनीभवति हृदयं पुरोहितकुशाग्रसंमार्जनीभिरिवापनीयते क्षांतिः उष्णीषपट्टबंधेनेवाच्छाद्यते जरागमनस्मरणं आतपत्रमंडलेनेवापवार्यते परलोकदर्शनं चामरपवनैरिवापह्रियते सत्यवादि
ता वेत्रदंडैरिवोत्सार्यंते गुणाः जयशब्दकलकलरवैरिव तिरस्क्रियंते साधुवादाः ध्वजपटपल्लवैरिव परामृश्यते यशः तथाहि केचिच्छ्रमवशशिथिलशकुनिगलपुटचपलाभिः खद्योतोन्मेषमुहूर्तमनोहराभिर्मनस्वि
जनगर्हिताभिः संपद्भिः प्रलोभ्यमाना धनलवलाभावलेपविस्मृतजन्मानो नेकदोषोपचितेन दुष्टासृजेव रागावेशेन बाध्यमाना विविधविषयग्रासलालसैः पंचभिरप्यनेकसहस्रसंख्यैरिवेंद्रियैरायास्य
मानाः प्रकृतिचंचलतया लब्धप्रसरेणैकेनापि शतसहस्रतामिवोपगतेन मनसाकुलीक्रियमाणा विह्वलतामुपयांति ग्रहैरिव गृह्यंते भूतैरिवाभिभूयंते मंत्रैरिवावेश्यंते सत्वैरिवावष्टभ्यंते वायुने
व विडंब्यंते पिशाचैरिव ग्रस्यंते मदनशरैर्मर्माभिहता इव मुखभंगसहस्राणि कुर्वते धनोष्मणा पच्यमाना इव विचेष्टंते गाढप्रहाराहता इवांगानि न धारयंति कुलीरा इव तिर्यक्परिभ्रमंति अधर्मभग्नग
तयः पंगव इव परेण संचार्यंते अनृतवाग्विषविपाकसंजातमुखरोगा इवातिकृच्छ्रेण जल्पंति सप्तच्छदतरव इव कुसुमरजोविकारैरासन्नवर्तिनां शिरःशूलमुत्पादयंति जातुषाणीव सोष्माणं
न सहंते आसन्नमृत्यव इवोरःस्थितं बंधुजनमपि न जानंति उत्कुपितलोचना इव तेजस्विनो न पश्यंति कालदष्टा इव महामंत्रैरपि न प्रबुध्यंते दुष्टवारणा इव महालानस्तंभनिश्चलीकृता न गृह्णंत्युपदेशं
अतितृष्णाविषमूर्छिताः कनकमयमिव सर्वं पश्यंति इषव इव पानवर्द्धिततैक्ष्ण्याः परप्रेरिता विनाशयंति दूरस्थान्यपि फलानीव दंडविक्षेपैर्महाकुलानि शातयंति अकालकुसुमप्रसवा इव मनोहराकृतयोपि लोकविना
शहेतवः श्मशानाग्नय इवातिरौद्रभूतयः तैमिरिका इवादूरदर्शिनः उपसृष्टा इव क्षुद्राधिष्ठितभवनाः श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयंति चिंत्यमाना अपि महापातकाध्यवसाया इवोपद्रवमुपजनयंति अनुदिव
समापूर्यमाणाः पापेनेवाध्मातमूर्तयो भवंति तदवस्थाश्च व्यसनशतशरव्यतामुपगता वल्मीकतृणाग्रावस्थितजलबिंदव इव पतितमप्यात्मानं नावगच्छंति अपरे तु स्वार्थनिष्पादनपरैर्धनपिशितग्रास
गृध्रैरास्थाननलिनीबकैर्द्यूतं विनोद इति परदाराभिगमनं वैदग्ध्यमिति मृगयां श्रम इति पानं विलास इति नित्यप्रमत्ततां शौर्यमिति स्वदारपरित्यागमव्यसनितेति गुरुवचनावधीरणमपरप्रणेयत्वमिति

अजितभृत्यतां सुखोपसेव्यत्वमिति नृत्यगीतवाद्यवेश्यातिसक्तिं रसिकतेति महापराधानाकर्णनं महानुभावतेति परिभवसहत्वं क्षमेति स्वच्छंदतां प्रभुत्वमिति देवावमाननं महासत्वतेति वंदिजनख्यातिर्य
श इति तरलतामुत्साह इति अविशेषज्ञतामपक्षपातित्वमिति दोषानपि गुणपक्षे अध्यारोपयद्भिरंतः स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्तैरमानुषलोकोचिताभिः स्तुतिभिः प्रतार्यमाणा वित्तमदमत्तचित्ता नि
श्चेतनतया तथैवेत्यात्मन्यारोपितालीकाभिमाना मर्त्यधर्माणोपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमिवात्मानमुत्प्रेक्षमाणाः प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजनस्योपहास्यतामुपयांति आत्मविडंबनां
चानुजीविना जनेन क्रियमाणामभिनंदंति मनसा देवताध्यारोपणप्रतारणादसद्भूतसंभावनोपहताश्चांतःप्रविष्टापरभुजं रूपयंति दृष्टिपातमप्युपकारपक्षे स्थापयंति संभाषणमपि संविभागमध्ये कुर्वंति
आज्ञामपि वरप्रदानं मन्यंते स्पर्शनमपि पावनमाकलयंति मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमंति देवताभ्यो न पूजयंति द्विजातीन् न मानयंति मान्यान् नार्चयंत्यर्चनीयान् नाभिवादयंत्यभिवादनार्हान् ना
भ्युत्तिष्ठंति गुरून् अनर्थकायासांतरितविषयोपभोगसुखमित्युपहसंति विद्वज्जनं जरावैक्लव्यप्रलपितमिति न पश्यंति वृद्धजनोपदेशं आत्मप्रज्ञापरिभव इत्यसूयंति सचिवोपदेशाय कुप्यंति हितवा
दिने सर्वथा तमभिनंदंति तमालपंति तं पार्श्वे कुर्वंति तं संवर्धयंति तं मित्रतामुपनयंति तं बहु मन्यंते तमाप्ततामापादयंति तेन सह सुखमवतिष्ठंते तस्मै ददति तस्माद्बिभ्यति तस्य वचनं शृण्वंति तत्र वर्षंति यो
हर्निशमनवरतमुपरचितप्रणामांजलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति यो वा माहात्म्यमुद्भावयति किं वा तेषां सांप्रतं येषामतिनृशंसप्रायोपदेशमतिनिर्घृणं कौटिल्यशास्त्रं प्रमाणं अभिचार
क्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः पराभिसंधानपरा मंत्रिण उपदेष्टारो नरपतिसहस्रभुक्तोज्झितायां च लक्ष्म्यामासक्तिः मारणात्मकेषु शास्त्रेष्वभियोगः सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः तदे
वंप्रायेतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतंत्रेस्मिन्महामोहकारिणि च यौवने कुमार तथा प्रयतेथा यथा नोपहस्यसे जनैर्न निंद्यसे साधुभिर्न धिक्क्रियसे गुरुभिर्नोपालभ्यसे सुहृद्भिर्न शोच्यसे
विद्वद्भिर्न प्रकाश्यसे विटैर्न प्रतार्यसे कुशलैर्नास्वाद्यसे भुजंगैर्नावलुप्यसे सेवकवृकैर्न वंच्यसे धूर्तैर्न प्रलोभ्यसे वनिताभिर्न विडंब्यसे लक्ष्म्या न नर्त्यसे मदेन नोन्मत्तीक्रियसे मदनेन नाक्षिप्यसे विष

यैर्नावकृष्यसे रागेण नापह्रियसे सुखेन। कामं भवान्प्रकृत्यैव धीरः पित्रा च महता प्रयत्नेन समारोपितसंस्कारः तरलहृदयमप्रबुद्धं च मदयंति धनानि तथापि भवद्गुणसंतोषो मामेवं मुखरीकृतवान् इद- नार

कादं मेव च पुनः पुनरभिधीयसे। सचेतनमपि विद्वांसमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवंतमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीः। सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्

४० यौवराज्याभिषेकमंगलं। कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरं। अवनमय द्विषतां शिरांसि। उन्नमय स्वबंधुवर्गं। अभिषेकानंतरं च प्रारब्धदिग्विजयः परिभ्रमन्विजितामपि पित्रा सप्तद्वीपभूषणां पु-

नर्विजयस्व वसुंधरां। अयं ते कालः प्रतापमारोपयितुं। आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति। इत्येतावदभिधायोपशशाम। उपशांतवचसि शुकनासे चंद्रापीडस्ताभिरमलाभिरुपदेशवाग्भिः प्रक्षा-

लित इवोन्मीलित इव स्वच्छीकृत इव निर्मृष्ट इवाभिषिक्त इवाभिलिप्त इवालंकृत इव पवित्रीकृत इवोद्भासित इव प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम। ततः कतिपयदिवसापगमे राजा स्वयमुत्क्षिप्तमंगलजल-

कलशः सह शुकनासेन पुण्येऽहनि पुरोधसा संपादिताशेषाभिषेकमंगलमनेकनरपतिसहस्रपरिवृतः सर्वेभ्यस्तीर्थेभ्यः सर्वाभ्यो नदीभ्यः सर्वेभ्यः सागरेभ्यः समाहृतेन सर्वौषधिभिः सर्वफलैः सर्व-

रत्नैश्च परिगृहीतेनानंदजलमिश्रेण मंत्रपूतेन वारिणा स्वयमेव तमभिषिषेच। अभिषेकसलिलार्द्रदेहं चैतं लतेव निजपादपं पादपांतरममुंचंत्यपि पितरमपि चंद्रापीडं तत्क्षणमेव संचक्राम राज-

लक्ष्मीः। अनंतरं च सविलासिनीजनेन परिजनेन सप्रेमार्द्रहृदयया विलासवत्या स्वयमापादतलादामोदिना चंद्रातपधवलेन चंदनेनानुलिप्तमूर्तिरभिनवविकसितसितकुसुमकृतशेखरः शेखरेण ना-

विच्छुरितदेहो दूर्वाप्रवालरचितकर्णपूरो दीर्घदशमनुपहतमिंदुधवलं दुकूलयुगलं वसानः पुरोहितप्रतिबद्धप्रतिसरप्रसाधितपाणिरभिनवराजलक्ष्मीकमलिनीमृणालेनाभिषेकदर्शनागतेन

सप्तर्षिमंडलेनेव हारेणोपशोभितवक्षःस्थलः सितकुसुमग्रथिताभिराजानुलंबिनीभिरिंदुकरकलापकोमलाभिर्वैकक्षकस्रग्भिर्निरंतरनिचितशरीरतया धवलवेषपरिग्रहतया च नरसिंह इव वि-

कटकेसरनिकरः कैलास इव स्रवन्निर्झरस्रोतस्विनीस्रोतोराशिः ऐरावत इव मंदाकिनीमृणालजालजटिलः क्षीरोद इव स्फुरत्फेनलवाकुलः स तत्कालप्रतिपन्नवेत्रदंडेन पित्रा स्वयमारब्धसमुत्सारणः स

ग्राहैकविविधगंधगजगंडस्थलमधुपानमत्तेव परिस्खलति। पारुष्यमिवोपशिक्षितुमसिधारासु वसति। समुपचितमूलदंडकोशमंडलमपि मुंचति भूभुजं लतेव विटपकानध्यारोहति। गंगेव

वसुजनन्यपि तरंगबुद्बुदचंचला। दिवसकरगतिरिव प्रकटितविविधसंक्रांतिः। पातालगुहेव तमोबहुला। हिडिंबेव भीमसाहसैकहार्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शि-

तानेकपुरुषोच्छ्राया। अल्पसत्त्वमुन्मत्तीकरोति। सरस्वतीपरिगृहीतमीर्ष्ययेव नालिंगति। गुणवंतमपवित्रमिव न स्पृशति। उदारममंगलमिव न बहु मन्यते। सुजनमनिमित्तमिव न पश्य-

ति। अभिजातमहिमिव लंघयति। शूरं कंटकमिव परिहरति। दातारं दुःस्वप्नमिव न स्मरति। विनीतं पातकिनमिव नोपसर्पति। मनस्विनमुन्मत्तमिवोपहसति। परस्परविरुद्धं चेंद्रजालमिव दर्शयंती प्रकटयति जगति निजं चरि-

तं। तथाहि सततमूष्माणमारोपयंत्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावमाविष्करोति। तोयराशिसंभवापि तृष्णां संवर्धयति। ईश्वरतामादधानाप्यशिवप्रकृतितामातनोति। बलोपचयमाहरंत्यपि लघिमा-

नमापादयति। अमृतसहोदरापि कटुविपाका। विग्रहवत्यप्यप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजनप्रिया। रेणुमयीव स्वच्छमपि क~~टुकविपाका विग्रहवत्य~~लुषीकरोति। यथा यथा चेयं चपला दीप्यते तथा तथा

दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति। तथाहीयं संवर्धनवारिधारा तृष्णाविषवल्लीनां। व्याधगीतिरिंद्रियमृगाणां। परामर्शधूमलेखा सच्चरितचित्राणां। विभ्रमशय्या मोहदीर्घनिद्राणां। निवास-

जीर्णवलभी धनमदपिशाचिकानां। तिमिरोद्गतिः शास्त्रदृष्टीनां। पुरःसरपताका सर्वाविनयानां। उत्पत्तिनिम्नगा क्रोधावेगग्राहाणां। आपानभूमिर्विषयमधूनां। संगीतशाला भ्रूविकारनाट्यानां। आवासदरी

दोषाशीविषाणां। उत्सारणवेत्रलता सत्पुरुषव्यवहाराणां। अकालप्रावृट् गुणकलहंसकानां। विसर्पणभूमिर्लोकापवादविस्फोटानां। प्रस्तावना कपटनाटकस्य। कदलिका कामकरिणः। वध्यशाला साधुभा-

वस्य। राहुजिह्वा धर्मेंदुमंडलस्य। न हि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढो यो वा न विप्रलब्धः। नियतमियमालेख्यगतापि चलति। पुस्तकमय्यपींद्रजालमाचरति। उत्कीर्णापि विप्रलभते।

श्रुताप्यभिसंधत्ते। चिंतितापि वंचयति। एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवंति राजानः सर्वाविनयाधिष्ठानतां च गच्छंति। अभिषेकसमय एव चैषां मंगलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यं

कादं० ऽग्रयासहस्रैरन्योन्यसंघट्टजर्जरितातपत्रमंडलैः दूरावनतमौलिशिथिलमणिमुकुटपंक्तिभिरावर्जितकर्णपूरैः कपोलस्थलस्खलितकुंडलैः सेनापतिनिर्दिश्यमाननामभिरवनिभुजां चक्रवालैः प्रणम्यमा
४२ नो बहलसिंदूररेणुपाटलेन शितिलगरोल्लायमानस्थूलमुक्ताकलापावचूडेन सितकुसुमजालशबलशिरसा संलग्नसंध्यातपेनेव तिर्यगावर्जितश्वेतगंगाप्रवाहेणांतायउणादंतुरितशिखरशिथिलेनमेनुगो
वगंधमादनेनानुगम्यमानः कनकालङ्कारप्रभाकल्माषिताबयवेन चंदनकुंकुमस्थासकैर्वा रूप्यमाणेनेन्द्रायुधेन समाधीकृतपुरोभागः शनैः शनैः प्रथममेव प्रस्थानकृतवीभाषांमभिप्रतस्थे। चलितगज
घटाकम्पितधवलातपत्रमनेककल्लोलपरम्परापतितचंद्रमंडलप्रतिबिम्बसहस्रं महाप्रलयजलधिजलमिव प्लावितमहीतलमुद्दंडकलैः शिविरं संचचाल वकौ उच्चलितस्यचौसंस्वभवनाद्रुपपादितप्रस्थान
मंगलैर्धवलदुकूलवासाः सितकुसुमरागोमहता बलसमूहेनैन नरेन्द्रवृंदैश्चानुगम्यमानो धृतधवलातपत्रो द्वितीय इव राजहंसलांछितपदः संचारयांकरिण्यां वैशम्पायनः समाजगाम। आगम्य च राजनिक
टवर्ती बभूव। अनन्तरमितस्ततश्च निर्गतो युवराज इति समाकर्ण्य प्रधावतां बलानां भरेण चलितकुलशैलकैलासा क्षुभितो जलधिजलतरंगागतेनेव तह्यां मा चकंपे मेदिनी। सम्मुखागतैः
श्च प्रणमद्भिर्भूपालैः शुक्लताजालजटिलचूलिकानां मणिमुकुटानां मालोकेनेन्। मिषितबहलरोचिषा चंपकपत्रमंभीनां केयूरमंडलानां प्रमसंतानेनैव क्वचिद्विकीर्यमाणचाषपक्षचोरहरिद्वर्णं क्वचिद्गुपति
ताशिखिकुलचंचत्कंदुकपातसारद्वर्णं क्वचित्काननजलधरतरं जरलाद्वर्णं क्वचित्सकल्पतरुपल्लवाद्वर्णं क्वचित्सपत्नपद्मचापारवं क्रियंत इव दिशः। धवलानपि विविधमणिनिकरकल्माषैः कुसापैभि
श्चूडामणिमरीचिभिर्मायूरानीवाराजंतैः शाद्वलातपत्राणि। ऽनेनेव तुरंगमयमिव महीतलं कुञ्जरमयमिव दिक्चक्रवालमातपत्रमयमिवांतरिक्षं ध्वजवनमयमिवांबरतलं मिभमदगंधमयमिव समी
रणो भूमिपालमयीव प्रजा आभरणांशुमयीव दृष्टिः किरीटमयमिव तपः आमरमयमिव दिवसो जयशब्दमयमिव त्रिभुवनं मम भवत्। सर्वतश्च कुलपर्वताकारैः स्खलद्भिर्गजवारणैः रूत्पतदंडमंडलानिभैश्च
प्रेंखद्भिरांतपत्रैः संवर्तकाम्भोदनादभीमनादैर्धनतांडुंदुभिनौताइकावर्षसहस्रैर्वनेचविसर्पता गजघोकरनिकरेण धूमकेतुनिभैश्चोद्धसद्भिरवनिरजोदंडकैर्निर्घातपातवत्सु गंभीरघोषैश्चकरिकुलकं

ठगर्जितैः स्तनत्करकणावर्षविभ्रमाणां च भ्रमतां मनगजकुंभसिंदूररेणुनां क्षुभितजलधिजलकल्लोलचंचलाभिश्च विसर्पिणीभिस्तुरंगममालाभिरप्रकाशितदिगन्तरेणानवरतं क्षरता गजमदजलधारादुर्दिने
नैकलकलेन च भुवनान्तरव्यापिना महाप्रलयदवसंजनितो बलकोलाहलभीता इव धवलध्वजनिवहनिरंतरतया युः क्वापि दिशः। मलिनावनिरजस्पर्शशंकितेभिव गजघटावचूलसहस्रसंनुदं
मतिदूरमंबरतलमपससार। प्रचुरवेत्रलतासमुत्सार्यमाणाद्बलतुरंगमखुररजो धूसरमर्ककिरणांमुमुचुः पुरोभागाद्रमकरशीकरनिर्वापरात्रसदवांतपत्रसंछादितातपो दिवसोनन्तरः। बलभर
जर्जरीकृतामदकलकरिकरवशगाषातसंमार्गितोद्धितीघेव प्रयाणभेरीभिरवभूमिरारसत्। गुल्फदघ्नपंकेषु चतुरंगमुखफेनपल्वलेषु मदययसिमग्नकतोकरिणां प्रचस्खलुः पदे पदे तपसः। दलितैलापक्षि
लाविभेन पदुनोगजमदामोदिनोनुलिप्तस्वसामजस्येव समुपययौ निखिलां गंधग्रहणसामर्थ्यं घ्राणेन्द्रियस्य। क्रमेण च प्रसर्पति बलस्य पुरः प्रधावतां जनकदम्बकोनां कोलाहलेन ताडनरदीर्घ
णां च कान्हलानां निनादैः खुररवमिश्रेणा च वाजिनां हृष्टहेषारवेणानवरतकर्णतालरवसंपृक्तेनेव दंतिनां मांडम्बरवेणां मंगलशंखस्वनवर्द्धितध्वनीनां च प्रयाणपटहानां निनादैर्मुहुर्मुहुरुरितस्तनं मा
द्युमानानां चंदरुरसिंडिमानां स्खलितेनैव जर्जरितश्रवणापुटस्य मूर्च्छितो भवज्जनस्य प्रांते। प्रानेषु बलसंक्षोभजन्मा क्षितेरनेकवर्णतया क्वचिज्जीर्णशफरक्रोडधूम्रः क्वचित्क्रमेलकसटासन्निभः क्वचि
त्परिणतरल्लकरोमपल्लवमलिनः क्वचित्पुन्नोर्णातंतुपांडुरः क्वचिज्जरठमृणालदंडधवलः क्वचित्तरक्षुपिकेशकपिलः क्वचिदपि हरवृषभशोभमंथफेनपिंडपांडुरः त्रिपथगाप्रवाहेदवहरिचरणप्रभ
वं कुपितरवमुंचन्नस्मानिमारशयादुहासरवनुंघन्नयनानि रोपितरवांचामनकरिकरशीकरजालानि पल्लवानि वोत्पतन्गगनतलं मलिनिवहरवत्तुम्बन्मदरेखां मृगपतिरिव रचयन्करिकुंभस्थली
षु परं मुपानविजपरवग लङ्घनता को जलागमरवपांडुरीकुर्वन्नाशिखांसिं मुद्वपन्निवपन्नाग्रग्रथितो दृषिमाजिघ्रन्निवमकरंदबिंदुपंकलग्नः कर्णोत्पलानि मदकलकरिकर्णतालताडनत्रस्त
रवविप्राणकर्णशंखोदरविवरायीपीयमानरवोन्मुखीभिरवनिपतिमुकुटपत्रभंगमकरिकाभिरंबुधयमानस्वतुरङ्गमुखविक्षेपविश्रुतैः फेनकुसुमस्तबकैरनुगम्यमानरवमत्तगजघटा

कादं कुंकुमभित्तिसंभवेनधातुधूलिनासमालिप्यमानेनेवचामरकलापविधूतेनपटवासपांशुनाभ्राम्यमाणेनेवनरपतिसहस्रशेखररश्मिभिःकुसुमकेसररजोभिरुत्पातरक्तेनेवदिवसकरमंडलेनप्रलयकालइव
४२ पिंडीकृतप्रस्थानमंगलप्रतिसरमालिकासुगोरोचनाचूर्णायमानःक्रकचच्छेदचंदनच्छेदधूसरोरेणुरुत्पपात॥ अपरिमाणबलसंघट्टसमुद्धूयमानैश्चसंहृतनिखिलविष्वंभशेषमकालकालमेघ
पटलमेदुरैर्विस्तारमुपगंतुमारब्धेनेनचक्रमोपचीयमानबहलमूर्तिनादिग्विजयमंगलध्वजेनेवरिपुकुलकुवलयप्रलयनीहारेणरजसाविलासपटवासचूर्णेनांदिताततपत्रपुंडरीकखंडतुषारे
णशैव्यमरपीडितमहीतलमूर्छांधकारेणचेलहूलजलदकालकदम्बकुसुमोद्गमेनदिवसकरकरकमलवनोद्दलनद्विपयूथेनगगनमहीतलप्लावनप्रलयपयोधिपूरेणत्रिभुवनलक्ष्मीशिरोवगुंठ
नपटेनमहावराहकेसरनिकरकर्बुरेणप्रलयानलधूमराजिमांसलेनपातालतलादिवोत्थितावघ्नोणोभ्युद्धूतेनगोछ्वलोकनेभ्यश्चनिपातितादिग्भ्रान्ताद्वागच्छतोनभसइवापततोपवनादिवोच्छ्वसतो
रविकिरणेभ्यइवसंभवतांतमपहृतचेतनेनेवनिद्रागमेनांगीकृतसूर्येणांधकारेणांघर्मकालोपास्थितेनेवभूमिगृहेणानुदिततारागणेनेवबहुलनिशाप्रदोषेणांनिपतितसलिलेनेवजलधरसमयेनांभो
तभुजंगेनेवरसातलेनसंवर्ध्यमानेनेवहरिचरणेनेवत्रिभुवनंमलंघयतरजसा॥ विकचकुवलयवनमिवनवोदकेनगगनतलमवष्टभ्यमानंमलस्पृष्टंक्षीरोदफेनपांडुनादिशिशिरेनेवबहलरजोधूसरितमत्रि
।त्रैकिरणचितंमिवचूडचामरमिवनिष्प्रभमभवत्। दुकूलपटधवलाकदलिकेवकलुषतांमगमत्आगमगमनापश्यत।नरपालवल्लभस्मितिगुरुमसहमानापुनरपिभारावनताशेषममरलोकमारुरोहरजोनिर्भरे
महीनिःशेषपीताततमनर्दश्यमानेमिवजलधिजलेषुधूसरितरविरथध्वजपटमंपतद्दैवनिरंजनः।मुहूर्तेनचगर्भवासमिवसंहारसागरजलमिवकृतांतजठरमिवमहाकालमुखमिवब्रह्मांडमिव
नारायणोदरमिवविवेशपृथिवी।मन्मथइवअभूद्दिवसः।पुस्तकर्ममयइवचकाशिरेककुभः।रेणुरूपेणेवपरिणतंभुवनजलं।एकमहाभूतमयमिवत्रैलोक्यमासीत्।अथनिजमदोप्रसंतमानंद
जिनांदिविप्रतिदिशिकरविवरप्रसृतैःशशभृद्भिःक्षीरोदसोदरधवलैःशीकरासारैःकर्णपल्लवप्रहतिविप्लुतेनचविसर्पतादानजलेनविनिवृत्तेरदिनेहेमारविप्रकीर्णैश्चवाजिनांलालाजलजालकैरुपश

भामंडलमुपगम्यकांचनमयंप्रशीवमहार्घंगंचन्द्रापीडः।सिंहासनमेमानुरोह।आरूढस्यचास्यचोसितकृतप्रयोचितसकलराजलोकसत्कारस्यमुहूर्तंस्थित्वादिग्विजयप्रयाणशंसीप्रलयघनघटाघोषघर्घरध्वनिरुद्वधीर
वमन्दरपातैर्वसुधरोभोगइवयुगांतनिर्घातैरुत्पातजलधरइवतडिदंडैःपातालकुक्षिरिवमहावराहघोणाभिघातैःकनककोणैरभिहन्यमानःप्रस्थानदुंदुभिरामंद्रंदध्वानयेनधनताःसमाध्मातानीवोन्मीलि
तानीवगंभीरीकृतानीवपृथक्कृतानीवप्रदक्षिणीकृतानीचवधिरीकृतानीवविस्तारितानीचब्रह्मांडभुवनान्यासन्।विक्षोभितादृश्यंचदिशांमन्योन्यबंधसंधयोपस्पचभयचकितविषमचलितोजानपदप्रासहस्रैणां।दिग्
मानइवरसातलेशेषेणमुहुर्मुहुरभिमुखवदनदत्तोर्ध्वघातैरहूयमानइवदिक्षुदिक्षुदिक्कुंजरैःसंत्रासरचितबृंहितकमंडलैःप्रदक्षिणीक्रियमाणइवनभसिदिवसकररथतुरगैरपूर्वशर्वाट्टहासशंकाहर्षहुंकृतेनांभो
ध्यमाणइवकैलासशिखरेशितिकंठत्र्यम्बकवृषभेणांकृतगंभीरकंठगर्जितेनप्रत्युद्गम्यमानइवविबुधसद्मन्यैरावतेनोंभ्रुतपूर्वस्वशेषाविशांतिर्यग्वनमितविमाणमंडलेनप्रणम्यमानइवयमसद्मनिकृतांतमहिषे
णसंभ्रांतलोकपालैर्कथितैर्भ्रामंत्रिभुवनंमविदलंनिनादैः।ततोदुंदुभिरवमाकर्ण्यजयजयेतिसर्वतःसमुद्घुष्यमाणजयशब्दःसिंहासनादुदतिष्ठत्।प्रियोसंचचालचंद्रापीडः।समनान्तरसंभ्रमोत्थितैश्चपरस्परसंघट्टवि
घटितहारस्रस्तविगलितानंतबहुतमीमग्नविजयप्रस्थानलाजांजलीनिर्वमुक्ताफलनिकरान्विकिरद्भिःपारिजातइवसितकुसुममुकुलपातिभिःकल्पपादपैरिवावनतहारस्थूलजललवाशाखैरभिर्जलधरैरनुगम्यमा
नोनरपतिसहस्रैरास्थानमंडपान्निरगात्।निर्गत्यचपर्यानेर्दृष्टोपतन्त्रेखयांसमध्यास्थितानशास्त्रनामुपपादितप्रस्थानसमुचितमंगल्यालंकारांसःसंभ्रमाधोरणोपनीतांकरेणुकामधिरूढ्यांचचालरेचकचक्री
कृतशीशिरावर्तपांडुरेणाद्वाबदनवाहदंडावस्थितकैलाशकांतिनामुक्ताफलजालिनाप्रांतशलाकेनातपत्रेणनिवार्यमाणातपोनिर्जगामारेभे।निर्गच्छंश्चाप्रजनावस्थितस्वयंकारानादृतदर्शनानांद्वाएवस्थि
तानांप्रतिपालयतांराज्ञांमुन्नमूलमामणीनांमलकरद्युतिमुखाबहलवहलेनांलोकवालातपेनांभिषेकानजराप्रस्तेनस्वत्वातपेनबद्धनैवपिञ्जरीक्रियमाणांदशादिशोंयौवराज्याभिषेकजन्मनानिजानुरा
गेणचरञ्यमानंमवनितलंमासनरिपुविनाशपिशुनेनदिग्दाहेनेवपाटलीक्रियमाणमम्बरतलंमभिमुखवागतलक्ष्मीचरणालक्तकरसेनेवलोहितायमानातपंदिवसंददर्श।निर्गतंचससंभ्रमप्रचलितगंधग

शमयं कुर्वन्नालोक्यमानोऽप्युपजातनिद्रः प्रायेणाजागरैर्देवनिनो । प्रत्युषसि चोत्थाय तेनैव क्रमेणानवरतप्रयाणकैः प्रतिप्रयाणमुपचीयमानेन बलसमुदायेन जर्जरयन्निव वसुन्धरामाकम्पयन्निव गिरीनुत्सिञ्चन्निव सरितो रि-
कादं क्तीकुर्वन्सरांसि चूर्णयन्काननानि समीकुर्वन्विषमाणि दलयन्दुर्गाणि पूरयन्निम्नानि निम्नयन्स्थलानि प्रातिष्ठत । स च नैभ्युत्खेच्छया परिभ्रमन्नमयन्नुन्नतानुन्नमयन्नवनतानाश्वासयन्भीतान्रक्षन्नशरणाग-
४३ तानुन्मूलयन्विटपकानुत्सारयंश्च कण्टकानभिषिञ्चन्स्थानस्थानेषु राजपुत्रान्समुपार्जयन्रत्नानि प्रतीच्छन्नुपायनानि गृह्णन्करानादिशन्देशव्यवस्थाः स्थापयन्स्वचिह्नानि कुर्वन्कीर्तनानि लेखयन्शासनानि पूज-
यन्नग्रजन्मनः प्रणमन्मुनीन्पालयन्नाश्रमाञ्जनयन्ननुरागं प्रकाशयन्विक्रममारोपयन्प्रतापमुपचिन्वन्यशो विस्तारयन्गुणान्ख्यापयन्स्वचरितमामृद्नंश्च वेलावनानि बलरेणुभिर्धूसरीकृतसकलसागर-
सलिलः पृथिवीं संचचार । प्रथमं प्राचीं ततस्त्रिशङ्कुतिलकां ततो वरुणलाञ्छनां ततोऽनन्तरं च सप्तर्षिताराशबलां चोदीचीं विजिग्ये । वर्षत्रयेणानमीकृताशेषद्वीपान्तरं सकलमेव चतुरम्भोधिपरिखावलयपरिक्षेपप्रमाणं बभ्राम
महीमण्डलमेवं च क्रमेण विजितसकलभुवनतलः प्रदक्षिणीकृतवसुधः परिभ्रमन्कदाचित्कैलाससमीपचारिणां हेमकूटवासिनां किरातानां सुवर्णपुरं नाम निवासस्थानं निविग्रहं कृत्वा पूर्वजलधेर्जलाज्जग्राह । तत्र च
निखिलभुवनतलपर्यटनखिन्नस्य निजबलस्य विश्रामहेतोः कतिपयदिवसानतिष्ठत् । एकदा तु तत्रस्थ एवेन्द्रायुधमारुह्य मृगयया निर्गतो विचरन्नेकाकी काननं शैलशिखरादवतीर्णं यदृच्छया किन्नरमिथुनमद्राक्षीत् । अ-
पूर्वतया तु समुपजातकुतूहलः कृतग्रहणाभिलाषस्तत्समीपमादरादुपसर्पिततुरगः समुपसर्पन्नेव दर्शनत्रासप्रधावितं च तत्पलायमानमनवरतपार्ष्णिप्रहारद्विगुणीकृतजवेनेन्द्रायुधेनैकाकी नि-
र्गत्य निजबलसमूहाद्दूरमुपससार । अत्र गृह्यतामत्र गृह्यतामिदं गृहीतमिदं गृहीतमित्यतिरभसाकृष्टमहाजवतया तुरङ्गमस्य मुहूर्तमात्रेणैकपदमिव सहायैः समाने प्रदेशे पञ्चदशयोजनमात्रमध्वानं
जगाम । तच्चानुबध्यमानं किन्नरमिथुनमालोकयत एवास्य सम्मुखापतितमुच्चशिखरमारुरोह । आरूढे च तस्मिंस्तदनुसारिणीं शनैः शनैर्निवर्त्य दृष्टिमचलशिलासकलप्रतिहतगतिप्रसरविधृततुरङ्गः स्वच्छायी-
द्धे तस्मिन्काले समुपारूढश्रमः स्वेदार्द्रशरीरमिन्द्रायुधमात्मानं चालोक्य क्षणमिव विचार्य स्वयमेव विहस्याचिन्तयत् । किमिति निरर्थकमात्मा मया प्रियमिवायासितः । किमनेन गृहीतेन न गृहीतेन वा किं । अहो मे मूर्खता

पाः प्रकारः । अतो यत्किंचन कारितायामात्मा महानिह निरर्थकव्यापारेष्वभिमुखे इहैव बालिशचरिते व्यासक्तिः । साधकफलं कर्म क्रियमाणं कथमन्यथा जातमेवमस्य कर्तव्याः क्रियाः प्रस्तुता विफलीभूताः स्वकृतका-
र्यमुपपाद्यमानं नोपपन्नं राजधर्मः प्रवर्तितो न निष्पन्नो गुर्वर्थः प्रारब्धो न समापितो विजिगीषव्यापारः प्रयत्नो न सिद्धः । कस्मादहमाविद्धो बालस्य परिवारमेतावतीं भूमिमायातः । कस्माद्वा मया निःप्रयोजनमिदमनुसृ-
तमश्वमुखद्वयमिति विचारयन्नात्मानं स्वयमात्मनैव मे परं बहुहासमुपजनयति । न जाने कियताध्वना विच्छिन्नः प्रभृति बलमनुयायि महाजवेन हीन्द्रायुधेन निमेषमात्रेणातिदूरमतिक्रामति । न चागच्छता मया तुरगवेग-
वशात्किन्नरमिथुनेन बद्धदृष्टिना अस्मिन्विरलतनुसहस्रशाखावगुल्मलतासंतानगहने निरन्तरनिपातितशुष्कपर्णावकीर्णतले महावने पन्था निरूपितो येन प्रतिनिवृत्य यास्यामि । न चास्मिन्नुद्देशे प्रयत्नेना-
पि परिभ्रमन्मर्त्यधर्मा कश्चिदासाद्यते यः सुवर्णपुरगामिनं पन्थानमुपदेक्ष्यति । श्रुतं हि मया बहुशः कथ्यमानं सुवर्णपुरं सीमा जलेश्वरायाः पृथिव्याः सर्वजनपदेभ्योऽतः परतो निर्मनुष्यमरण्यं तच्चातिक्र-
म२८ म्य कैलासगिरिरयं च कैलासगिरिरस्तादेरानीं प्रतिनिवृत्यैकाकिना स्वयमेवोत्प्रेक्ष्योत्प्रेक्ष्य स्वदक्षिणामाशां केवलमङ्गीकृत्य गन्तव्यम् । आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलमात्मनैवेति धाय्य वामकर-
कमलवलितरश्मिपाशस्तुरङ्गमं व्यावर्तयामास । व्यावर्तिततुरङ्गमश्च प्रतिनिवृत्य चिन्तितवान् । अयमुद्भासितप्रभावभास्वरो भगवान्भानुरलंकृतो दिवसश्रियो रसनामणिरिव मध्यमलंकरोति । परिश्रान्तश्चाय-
मिन्द्रायुधस्तदेनं तावद्गृहीतकतिपयदूर्वाप्रवालकवलं कस्मिंश्चित्सरसि शिशिरप्रस्रवणोदके वा सरिदम्भसि वा स्नातपीतोदकं मयनीतश्रमं च कृत्वा स्वयं चापीत्वा सलिलं कस्यचित्तरोरधः छायायां मुहूर्तमात्रं विश्रम्य ततो गमिष्या-
मीति चिन्तयित्वा सलिलमन्वेषमाणो मुहुर्मुहुर्दत्तदृष्टिस्ततस्ततः पर्यटन्नलिनीजलावगाहोत्थितस्य विपक्षकाननसंमर्दनो गिरिवरस्य वनगजयूथस्य चरणोत्साहितैः पङ्कपटलैरार्द्रीकृतं करतलावकृष्टैश्च मृणा-
लमूलनालैः कमलकलापैः कल्माषितमार्द्रार्द्रैश्च शैवलप्रवालैः श्यामलितमामृदितैश्च कुमुदकुवलयकह्लारकुड्मलैरजराजराविच्छुरितमुत्सवातैश्च सकर्दमैः शालूकैरवकीर्णमारग्वधैः स्वर्णकुसुमस्तबकसारैश्च नयद्ववैरा-
च्छादितं मातुलानीभिश्च कुसुमोपविष्टनिविष्टैर्बहुशस्तषट्पदराजिभिर्वनलताभिश्चाङ्कुलितमभिनवबकुलकुसुमपरिमलवाहिनोश्चैतमालपल्लवसश्यामेन मदजलेन सर्वतः सिक्तं मार्गमद्राक्षीत् । उपजातजलाशङ्कश्च तं प्रदेशमनुस-

स्नुद्वीवरश्रेणैरुपरिरुद्धमंडलाकारैः सरलशालशल्लकीप्रायैः खदिरपलाशैरपि निःशाखतया विरलैः रैवोपलसमानैः पादपैरनुयातेन स्थूलकपिलवालुकेन शिलातलबहुलतया विरलतृणोद्गमेन वनद्विपदमनदलितमनःशि
कादं लाधूलिकपिलेनैर्भंगिनीभिरनुकीर्णाभिः खंडपत्रभंगकुटिलाभिः पाषाणभेदकमञ्जरीभिर्जटिलीकृतशिलान्तरेण अनवरतगलद्गुग्गुलुद्रुमद्रवार्द्रीकृतदृषदा शिखरस्रुतशिलाजतुरसपिच्छिलोपलेन टंकणादूपपशु
४४ रखंडितहरितालक्षोदपांसुलेन खुनखरैरुत्खातविलविप्रकीर्णकांचनचूर्णेन सिकतानिमग्नचमरकस्तूरिकामृगखुरपंक्तिनासंकीर्णजीर्णरंकुरल्लकरोमप्रकरनिचितेन विषमशिलाच्छेदोपविष्टजीवंजीवकयुग
लेन वनमानुषमिथुनाध्यासितगुहामुखेन गंधपाषाणपरिमलामोदिना वेत्रलतावतंसप्रबद्धवेणं नाकैलाचलेनाकिंचिद्दूरं धावमानो गलितसैव कैलासशिखरिणः पूर्वोत्तरे दिग्भागे जलमरालसंजलधरव्यूहमिव
बहुलपक्षक्षपांधकारमिव पुंजीकृतं मत्स्यायतं तरुखंडं ददर्श। तं च संमुखमागतेन कुमुदरजःकषायामोदिना जलसंसर्गशिशिरेण शीकरिणा चंदनरससंस्पर्शेनेवाह्लादिना अनिलेनोपमानं खंजलतरंगमानुतेन कम
लमधुपानमत्तानां च प्रोषह्वारिभिः कलहंसानां कोलाहलैराहूयमान इव प्रविवेश। प्रविश्य च तस्य तरुखंडस्य मध्यभागे मणिदर्पणमिव त्रैलोक्यलक्ष्म्याः स्फटिकभूमिगृहमिव वसुंधरादेव्याः निर्गममार्गमि
व सागराणां निस्यन्दमिव दिशामवतारमिव गगनतलस्य कैलासमिव द्रवतामापन्नं तुषारगिरिमिव विलीनं चन्द्रातपमिव रसतामुपगतं हराट्टहासमिव जलीभूतं त्रिभुवनपुण्यराशिमिव सरोरूपेणावस्थितं वैदू
र्यगिरिजालमिव जलाकारेण परिणतं शारदभ्रवृन्दमिव द्रवीभूय एकत्र निसृष्टं दर्शनमात्रेण प्रक्षालितमिव प्रचेतसः स्वच्छतया मुनिमनोभिरिव सज्जनगुणैरिव हरिणाचीनां शुक्लैरिव हरिणलोचनप्रभाभिरिव मुक्ताफलां
शुभ्रैरिव निर्मितं आपूर्णमिव यत्र स्पष्टस्वच्छकलहंसानामन्तयोरिकैभिर्वीपैरलसमानामनिलोद्धूतजलतरंगशीकरपल्लिलवाभिः सर्वतः समुत्थितैः संकल्पमानैरिवरम्भ्रायसहस्रैः प्रतिबिम्बेनान्तः प्रविष्ट
कलकाननशैलनक्षत्रग्रहचक्रवालं भुवनमुद्भिन्नमिव संकुञ्जेनोदरेण नारायणमिव विभ्राणमासन्नकैलासावतीर्णस्य भगवतः स्वयम्परशोर्मज्जनोन्मज्जनक्षोभचालितचूडामणिखंडच्युतेनामृतरसेनेज
नक्षालितवामार्धकपोलगलितलावण्यप्रवाहानुकारिणा संमिश्रितजलमुपकूलतमालवनप्रतिबिम्बांधकारितान्यजरैरुद्धृयमानरसातलद्वारैरिव सलिलप्रदेशैर्गंभीरतरं दिवापृथुपजातनिद्राप्राकृं स्य

मिवैरावतस्य पुनरुपजातालोकासु दिक्षु सागरसलिलादिवोन्मग्नमालोक्य तदतर्कितपरिमाणं च सरलमुपजातविस्मयस्य सर्वतोदृष्टिविक्षेपमापन्नस्य चन्द्रापीडस्य मनोऽभायि। पुत्रराज किं मया जितं तेन महाराजाधिराजेन तारापीडेन यज्ञेष्वासिका
रिणोनेवशीकृतायां वशीकरिष्यसि कानि दुर्गाणि न प्रसाधितानि यानि प्रसाधयिष्यसि कानि द्वीपानि नात्मीकृतानि यान्यात्मीकरिष्यसि कानि रत्नानि नोपार्जितानि यान्युपार्जयिष्यसि के वा न प्रणमन्ति राजानः कैर्न विरचि
तः शिरसि बालकमलकुड्मलद्वसेवाञ्जलिः कैर्न मसृणिताः प्रतिबद्धहेमपट्टैर्ललाटफलकैः सभाभुवः कैर्न घृष्टाः पादपीठे चूडामणयः कैर्न प्रतिपन्ना वेत्रपदव्यः कैर्नोद्धृतानि चामराणि के नो धारितो जयशब्दः के नो नमिनिष्पीताः
किरीटपत्रमकरैः सलिलधाराइवनिर्मलाः स्वचरणनखमयूखराजयः एतैर्हि चतुरुदधिजलावगाहदुर्ललितबलैर्मदावलिप्तैर्दशरथभगीरथभरतमांधातृदिलीपालर्कप्रतिमाः कुलाभिमानिनः सोमपायिनो मूर्धाभिषिक्ताः पार्थि
वांसर्वपार्थिवश्रेष्ठाः श्रीमभिषेकपयःपातपूतैस्तैर्मूर्धाभिमणिमरीचिपत्रैरनुदिनमंगारागंभवप्रभवरणरजःसंहति मेभिरियमादिपर्वतैरिवाप्परैरनाथा धरित्री एतान्यमीषां मा प्रावितरदतदिग्जनकलानि सैन्यानि तव भवनमुपासते। तथाहि प
श्ययश्ययस्यां पश्यां दिशि विदिशिपीव संकुलस्यान्तस्यास्सातलमिवोद्भिद्यतिवसूधेव सूतेकुकुभरद्ववमंतिगगनमिववर्षति दिवसमिवसृजति वलानि। अपरिमितबलभराक्रान्तामन्ये स्मरन्ति महाभारतसमनसंक्षोभस्यांघरि
तिः। एषहिशिरोद्देशेकपरिस्खलितमंडलो धजानगणायत्रिदिवपरिभ्रमतिं कुतूहलात्कदलिकावनान्तरेषु मयूखमाली। सर्वतश्चमदजलमुखं करिण्यास्यमेलायारमलसुरभिणि वेणिकावाहिनि मदवारिणि मग्नाजिरंतरनि
पतितमधुकरकुलकलकलकलिता कालिन्दीजलकलितेव विभाति भूतधात्री। सैन्यभरसंक्षोभभयादिवहायभूमिं सरितः खं गगनमुत्पतिताः संछादयन्त्येनां दिक्चक्रवालमिन्दुधवला ध्वजपङ्क्तयः। सर्वथा विजयवर्णा यादि विघटितसकल
कुलशैलबंधाः सहस्रशः शकलीभवन्ति बलभरेणाधरित्री। पद्मवलभरपीडितवसुधाधारणविधुरानंदलब्धिक्षणिनो पत्युः फणाभिजयः। इत्येवं वदतस्तस्यपुवराजः समुच्छ्रितानेकधनोरंगांतःमयपत्राकारसहस्रसंबाधमुत्थासि
तधवलपटमंडपशतशोभिनीमावासभूमिमध्ये तस्यां च वतीर्णं राजवत्सर्वाः क्रियाश्चकार। सर्वैश्चागतैः समेत्यनरपतिभिरमात्यैश्चपरिवृतो विविधाभिः कथाभिर्विनोदयमानस्तं दिवसं मरोर्वमभिनवपितृवियोगजन्मशोकवेगेनाया
समानहृदयो दुःखेनैवातिवाहयत्। अतिवाहितदिवसश्च यामिनीमपि स्वस्रपनीयस्यान्तिके निषसादैवैशंपायनेनान्यैश्च समीपे क्षितितलविन्यस्तकुथप्रक्रमयापत्रलेखयासहाजाधिराजसर्वैरर्धमंतरमात्मसंवर्ड्ढुमंतरां शुकना

र्ममवतीर्णो अन्यथोपर्यगाधानेकपातालगंभीरमप्रसिमग्राभवेदिदं महासरः। कथमेकेनेतादृग्भिः। महावराहसहस्रैरपि नासादितो भवेन्नूनमस्मादेव सलिलादेशं मायापमहाप्रलयवेलाप्लवपयोधराः प्र

काद० लयदुर्दिनान्धकारितदिशः प्लावयन्ति भुवनान्तराणि। मन्ये च यत्तत्सलिलमयं ब्रह्माण्डमेषामादौ भुवनं मभूत् तदिदं पिण्डीभूय सरोरूपेण व्यवस्थितमिति विचारयन्नेव तस्यात्रिलाद्राकलकलकेशवालुकाप्रायं

४५ विधाधरेन्द्रनन्दनालकुवलयकलायार्चितानेकश्वेकलाङ्गमनुधवीरत्नादिनेकशार्दूपपश्च पर्यन्तरूपकमलोपशोभितमुपकूलशिलातलोपविष्टजलमानुषनिषेव्यमानातर्पमभ्यपर्णतया कैलासस्य

स्नानागतमात्तमंडलपदपंक्तिमुद्राङ्कितैमवकीर्णभस्मसूचितमग्रोत्थितगणगंदोद्भूतैर्मवगाहावतीर्णगणपतिगंडस्थलगालितमदप्रस्रवणाधिकमतिप्रमाणपदानुमीयमानत्र्यम्बकाया

पनीसिंहावतारमार्गं ददर्श। तीरमासाद्य तुरङ्गमादवततार। अवतीर्य च व्यपनीतपर्याणमिन्द्रायुधमकरोत्। क्षितितललुठितोत्थितं च गृहीतकतिपयशष्पकवलग्रासं सरोऽवतीर्य पीतसलिलमिच्छया स्ना

तं तोत्थाप्य प्रत्यासन्नसमीपवर्तिनस्तरोर्मूलशाखायामपगतखलीनं बद्ध्वा पाशेन स्वयमपि काननमध्यावतरणे वधाद्रूपाणिकावलूनान्स्पृहा च पुरतः कतिचित्सस्नौ रसप्रवालकवलान्स्व

पंचसलिलमवततार। ततः प्रक्षालितकरकमलचरणयुगलस्नातकस्वकलानजलमपमाहारवक्राहस्वाधम्यगालवाकलानि शिशिरांशुरिव करागैः स्नस्थानुमुदीनिपणीवाभिनंदाजलतरङ्ग

शतानन्दश्रमाशुरस्वरोरसि निधाय नालिनीदलोजनीयमरण्यगजदत्तलीकशर्दुष्करोपयोगभिजकरः सलिलार्द्रहस्तो। प्रत्यग्रशिशिरैः समृणालकैर्जलकणिकाचितैः कमलिनीपलाशैर्लतामंडप

परिक्षिप्ते शिलातले स्रस्तरमास्तीर्य निधाय शिरसि पिण्डीकृतमुत्तरीयं निषसाद। मुहूर्तं विश्रान्तस्य तस्य सरस उत्तरे तीरप्रदेशे समुच्चरन्तमनुभुजकवलेन निश्चलश्रवणपुटेनोन्मुखीभूतेनोद्ग्रीवेणेन्द्रायु

धेन प्रथममाकर्णितमतिश्रुतिसुभगं वीणातन्त्रीझङ्कारमिश्रममानुषं गीतशब्दमशृणोत्। कुतोऽत्र विगतमर्त्यसंपाते प्रदेशे गीतध्वनेः संभूतिरिति उपजातकौतुकः कमलिनीपत्रस्रस्तरादुत्थाय तामेव गीत

संपातसूचितां दिशं चक्षुः प्राहिणोत्। अतिदूरीयमानतया तु तत्प्रदेशस्य प्रयत्नव्यापारितलोचनोऽपि विलोकयन्न किंचिद्दद्राक्षीत्। तमेव केवलमनवरतं गीतशब्दमुपशुश्राव। कुतूहलवशाच्च गीतध्वनिप्रभवजिज्ञा

सया कृतगमनबुद्धिर्दत्तपर्याणमिंद्रायुधमारुह्य आयगीतैः प्रथमप्रस्थितैरपि वनहरिणैरुपदिश्यमानवर्त्मा सषट्पदकुलैर्लालवलीलवंगकुसुमसुरभिपरिमलयालिकुलविनुतिमुखरितया तमालनी

लया शिवगामरवीथ्येव पश्चिमया सरस्तीरवनलेखया निमित्तीकृत्य तं गीतध्वनिं प्रतस्थे। क्रमेण च सम्मुखागतैरच्छनिर्झरजलकणजालजनितनमिभिर्जर्जरितभूर्जवल्कलैर्धूर्जटिवृषभशोभमंथफेनविन्दुवाहि

भिः षण्मुखशिरश्चिरशिखाचुम्बिभिरम्बिकाकर्णपल्लवपञ्चवीच्छासदूर्वैः सुरकुरुकामिनीकर्णोत्पलप्रेङ्खोलनदोहदिभिराकम्पितकल्पलतावनैर्नमेरुमन्दारकुसुमपांसुपातिभिः पशुपतिजटा

जूटबन्धनार्तवासुकिपरिपीतशेषैराह्लादिभिः पुण्यैः कैलासमारुतैरभिनन्द्यमानो गगनाचलप्रदेशं मरकतहरितैः हारिद्राहारीतहरितैर्मणीयैर्भ्रमद्भ्रमरजनस्वरजर्जरितजरठकुमुदवैरुन्मदकोकिलकु

लकवलीकृतसहकारकोरकैरुन्मदषट्चरणचक्रवालवाचालितविकचचूतकलिकैरवकिलतचकोरचंचुचुम्बितमरिचांकुरैः ध्वपक्वपरागपुंजपिंजरकपिंजलजग्धपिप्पलीफलैः फलोत्पीडनविदारिभी

नीडप्रसूतकलविंकैः प्रक्रीडितचपलकपिलकपिकुलकम्पलमानन्तरालितता लीपुटैरन्योन्यकलहकुपितकपोतपोतपक्षपालीपतितकुसुमैः कुसुमरजोऽरण्यधिशारससारिकाश्रितशिखरैः शुक

शतनखमुखशिखरशकलितफलस्फीतैर्जलधरचिपलवमुग्धचातकधानमुखरिततमालखंडैरिभकलभकोद्भूनपल्लवोद्वेल्लितवल्लीवलयैः शालीयमानयौवनमरमत्तपारावतपत्रद्वैपपर्यस्त

लवकैस्तनुपवनकम्पितकोमलकदलीदलवीजितैरविरलफलनिकरावनतनालिकेरैर्घनैरकठोरपत्रपुटप्रगाविटपिपारिवारितैरनिवारितविहगतुरखंडितपिंडखर्जूरजालकैर्मदमुखरमयूरीमधुकरवमु १४

खरितानरासेरवकलितकविकाकलापदन्तुरैरनरातसकैलासनरंगिणीतरंगोत्तासिकतिलभूमिभागैर्वनदेवताकरतलनिवहानिभमलत्कृकजलरसासिक्तमिव किसलयनिकरमतिसुकुमारमुद्वह

द्भिर्ग्रंथिपर्णप्रासमानंदमुदितचमरीकुलनिषेवितमूलैः कर्पूरागुरुप्रायैरिंद्रायुधैरिवबनावस्थानैः कुमुदैरिवादत्तस्निकरकरनिकरप्रवेशाशिशिराभ्यंतरैर्दरिद्ररथिबलैरिवांजननीलनलपरिगत

प्रान्तैः प्रासादैरिव सपारावतैर्भवजतापसैरिवसान्निध्यनिवेत्रासनैः हरैरिवनागलतावद्धपरिकरैररधिकूलयुग्मैरिवनिरन्तरोद्भिन्नप्रवालजटाङ्कुरजालकैरभिषेककलशैरिवसर्वौषधिकुसुम

कादं॰ कदाचित्पल्लवसनाथैश्शाखानिकुंजगृहैरिव बहुवर्णचित्रपत्रशकुनिशतशोभितैः कुसुमैरिव भारद्वाजद्विजोपशोभितैर्मद्यासमयमुखैरिव पुन्नागसमालब्धमाद्रीलीमुखैर्महाकरिभिरिव प्रलंबवालपल्लवस्यस

४६ भूतलैः प्रमत्तपार्थिवैरिव पर्यन्तावस्थितवकुलगुल्मकैः पौंड्रकामैरिव भ्रमरसंहतिकवचावृतकायैः प्रयाणाभिमुखैरिव वानरकपट्टु लिप्सवपुञ्जैरवनिपालत्रयनैरिवसिंहपदाङ्कि ततलैः आरण्यं

वनपः क्रियैरिव उद्भिन्नरिव मंडलपरिहतैर्दीक्षितैरिव कृत कृष्णसारविषाणकंडूयनैर्जरद्द्रुमुनिभिरिव जटालवालकमंडलुपरिहतैरिंद्रजालकैरिव दृष्टिहारिभिः पादपैः परिहृतं चन्द्रप्रभना

म्नः पश्चिमे तीरे कैलासपादस्य ज्योत्स्नावदातया देहप्रभया धवलयन्तमेकदेशं भूतलभागस्त्रियंबकं भगवतः शूलपाणेः शून्यं सिद्धायतनमपश्यत्। तत्र च पवनोद्धूतैः सितसतः समापतद्भिः

केतकीगर्भधूलिभिर्धवलीकृयमानकायः पशुपतिदर्शनहेतोर्बलादिव प्रतियाद्यमानो भस्मव्रतमायतनप्रवेशपुण्यैरिव गल्हमानः प्रविश्य चतुःस्तंभस्फटिकमंडपिकातलप्रतिष्ठितमवि

रोद्धैरार्द्रैर्दलत्रिपुरगलज्जलबिंदुभिरर्धवियादिनचंद्रबिंबदलैरिव निजादृहासावयवैरिव शेषफणाभाकलैरिव पांचजन्यसहोदरैरिव क्षीरोदरुद्रपाकारैरिवोपपादितमौक्तिकमुकुटवि

भ्रमैरिव शुचिभिर्मन्दाकिनीपुण्डरीकैः कृताभ्यर्चनममलमुक्ताशिलाघटितलिंगमशेषभुवनवंदितचरणं चराचरगुरुं चतुर्मुखं भगवंतं शूलिनमद्राक्षीत्। तस्य च दक्षिणां मूर्तिमाश्रित्याभिमु

खीमासीनामुपरचितब्रह्मासनामतिविस्तारिणा सकलदिङ्मुखव्यापकेन परिप्लुतक्षीरपयोधिपयः पूरपांडुरेणातिदीर्घकालसंचितेन तपो एशिनेवसर्वतो विसर्पता पादपान्तराले त्रिस्रोतो

जलनिभेन विशीर्णपवहतेवदेहप्रभाप्रतानेन सगिरिकाननं दंतमयमिव तं प्रदेशं कुर्वतीमप्यथैव चवलयंतीकैलासगिरिमंतर्दुग्धपिलोचनपथं प्रविश्य धवलितमानमिव समारोपयंतीम

तिमतिबहलप्रभापरिगतदेहतया च स्फाटिकगृहगतामिव स्वच्छसलिलनिमग्नामिव विमलचीनांशुकान्तरितामिवादर्शतलसंक्रांतामिवाभ्रकपटलतिरस्कृतामिवापरिस्फुटवि

भाव्यमानावयवां पंचमहाभूतमयमपहाय पद्म्यात्मकमंगानिः पादनोपकरणकलापं धवलगुणेनेव केवलमुत्पादितां दृष्टाधरक्रियामिवोद्गतगणकचग्रहभयोपसेवितत्र्यम्बकां इतिमिव

क्रवाकमिथुनैः परित्यज्यमानानीलोत्पलगहनं भस्मकृत्यितामहपरिरक्षितकमंडलुप्लुतजलं मनेकशोवालिखिल्यकदम्बककृतसंध्योपासनं वहुशः सलिलावतीर्णसावित्रीमग्नदेवताभ्यर्चनकमलं सहस्रशः सप्तर्षिमं

डलस्नानपवित्रीकृतं सर्वदा सिद्धवधूधौतकल्पतरुवल्कलपुण्यीकृतजलं मुरकक्रीडारोहदागतानां च गुह्यकेश्वरान्तःपुरकामिनीनां मकरकेनुचापचक्राकृतिभिर्रेचितविकटैरेवतिभिर्निर्भिमं डलैर्रायीतसलिलं क्व

चिद्रनुणाहंसाक्रान्तकमलरवं क्वचिद्दिग्गजमज्जनजनितजरन्मृणालदंडं क्वचित्त्र्यम्बकवृषभविषाणकोटिखंडिततटशिलाखंडं क्वचिद्यममहिषश्रृंगाग्रशिखरविक्षिप्तफेनपिंडं क्वचिदैरावतदशनमुः

शालखंडितकुमुदखंडं यौवनमिवोत्कलिकावहुलं मुकुटितमिव प्रणालवलयालङ्कृतं महापुरुषमिव प्रकटितमीनमकरकूर्मचक्रलक्षणं धरामुखचरितमिव श्रूयमानकोञ्चवनितालापं भारतमिव पीडवधार्त

राष्ट्रकुलपक्षकलहसोर्भम्मसमथनसमयमिवोतीशावस्थितापीतकंठपीयमानदिव्यवालचरितमिवतटकदम्बशाखावाधिनरूढहरिकृतजलप्रयाणमीङ्मकरध्वजमिवमकराधिष्ठितं दिव्यमिवानिमेषलोचनकु

वलयं मरुण्यमिवविकीर्णभ्रमाणपुंडरीकं मुरगकुलमिवानन्तशतपत्रपद्मोद्भासितं कंबलमिवमधुपकुलोपगीयमानकुवलयापीडं कद्रूस्तनयुगलमिव नागसहस्रनिपीतपयोगंडूषं मलयमिव चंदन

शिशिरवनं अस्तसाधनमिवाहृष्टां तं मतिमनोहरमाह्लादनं द्वयैरच्छोदं नाम सरो दृष्टवान्। आलोकनमात्रेण वीपगतश्रमो दृष्ट्वा मनस्यकरोत्। अहो निष्फलमपि मे तुरगमुखमिथुनानुसरणमेतदालोक्य

तः सरः सफलतामुपगतं मद्य परिसमाप्तमीक्षणयुगलस्य दृष्टव्यदर्शनफलमालोकितः खलु रमणीयानामंतोः दृष्टः प्रह्लादिनीनामवधिरीक्षितं मनोहराणां सीमानलेखासंप्रह्लीकृतं प्रीतिजननानां परिस

मापिर्विलोकिता दर्शनीयानां मवसानभूमिरिदं मुत्पाद्य सरःसलिलं अमृतरसमुत्पादयता विधसा पुनरनुक्ततामिव नीतास्त्वदृष्टिः दृष्टमपि दृष्टमतमिव सर्वेन्द्रियाह्लादनसमर्थमंतिविमलतया च सुखः प्रीति

मुपजनयति शिशिरतया च स्पर्शसुखमुपहरति निष्फलं च सेवं दर्शनतृष्णयानयरिम्यतिः भगवान्कैलासनिवासव्यसनेमुमायति। नैतत्तु साम्प्रतं मोचयति जलशयनदोहदं देवोश्याङ्गपाणिर्यदिदं म

मृतरसमुरभिसलिलं मपहाय लवणरसपरुषपयसि पयस्स्वपिति नूनं नेदं प्रथमं मासीत्सरः येनप्रलयमहावराहघोणाभिघातभीता भूतधात्री कलशयोनियानपरिक्षितसकलसलिलं साग

२ कमलसुगंधितया घ्राणमाप्याययति हंसमुखरतया श्रुतिमानंदयति स्वादुतया रसनामाप्याययति २

पूर्वैरिव गीतगुणैरिव स्तुतिवर्णैरिव स्वरैरिव मूर्तिमद्भिर्मुखान्निष्पतद्भिर्दशनांशुभिः पुनरिव स्नापयंतीं गौरीपतिं अतिविमलेनाश्ववेदार्थैरिव सास्यात्पितामहमुखावलंबिभिर्गायत्रीवर्णैरिव ग्रथनामुपनी

कादं तैर्लोक्यपावनाभिः पुंडरीकबीजैरिवोद्गतैः सप्तर्षिभिरिव करस्पर्शसुखभाजमात्मानमिच्छद्भिः स्फाटिकानां रूपेण गतैरामलकीफलस्थूलैर्मुक्ताफलैरुपरचितेन स्वबलयेनाधिष्ठितकंठभागां परिवेष

४७ परिगतचंद्रमंडलामिव पौर्णमासीमधोमुखहरशिरःकपालमंडलाकारेण मोक्षद्वारकलशाकारेणातिनाखलनयुगलेनैकहंसमिथुनसनाथामिव श्वेतगंगां गौरीशसिंहसटामयेनेव चामरवी

राकृतिना स्तनयुगलमेकहंसमिथुनसनाथामिव श्वेतध्वनिबद्धमध्यग्रंथिना कल्पतरुवल्कलेन रक्तेनोत्तरीयकृत्यां अयुग्मलोचनसकाशात्प्रसादलब्धेन चूडामणिचंद्रकिरणजालेने

वमंडलीकृतेन ब्रह्मसूत्रेण पवित्रीकृतकायामाप्रपदीनेन च स्वभावधवलितेनापि ब्रह्मास्त्रबंधोत्तानचरणतलप्रभापरिष्वंगाद्लोहितायमानेन दुकूलपटेन प्रावृतनितंबां यौवनेनापि स्वकालोपसर्पि

णा निर्विकारवृत्तिनीतेनेवाराध्येनेवोपास्यमानां लावण्येनापि कृतपुण्येनेव स्वच्छात्मना परिगृहीतां रूपेणापि रुचिरलोचनेन विगतचापलेनायतनमगेणेव निर्विशेषितामुत्संगगतां वसुतामिव स्रु

शंखघटितानुकूलीयकमूलाकुलिना त्रिपुंड्रकावशेषभस्मपांडुरेण दक्षिणप्रकोष्ठबद्धशंखखंडकेन नखमयूखदंतुरतया गृहीतदंतकोणेनेव दंतमयीं दक्षिणकरेण वीणामास्फालयंतीमप्सरा

मिव गांधर्वविद्यां मणिमंडपिकास्तंभलग्नाभिश्चात्मरूपाभिः सहचरीभिरिव वीणावतीभिः प्रतिमाभिरनुयेतां स्नानार्द्रविरूपाक्षलिंगसंक्रांतप्रतिबिंबतया प्रकटभक्त्या साधितसहृदयमिव मरिचांहरस्य हारल

तयेव प्राप्तकंठयोन्मत्तयेवानेककृततालया मीमांसयेवानेकभागानुविद्धया गीत्या देवं पिबमात्मनुपवीणयंतीमतिमधुरगीताकृष्टैर्ध्यानमिवाभ्यसद्भिर्निश्चलकर्णपुटैर्मृगैरपरैश्च वानरचारणगणैरमसिंहप्रभृतिभि

र्वनचरैराबद्धमंडलैराकर्ण्यमानगीतानुविद्धविपंचीघोषाममरापगामिव नभसोवतीर्णां दीक्षितवाचमिवाप्राकृतां त्रिपुरदहनशरशलाकामिव तेजोमयीं पीतामृततामिव विगततृष्णामीशानशिरः

शशिकलामिवानुपजातरागां अमथितोदधिसंपदमिवानःप्रसन्नां समस्तरूपदर्शनमिव निद्रांतवोद्धबुद्धिमिव निखलम्वनांवे देहीमिव प्राप्तज्योतिःप्रवेशां घृतकलानुरक्तामिव वशीकृता

+ह्लस्वरूपां महीमिव जलधौतदेहां हिमसमयदिनमुखलक्ष्मीमिव पीतभास्करातपां आर्यामिव समुपात्तपतिगणोचितमात्रामालिखितामिव वलावस्थानामंशुमयीमिव तनुच्छायानुलिप्तमस्तकांगां निर्मांसनि

रंकुकारां निर्मांसधमं मानुषाकृतिं दिव्यत्वादपरिज्ञायमानवयःप्रमाणामष्टादशवर्षदेशीयामिवोपलक्ष्यमाणां प्रतिपन्नयामुपतपसां कन्यकां ददर्श। ततोवतीर्य तरुशाखायां बद्धतुरंगस्समुपसृत्य भ

गवते भक्त्या प्रणम्य त्रिलोचनाय तामेव दिव्ययोषितमनिमिषपक्ष्मणा विश्वचलनिबद्धलक्ष्येण चक्षुषा पुनर्निरूपयामास। आसीच्चास्य तस्या रूपसंपदा कांत्या प्रशांत्या चाविर्भूतविस्मयस्य मनसि। अ

हो जगति जंतूनामसमर्थितोपनतान्यापतंति वृत्तांतराणि॥ ॥तथा हि॥ ॥मयामृगयापापीयसा यदृच्छयानिरर्थकमनुबध्नता तुरगमिथुनमतिमनोहरोमानवानामगम्योदिव्यजनसंचरणसंचरणोचि

तः प्रदेशो वीक्षितः। क्षिते। अत्र च सलिलमन्वेषमाणेन हृदयहारि सिद्धजनोपभुक्तजलं सरो दृष्टं। ततो रहस्यवीतिश्रान्तेन च मानुषगीतमाकर्णितं। तदनुसरता मानुषदुर्लभदर्शना दिव्यकन्येयमा

लोकिता। नहि मे संशय आसीदस्या दिव्यतां प्रति। आकृतिरेवानुमापयत्यमानुषतां कुतश्च मर्त्यलोके संभूतिरेवंविधानां गांधर्वध्वनविशेषाणां। तद्यदि मे सहसादर्शनपथान्नापयाति नारोहति कैलासशि

खरं नोत्पतति वा गगनतलं ततः कात्वं किमभिधाना वा किमर्थं वा प्रथमे वयसि प्रतिपन्नासि व्रतमिति सर्वमेतदेनामुपसृत्य पृच्छामि महानयमवकाशः आश्चर्याणामित्यवधार्य तस्यामेव स्फटिकमं

डपिकायामन्यतमस्तंभमाश्रित्य समुपविष्टो गीतसमाप्तिं प्रतीक्षमाणस्तस्थौ। अथ गीतावसाने मूकीभूतवीणा विश्रांतमधुकररुतेव कुमुदिनी सा कन्या समुत्थाय प्रदक्षिणीकृत्य कृतहर

प्रणामा परिवृत्य स्वभावधवलया नयनप्रभावप्रवाहेण दृष्ट्या समाश्वासयंतीव पुण्यकरैरिव स्पृशंती तीर्थजलैरिव प्रक्षालयंतीव तपोभिरिव पावयंती शुद्धिमिव कुर्वाणा वरदानमिवोपपादयं

ती पवित्रतामिवोपनयंती चंद्रापीडमावभाषे। स्वागतमतिथये कथमिमां भूमिमनुप्राप्तो महाभाग तदुत्तिष्ठ गम्यतामनुभूयतामतिथिसत्कार इत्येवमुक्तस्तु तया संभाषणमात्रेणैवानुगृहीतमात्मानं

मन्यमानः समुत्थाय भक्त्या कृतप्रणामो भगवति यथाज्ञापयसीत्यभिधाय सविनयं शिष्यदूरवतां व्रजंतीमनुवव्राज। व्रजंश्च समर्थयामास। हंत तावन्न मामियं दृष्ट्वा तिरोभूता तिरस्काभृता कृतिः कु

कादं तमेवमनसिकुर्वन्नुत्फुल्लप्रफुल्लप्रच्छायायापादपं पथा चैवमस्याश्चतपस्विजनदुर्लभदिव्यरूपाया अपि दाक्षिण्यातिशयप्रतिपत्तिरभिमाना विभाव्यते। तथा संभावयामि नियतमियं मामभ्यागतं निरीक्ष्य मभ्यर्थ्यमाना कथयिष्य
५८ तीत्येवं च कृतमतिः पदशतमात्रमिव गत्वा निरन्तरैर्दिवापि रजनिसमयमिव दर्शयद्भिस्तमालतरुभिरन्धकारितपुरोभागामुत्फुल्लकुसुमैस्फलजालिकुंजेषु कूजत्ताम्रमत्तमधुलिहां विनुतिभिर्मुखरीकृतपर्य
न्तामतिहृद्यां तिनीं चन्द्रशिलाफलकप्रतिघातफेनिलानामपां प्रस्रवणेनानुकोटिग्रावविरंकविपाद्यमानेनुद्धूततरङ्गध्वनिभिरवकीर्यमाणतुषारशिशिरशीकरासारेणावबध्यमानजीमूताहारेहिमगृहमिवहरहासधवले भयतः
स्पन्दिनिर्झरैर्धाराबलम्बितचलच्चारुचामरकलापामिवोपलक्ष्यमाणामन्तःस्थापितमणिकमण्डलुमण्डलामेकाजावलम्बितयोगपट्टां विषाणिकाशिखरनिबद्धनारिकेलीवल्कलमयधौतोपानद्युगोपेता
मवशीर्णाद्भुभस्मधूसरबल्कलग्रथनीयसनाथैकदेशामिदुमण्डलेनेव टंकोत्कीर्णेन शंखमयेन भिक्षाकपालेनाधिष्ठितां सन्निहितभस्मालाबुकां गुहामद्राक्षीत्। तस्याश्च द्वारशिलातलेसमुपविष्टो बल्क
लशयनशिरोभागविन्यस्तवीणां पर्णपुटेन निर्झरादच्छसलिलमादाय तां कन्यकां समुपस्थितां अलमलमतिनियन्त्रणया कृतमतिप्रसादेन भगवति प्रसीद। विमुच्यतामयमत्यादरः स्वल्पदीयमालोक
नमपि सकलपापप्रशमनमघमर्षणमिव पवित्रीकरणाय समास्यतामित्यब्रवीत्। अनुबध्यमानश्च तया तां सर्वामतिथिसपर्यामतिदूरादवनतेन शिरसा सप्रश्रयं प्रतिजग्राह। कृतातिथ्ययातया हि
तीयशिलातलोपविष्टया क्षणमिव तूष्णीं स्थित्वा क्रमेण परिपृष्टो दिग्विजयादारभ्याकिन्नरमिथुनानुसरणप्रसंगेनागमनमात्मनः सर्वमाचचक्षे। चिरं स्थित्वा नातिदूरोत्थाय ताक ...न्यका भिक्षाकपालमा
दाय तेषामापतनतरुणां तलेषु विचचार। अचिरेण तस्याः स्वयमेव पतितैः फलैरापूर्ण भिक्षाभाजनम्। आगम्य च तेषां फलानामुपभोगाय नियुज्यते स्म चन्द्रापीडं। आसीच्च तस्य मनसि नास्ति खल्वसा
ध्यं नाम तपसां किमतः परमाश्चर्यं यत्र विचेतना अपि सचेतना इवास्ये भगवत्यै सरजन्तः फलानि अनुग्रहमुत्पादयन्ति वनस्पतयः। चित्रमालोकितमस्माभिरनालोकितपूर्वमित्यधिकजनितविस्म
यश्चोत्थाय तमेव प्रदेशमिन्द्रायुधमानीय व्ययगतपर्याणमनतिदूरे संनियम्य निर्झरजलनिर्वर्तितस्नानविधिस्तान्यमृतरसस्वादून्युपभुज्य फलानि पीत्वानुषारशिशिरं प्रस्रवणजलमुपस्पृश्यैका

मदनदेहनिमित्तमात्मबहुरणार्थेनां क्षीरोदाधिदेवतामिव सहस्रवासपरिचितहरचन्द्रलेखोत्कण्ठामिन्दुमूर्तिमिव स्वर्भानुभयकृतत्रिनयनप्रणामैरावतदेहच्छविमिव गजाजिनावगुण्ठ
नोत्कंठितशिखिकण्ठचिन्तितोपनीतां पशुपतिदक्षिणमुखहासच्छविमिव निर्गमिष्यताम्‌ वयस्यानां शरीरिणीमिव रुद्रोद्धूलनभूतिमाविर्भूतां ज्योत्स्नामिव हरकण्ठान्धकारविघटनोद्यमप्राप्तां
गौरीमनःशुद्धिमिव कृतदेहपरिग्रहां कान्तिकेय कृतकौमारव्रतक्रियामिव मूर्तिमतीं गिरिशवृषभदेहद्युतिमिव पृथगवस्थितामायतनतरुकुसुमसमृद्धिमिव शंकराभ्यर्चनाय स्वयमुद्यतां पितामहतपः
सिद्धिमिव महीमवतीर्णामादियुगप्रजापतिकीर्तिमिव सप्तलोकभ्रमणखेदविश्रान्तां त्रयीमिव कलियुगधर्मक्लेशशोकगृहीतवनवासामायामिव कृतयुगबीजकलामिव प्रमदारूपेणावस्थितां देहवती
मिव मुनिजनध्यानसंपदममरगजवीथीमिवाभ्रगंगाभ्यागमनवेगपातितां कैलासशियमिव दशमुखभुजोन्मूलनक्षोभनिपतितां श्वेतद्वीपलक्ष्मीमिव द्वीपान्तरालोकनकुतूहलागतां शेषशरी
रच्छायामिव रसातलमपहाय निर्गतां मृणालायुधदेहप्रभामिव मधुमदविघूर्णनायाः सविगलितां काशकुसुमदिङ्‌मुखकान्तिमिव शरत्समयमुदीक्षमाणां शुक्लपक्षपरम्परामिव पुञ्जीभूतां सर्वहंसेरि
वधवलतया कृतसंविभागां धर्मस्य हृदयादिव निर्गतां शंखादिवोत्कीर्णां मुक्ताफलादिवाकृष्टाम्‌ मृणालैरिव विरचितावयवां दन्तपत्रैरिव घटितामिन्दुकूर्चकैरिव प्रक्षालितां वर्णसुधाछटाभिरिव छुरितां छु
रितामसृतफेनपिण्डैरिव पाण्डुरीकृतां पारदरसधाराभिरिव धौतां रजतद्रवेणेव निर्मृष्टां चन्द्रमण्डलादिवोत्कीर्णां कुटजकुन्दसिन्दुवारकुसुमच्छविभिरिवोद्धूलितामिव पन्नगामिव धवलिम्नः स्कन्धावलम्बिनीभि
रुदयतटास्तार्कबिम्बारुद्धत्वबालरश्मिभिरिव निर्मितामिन्दुप्रभाजटिलैस्तेजसा भाभिरविरलानावस्थितविरलवारिकणतया प्रणामलग्नपशुपतिचरणभस्मरेणुभिरिव जटाभिरुद्भासितशिरो
भागां जटापाशग्रथितभुजगमाङ्गेन मणिमयेनामांकमीश्वरचरणद्वयमुद्वहन्तीं श्वेतरथतुरगखुरक्षुण्णनक्षत्रक्षोदविशदेन भस्मस्नानकृतललाटपट्टिकां शिखरशिलाभिषङ्गग्रप्रार्द्धकलाभि
वन्दीलग्नमेखलामतुलभक्तिप्रसाधिततया दक्षीकृतलिङ्गया द्वितीययेव पुण्डरीकमालया दृश्यां संभावयन्तीं भूतनाथमनवरतगीतस्फुरिताधरपुटव्यक्तदन्तरुचिभिः स्फटिकदर्पणमणिम

वाष्पजलधारासंतानापिकिंचित्कथायितोद्देशस्यास्यलोचनेवल्कलोपान्तेनवदनमवमृज्यदीर्घमुष्णंचनिःश्वस्यशनैःशनैःप्रत्यवादीत्।राजपुत्रकिमनेनातिनिर्घृणस्यमममंदभाग्यायाःपापायाममजन्मना·वैरा
का·दं· ग्यवृत्तान्तेनवाश्रवणीयेनश्रुतेनतथापियदिमहत्कुतूहलंतत्कथयामिश्रूयतामेतत्प्रायेणकल्याणाभिनिवेशिनःश्रुतिविषयमापतितमेवयथाविबुधसद्मन्यप्सरसोनामाःकन्यकाःसंतीति।तासांचतुर्दशकु
४९ लान्येकंभगवतःकमलयोनेर्मनसःसमुत्पन्नं·मन्यद्वेदेभ्यःसमुद्भूत·मन्यदग्नेरुद्भूत·मन्यत्पवनात्प्रसूत·मन्यदमृतमथ्यमानादुत्थित·मन्यज्जलाज्जात·मन्यदर्ककिरणेभ्योनिर्गतः·मन्यत्सोमरश्मिभ्योनिष्प
तितं·मन्यद्भूमेरुद्भूतः·मन्यत्सौदामिनीभ्यःप्रवृत्त·मन्यन्मृत्युनानिर्मित·मन्यन्मकरकेतुनासमुत्पादित·मपरमपिदक्षस्यप्रजापतेरतिप्रभूतानांसुतानांमध्येद्वेसुतेमुनिररिष्टाचबभूवतुस्ताभ्यांगंधर्वैः
सहकुलद्वयंजातमेवमेतान्येवचतुर्दशकुलानि।गंधर्वाणांतुदक्षात्मजाद्वितयसंभवंतदेवकुलद्वयं।तत्रमुनेस्तनयश्चित्रसेनादीनांभ्रातॄणांपंचदशानामधिकोगुणैःषोडशश्चित्ररथोनामसमुत्पन्नःसकल
त्रिभुवनप्रख्यातपराक्रमोभगवतासुरवरमौलिमालालालितचरणनलिनेनाखंडलेनसुहृच्छब्देनोपबृंहितप्रभावःसर्वेषांगंधर्वाणामाधिपत्यमखिलमवापीविनिचयमेवचक्रितेनबाहुनासमुपा
र्जितंशौर्यवद्वावासवान्।इतश्चनातिदूरेणास्माद्भारतवर्षादुत्तरेणानंतरेकिंपुरुषनाम्निवर्षेवर्षपर्वतोहेमकूटोनामनिवासस्तत्रतद्भुजयुगलबलपरिपालितान्यनेकानिगंधर्वसहस्राणिप्रतिवसन्ति।तेनैवेदंचै
त्ररथंनामकाननमतिमनोहरमिदंचाच्छोदाभिधानमतिमहत्सरःखानितमयंचभवानीपतिरुपरचितोभगवान्।अरिष्टायास्तुपुत्रस्तुंबुरुप्रभृतीनांसोदर्याणांषण्णांज्येष्ठोहंसोनामगंधर्वस्तस्मिन्द्वितीयेगं
धर्वकुलेगंधर्वराजेनचित्ररथेनाभिषिक्तोबालएवराज्यपदमासादितवान्।अपरिमितगंधर्वपरिवारस्यतस्यापिसएवगिरिरधिवासः।यत्तुतत्सोममयूखसंभूतमप्सरसांकुलंतस्मात्किरणजा
लानुसारविगलितेनसकलेनेवरजनिकरकलाकलापलावण्येननिर्मितात्रिभुवननयनाभिरामाभगवतीद्वितीयागौरीवगौरीनामहिमकरकिरणावदाततनौकैवसुताप्रसूता।तांचद्वितीय
गंधर्वकुलाधिपतिर्हंसोमंदाकिनीमिवक्षीरोदसागरःप्रणयिनीमकरोत्।सातुभगवतामकरकेतनेनशरत्समयेनेवकमलिनीहंसेनसहसंयोजिता।सदृशसमागमोपजनितामतिमहतीमुप

गतवतीमुदंनिखिलान्तःपुरस्वामिनीचतस्याभवत्।तयोश्चतादृशोर्महात्मनोरहमीदृशीविगतलक्षणाशोकायकेवलमनेकदुःखसहस्रभाजनमेकैवदुहितासमुत्पन्ना।तातश्चानपत्यतयासुतजन्मातिरिक्ते
नमहोत्सवेनमज्जन्माभिनंदितवान्।अवापेचदशमेहनिकृतपयोचितसमुचिताचारोमहाश्वेतेतियथार्थमेवनामकृतवान्।साहंपितृभवनेबालतयाकलमधुरप्रलापिनीवीणेवगंधर्वाणामंकादंकंसंच
रंतीअविदितशोकायासमतिमनोहरंशैशवमतिनीतवती।क्रमेणाचकृतमेवपुष्पितवसंतइवमधुमासेनमधुमासइवनवपल्लवेननवपल्लवइवकुसुमेनकुसुममिवमधुकरेणमधुकरइवमदेनन
वयौवनेनपदं।अथाविजृंभमाणनवनलिनवनेषुअकठोरचूतकलिकाकलापकृतकार्मुकोत्कलिकेषुकोमलमलयमारुतावतारतरंगितानंगध्वजांशुकेषुमदकलितकामिनीगंडूषसीधुसेकपुल
कितबकुलेषुमधुकरकुलकलंककालीकृतकालेयकुसुमकुड्मलेषुअशोकतरुताडनरणितरमणीयरमणीमणिनूपुरसहस्रमुखरेषुमुकुलपरिमलपुंजितालिजालमंजुसिंजितसुभग
सहकारेषुविविधकुसुमधूलिवालुकापटलधवलितधरातलेषुअसकृन्मधुमदविडंबितमधुकरीकदम्बकसंगाद्यमानलतादोलेषुउत्फुल्लपल्लवचयलीयमानमत्तकोकिलोद्भासितम
धुशीकरेषुद्दाममदनिक्रोधितजनजायाजीवोपहाररसमन्मथेषुमन्मथास्फालितचापरवभयस्फुरितपथिकहृदयघिसर्ग्मार्गेषु·अविरतपतत्कुसुमशरपतत्रिपत्रसूत्कारवधिरीकृतदिङ्मुखेषुदिवापि
प्रवृत्ताजर्भरेनरागांधाभिसारिकासार्थसंकुलेषुउद्वेलरतिरसमागरसंघातिकसकलजीवलोकहृदयानंदेषुमधुमाससवासरेषुएकदाहममंबयासहमधुसमयविस्तारितशोभंप्रफुल्लनवनलिनकुमुदकु
मुदकुवलयमिदमच्छोदंसरःस्नातुमभ्यागमं।अत्रचस्तनार्थमभ्यागतपभागवत्याःपार्वत्याःतटशिलातलेषुविलिखितानिसंभंगवीचीनियांभुनिमग्नकृशायदमंगलानुमितमुनिप्रणामप्रदक्षिणा
निमग्नकप्रतिबिंबानिवन्दमानाभ्रमरभुग्नगर्भकेसरकुसुमरम्योपलतामंडपःपरभृतनखकोटिपाटितकुड्मलविवरविगलितमधुधारःकुसुमितोयंतरुः।उन्मदमयूरकलकलभीतभुजंगाकुलमुक्त
ताशिशिरेयंचंदनवनवीथिका।विकचकुसुमपुंजपातसूचितवनदेवतासंचारोलताशोभनेयंलतादोला।बहलकुसुमरजःपटलमग्नकलहंससपदलेखमतिरमणीयमिदंतीरतरुतलमितिस्निग्धमनोह

का॰द॰ स्तबकोद्देशाद्भिनन्दिमन्दद्यासहस्रसखीजनेनव्यचरं। अथैकस्मिंश्च प्रदेशे ऽभ्यधिकवनानिलोपनीतं निर्भरविकसितेऽपि कानने ऽभिभूतान्यकुसुमपरिमलं विसर्पन्तमतिसुरभितया ऽलिम्पन्तमिव तर्पयन्तमिव घ्रा
५० णेन्द्रियमहमहमिकया मधुकरकुलैरनुबध्यमानमनाघ्रातपूर्वममानुषोचितं कुसुमगन्धमजिघ्रं। कुतोऽयमित्युपारूढकुतूहला चार्धमुकुलितलोचना तेन कुसुमगन्धेन मधुकरीवाकृष्यमाणा कौतुक
तरलतासमधिकतरोपजातनूपुरमणिझणत्काराकृष्टसरःकलहंसका निकतिचित्पदानि गत्वा हरहुंकाराग्निनैव नीकृतमदनशोकविक्लवं वसन्तमिव तपस्यन्तमखिलमंडलद्युत्या स्पर्धमिवाम्
शिरःशशाङ्कमिव धनवनमयुम्नलोचनं वशीकर्तुकाममिव सनियममतितेजस्वितया प्रचलिततडिच्छटापंजरगतमिव ग्रीष्मदिवसकरमंडलोदरप्रविष्टमिव ज्वलनज्वालाकलापमध्यस्थि
तमिव विभाव्यमानं अग्निखंड्याववहुलया दीप्यालोककपिलया देहप्रभया कपिलीकृतकाननं कनकमयमिव तं प्रदेशं कुर्वाणं रोचनारसलुलितप्रतिसरकुमारपिङ्गलजटं पुण्यपताका
यमानया सरस्वतीसमागमोत्कंठाकृतचन्दनललाटिकयेव भस्मलेखया वालपुलिनेरव येव गंगाप्रवाहमुद्वहन्तमनेकपापमुकुटिभवनतोरणेन भ्रूलतान्दृयेन विराजितमत्यायतया
लोचनमयीं मालामिव ग्रथितामुद्वहन्तं सर्वहरिणैरिव दत्तलोचनशोभासंविभागमायततुंगघ्राणवंशमप्राप्तदपप्रवेशेन नवयौवनराजेनेव सर्वात्मना पाटलीकृताधररुचमनुद्भिन्नश्म
श्रुत्वादनासादितमधुकरावलीवलयपरिचयविलासमिव कालकमलमाननं दधानमनंगकार्मुकगुणेनेव मंडलीकृतेन तनयस्त्रजा गकमलिनीमृणालेनेव यज्ञोपवीतेनालंकृतमेकेन सनालकमकुलय
लाकारकमंडलुमपरेणामकरकेनतुविनाशशोकनुदितायास्तेरिव वाष्पजलविंदुभिराचितां स्फटिकाक्षमालिकां करेणाकलयन्तमनेकविधायगासंगमावर्तिनिमयानाभिमुद्दृयेवोपशोभमानमतर्द्रो
ननिशाकृतस्य मोहान्धकारस्यापयानपदवीमिवान्तर्नरञ्जोलेखाश्यामलां रोमराजिमुद्वहन्तं नीयसा विभाणमात्मतेजसा विजितपरुषवितारमारहीतेन परिवेषमंडलेनेव मौञ्जेन मेखलागुणेन
परिक्षिप्तजघनभागमभ्रगंगास्रोतोजलक्षालितेन जरच्चकोरलोचनपुटपाटलकान्तिना मन्दारवल्कलेनोपपादितांवरप्रयोजनमलङ्कारमिव ब्रह्मचर्यस्य यौवनमिव धर्मस्य निवासमिव सरस्वत्याः स्वयं

नेतावदुपनस्थे। यावत्तपाधिकन्यकाकृतश्च फलमूलमयेषाहारेषु प्रणयपरतिपरिसमाप्ताहाहारानिर्वर्तितसंध्योचितेतिकर्तव्यतां च शिलातलोपविष्टामुपविश्यांगिनिभृतमुपसृत्य ना
तिदूरे समुपविश्य मुहूर्तमिव स्थित्वा चन्द्रापीडः सविनयमवादीत्। भगवति त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेनाकुलीक्रियमाणो मानुषस्वभावसुलभो लघिमा बलादनिच्छन्तमपि मां
प्रश्नकर्मणि नियोजयति। जनयति हि प्रभुप्रसादलवोऽपि प्रागल्भ्यमधीरप्रकृतेः स्वल्पाप्येकदेशावस्थानकालकृता परिचयमुत्पादयति। अणुरप्युपचारपरिग्रहः प्रणयमारोपयति
यदि नातिखेदकरमिव ततः कथितेनात्मानमनुग्राह्यमिच्छामि। अतिमहत्खलु दर्शनात्प्रभृति मे कौतुकमस्मिन्नविषये। कतरं मरुतामृषीणां गन्धर्वाणां गुह्यकानामप्सरसां वा कुलमनुग
हीतं भगवत्या जन्मना। किमर्थं वाऽस्मिन्कुसुमसुकुमारे नवे वयसि व्रतग्रहणं धृतं। क्वेदं वयः क्वेयमाकृतिः क्वायं लावण्यातिशयः क्वेयमिन्द्रियाणामुपशान्तिः आश्चर्यभूतं मे प्रतिभाति। किं निमित्तं
वानेकसिद्धसाध्यसंबाधानि सुरलोकसुलभान्यपहाय दिव्याश्रमपदान्येकाकिनी वनमिदममानुषमधिवससि। कश्चायं प्रकारो यन्नैरेव पंचभिर्महाभूतैरारब्धमीदृशं धवलतां धत्ते शरीरं।
नेदमस्माभिरन्यत्र दृष्टश्रुतपूर्वमपनयतु नः कौतुकमावेदयतु भगवती सर्वमिदमित्यभिहिता साकिमर्थं तद्ध्यायन्ती तूष्णीं मुहूर्तमिवास्थित। ततः स्थूलस्थूलैरन्तर्गतां हृदयशोकद्रुमिव दाहायनिर्गच्छद्भिरिन्द्रियप्रसादमिवव
र्षद्भिरुपोरसनिस्यन्दमिवस्रवद्भिर्लोचनविषयं धवलिमानमिव द्रवीकृत्य पातयद्भिः स्वच्छैरमलकपोलस्थलस्खलितैस्त्वशीर्णहारमुक्तामुक्ताफलतरलपातैरवद्धविन्दुभिर्वल्कलाप्तकुचशिखरजनीरितप्रीक
रैरश्रुभिरामीलितलोचना निःशब्दं रोदितुमारेभे। तां च रुदितां दृष्ट्वा चन्द्रापीडः स्वलक्षणमचिन्तयत्। अहो दुर्निवारतां व्यसनोपतापानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मीकुर्वन्ति। सर्वथा न कंचिन्न स्पृश
न्ति शरीरधर्माणामुपतापाः। बलवती हि द्वन्द्वानां प्रवृत्तिः। इदमपरमधिकतरमुपजनितमतिमहन्मनसि कौतुकमस्या वाष्पसलिलपातेन। न ह्यल्पीयसा शोककारणेन त्रैलोक्येऽप्येवंविधा मूर्तयः। न हि चुद्र कि २
निर्घातपाताभिहता चलति वसुधेति संवर्धितकुतूहलश्च शोकस्मारणहेतुतां समुपगतमपराधिनमिवात्मानमवगच्छन्नुत्थाय प्रस्रवणादञ्जलिना मुखप्रक्षालनोदकमुपनिन्ये। सा तु तदनुरोधाद्विछिन्न

रागिणोपदिश्यमाना किमन्येनैव केनापि प्रकारेणाहमपि न जानामि कथं कथमपि तमतिचिरं व्यलोकयं ॥ उत्क्षिप्य नीयमानेव तत्समीपमिन्द्रियैः पुरस्तादाकृष्यमाणेव हृदयेन पश्चतः प्रेर्यमाणेव पुष्पधन्व
कादं नाकथमपि मुक्तप्रयत्नमात्मानमधारयं ॥ अनन्तरं च मे तन्मदनावकाशमिव दातुमाहितसमुकम्पा निरीयुः श्वासमरुतः ॥ साभिलाषं हृदयमाख्यातुकाममिव स्फुरितमुखमभूत्कुचयुगलं ॥ स्वेदसलिल
५९ लेखाशालिनेवाङ्गलग्नेन ॥ मकरध्वजशरनिकरनिपातत्रस्तेवाकम्पत गात्रयष्टिः ॥ तद्रूपातिशयं द्रष्टुमिव कुतूहलादालिङ्गनलालसेभ्योऽङ्गेभ्यो निरगाद्रोमाञ्चजालकं ॥ अशेषतः स्वेदाम्बुसाधौ
तच्चरणयुगलाखिन्नहृदयमाविशद्रागः ॥ आसीच्च मम मनसि शान्तात्मनि दूरीभूतसुरतव्यतिकरेऽस्मिन्जने मां क्षिपता किमिदमनार्येणारब्धमसमञ्जसं हतकेन ॥ एवं च नामातिमुग्धं हृदयमङ्ग
नाजनस्य यदनुरागविषयोपपत्तिमपि विचारयितुं नालं ॥ क्वेदमतिभास्वरं धाम तेजसां तपसां च क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिस्पन्दितानि ॥ नियतमयं मामेवं मकरलाञ्छनेन तिर
स्क्रियमाणामुपहसति मनसा ॥ चित्रं चेदं यदहमेवमवगच्छन्त्यपि न शक्नोम्यात्मनो विकारमुपसंहर्तुं ॥ अन्या अपि कन्यकास्त्रपामपहाय स्वयम्वरमुपयाताः पतीनन्या अथ नेन दुर्विनीतेन मकरकेतुनोन्मत्तीकृ
तानायेन पुनरहमेका यथा कथमपि नेन दृष्टेनाकारमात्रालोकनाकुलीभूतमेवमेव स्वतन्त्रतामुपैत्यन्तःकरणं ॥ कालो हि गुणाश्च दुर्निवारतामारोपयन्ति मदनस्य ॥ सर्वथा यावदेव स चेतनास्मि यावदेव स
चेतनास्मि यावदेव च मे न परिस्फुटं मनेन विभाव्यते मदनदुश्चेष्टितलाघवं तावदेवास्मात्प्रदेशादपसर्पणं श्रेयः ॥ कदाचिदनभिमतमस्य विकारदर्शनकुपितोऽयं शापाभिशङ्कां करोति मामिहरकोपा
हि मुनिजनप्रकृतिरित्यवधार्यापसर्पणाभिलाषिण्यहमभवं ॥ अशेषजनपूजनीया चेयं जातिरितिचिन्त्य तान्मुखान्दनाकृष्टदृष्टिप्रसरमचलितपक्ष्माणमदृष्टभूतलमीषदुच्छ्वसितकर्णपल्लवो
न्मुक्तकपोलमंशुमालोलालकलतालसत्कुसुममंसदेशलोलायितमणिकुण्डलमस्मै प्रणाममकरवं ॥ अथ कृतप्रणामायां मयि दुर्लङ्घ्यशासनतया भगवतो मनोभुवो मदवजननतया च मधुमास
स्यातिरमणीयतया तस्य प्रदेशस्याविनयबहुलतया च नवयौवनस्य चञ्चलप्रकृतितया चेन्द्रियाणां दुर्निवारतया च विषयाभिलाषाणां दुर्वारतया च चपलायमानमनोरञ्जनतया भवितव्यतया

चतस्र एव वस्तुनः किं बहुना मम भागधेयदोषात्तस्माद्देशस्य वेदेशस्य च सा रसविद्धिजातमपि माद्रिकारदर्शनापहृतधैर्यं प्रदीपमिव पवनस्तरलतामनयदनङ्गः ॥ तदा तस्याप्यभिनवागतं मदनं प्रत्युद्गतानि
वरोमोद्गमो मम सकाशमभिप्रस्थितस्य मनसो मार्गमिवोपदिशन्निः पुरः प्रवर्तमानश्वासवेगपथप्रहीताव्रतभङ्गभीतेवाकम्पत करतलगता चाक्षमाला ॥ द्वितीये च कर्णावतंसकुसुममञ्जरीकपोलतला
संगिनी समदृश्यत श्रमसलिलशीकरजालिका ॥ मद्दर्शनप्रीतिविस्तारितस्य चोत्तानतरलतारकस्य पुण्डरीकमयमिव तमुद्देशमुपदर्शयतो लोचनयुगलस्य विसर्पिभिरंशुसंतानैरपि दूषयाच्छोदसलि
लमपहाय नीलोत्पलदलैरिव गगनतलमुत्पतितैरापूर्यन्त दश दिशः ॥ तथा तु तस्यातिप्रकटया विकृत्या द्विगुणीभूतमदनवेगा तत्तस्याहमवर्णनयोग्यां काममप्यवस्थामन्वभवं ॥ इदं च मनसाकरवं ॥ अने
कसुरतसमागमलालसलीलोपदेशो या ध्यायो मकरकेतुरेव विलासानुपदिशति ॥ अन्यथा विविधरसासंगलालितेषु दूरेषु युवतिकेषु प्रबुद्धबुद्धेरस्य जनस्य कुतः हृदयमनभ्यस्तारतिरसनिस्यन्दमिव द्रवतप्पर
तमिव वर्षतीमदनमुकुलितेव खेदालसेव निद्राजडेवानन्दभरमन्थरतरसंचारिणी पक्ष्मतम्रलता लासिनी दृष्टिः ॥ कुतश्चेदं मतिनैपुण्यं यच्च दृष्टेव चानन्दरसमेव मन्तर्गतो हृदयाभिलाषः कथ्यते ॥ लब्धावस
रा चोपसृत्यान्तं द्वितीयमस्य सहचरं मुनिकुमारकं प्रणाममपूर्वमपृच्छं ॥ भगवन्किमभिधानः कस्य वायं तपोधनयुवा किं नाम्नश्चतरोरियमनेन कर्णावतंसीकृता कुसुममञ्जरी ॥ जनयति मे महत्कौतुकमस्याः
समुत्सर्पत्रसाधारणः सौरभोपमनाघ्रातपूर्वो गन्धः इति ॥ स तु मामीषद्विहस्याब्रवीत् ॥ बाले किमनेन पृष्टेन प्रयोजनं ॥ अथ कौतुकं भवेदयमभिप्रयतामस्ति सकलत्रिभुवनप्रख्यातकीर्तिः सुरासुरसिद्धगं
धर्वविद्याधरवृन्दवन्दितचरणयुगलो महामुनिर्दिव्यलोकनिवासी श्वेतकेतुर्नाम तस्य भगवतः सकलसुरलोकसुन्दरीहृदयानन्दकरमशेषत्रिभुवनसुन्दरमतिनलकूबरं रूपं स कदाचिद्देवतार्चनकुसुमान्युद्धर्तुमैरा
वतमदबिन्दुचन्द्रकशतशबलितजलां ह्रदहसितसितजलौतसंमन्दाकिनीमवततार ॥ अवतरन्तं च तं तत्राकमलवने प्रसत तत्सन्निहिता विकचसहस्रपत्रपुण्डरीकोपविष्टा देवी लक्ष्मीर्ददर्श ॥ तस्यास्तु तमालोकयन्त्याः
प्रेममन्दमुकुलितेनानन्दबाष्पतरङ्गिततरलतारकेण लोचनयुगलेन रूपमास्वादयन्त्याज्जम्भिका मन्मथरसमुखविन्यस्तपर्यस्तहस्तपल्लवायामन्मथविकृतमन आसीत् ॥ आलोकनमात्रेणैव च समा

का॰द॰ साधितसुतावतारा सा च सुखायास्मिन्नेवासनीकृते पुंडरीके कृतार्थतां दधे वासीत्। तस्यां च कुमारः समुदपादि। ततस्तमुत्संगेनादाय सा भगवन्नयं गृहाण तवायमात्मज इत्युक्त्वा तस्मै श्वेतकेतवे ददौ। असावपि
५२ बालजनोचिताः सर्वाः क्रियाः कृत्वा तस्य पुंडरीकसंभवतया पुंडरीक इति तदेव नाम चक्रे। प्रतिपादितव्रतं च तमागृहीतसकलविद्याकलापमकार्षीत्। सोऽयं इयं च सुरासुरैर्मथ्यमानात् क्षीरोदसागराद् उद्गतः
पारिजातनामा पादपस्तस्य मंजरी। यथा चैषा व्रतविरुद्धमस्य श्रवणसंसर्गमीसादितवती तदपि कथयामि। अथ चतुर्दशीति भगवन्तमम्बिकापतिं कैलाशगतमुपासितुमभ्रलोकाद्ययाससहं नंदनव
नसमीपेनायमंबतरम् निर्गम्य सार्धं मधुमासलक्ष्मीदत्तललितहस्तावलम्बया वकुलमालामिखलया कुसुमपत्रवयथिताभिराजानुलम्बिनीभिः कंठमालाभिर्निरंतरछादितविग्रहयानवचूताङ्कुरक
र्णपूरया पुष्पासवपानमत्तया तन्नन्दनवनदेवतया पारिजातकुसुममञ्जरीमिमामादाय प्रणम्याभिहितो भगवन् सकलत्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्याः सदृशोपमलङ्कारः प्रसीद क्रियतामियमवतं
सविलासदुर्ललितासमारोप्यतां श्रवणशिखरं। व्रजतु सफलतां जन्म पारिजातस्येत्येवमभिदधानां चायमात्मनः स्तुतिवादनत्रपावनमितलोचनस्तामनादृत्यैव गंतुं प्रवृत्तो मया तु तामनुयान्तीमवलो
क्य कोदोषः स्वेक्रियतामस्याः प्रणयपरिग्रह इत्यभिधाय बलादियमनिच्छतोप्यस्य कर्णपूरीकृता। तदेतत्कार्त्स्न्येन योयं यत्र चेयं यथा चास्य श्रवणशिखरमानीता तत्सर्वमावेदितमित्युक्तवति तस्मिन्स
युवा किञ्चिदुपदर्शितस्मितो मामवादीत्। कुतूहलिनि किमनेन प्रश्नायासेन यदि सुरभिपरिमला तद्गृह्यतामित्युक्त्वा समुपसृत्यात्मीयश्रवणादपनीय कलेश्वलिकुलक्वणितैः प्रारब्धरतिसमागमप्रार्थना
मिव मदीये श्रवणपुटे तामकरोत्। मम तु तत्करस्पर्शलोभेन तत्क्षणमपरमिव पारिजातकुसुममवतंसस्थाने दर्रमासीत्। स च मत्कपोलतलस्पर्शसुखेन तरलीकृताङ्गुलिजालकात्करतलाद्दमाक्षालज्ज पुलक२
या सहगलितां नाज्ञासीत्। अर्थाद्रूतामसंप्राप्तामेव भूतलमक्षमालां गृहीत्वा सलीलं तद्भुजपाशसंदानितकंठग्रहसुखमिवानुभवंती दर्शितापूर्वहारलतालीलां कंठाभरणतामनयं। इत्थं मत्ते च व्यतिकरे छत्रधारिणी
मामवोचत्। भर्तृदारिके स्नाता देवी प्रत्यासीदति गृहगमनकाल इति क्रियतां मज्जनविधिरित्यहं तु तेन तस्या वचनेन नवग्रहा करिणीव प्रथमाङ्कुशपातेनानिच्छया कथं कथमपि कृच्छ्रमाणात्मुखाल्लावण्यामृतपंकलग्नामि
वकपोल१

वस्पतिमिव सर्वविद्यानां संकेतमिव सरस्वतीनां निद्राचसमयमिव सामप्रांहिमसमयकाननमिव स्फुरितप्रियंगुमंजरीगौरं मधुमासमिव कुसुमधवलतिलकभूतिभूषितमुखमात्मानुरूपेण सवयसापरे
णापरेणार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतमतिमनोहरं स्नानार्थमागतं मुनिकुमारकमपश्यं। तेन च कर्णावतंसीकृतां वसंतदर्शनानंदितायाः स्मितप्रभामिव वनश्रियो मलयमारुतागम
नार्थोद्घाटाञ्जलिमिव मधुमासस्य यौवनलीलामिव कुसुमलक्ष्म्याः सुरतपरिश्रमस्वेदजलकणजालकावलीमिव रतेः ध्वजचिह्नचामरपिच्छिकामिव मनोभवगजस्य मधुकरकामुकाभिसा
रिकां कुंभिकाताराश्रवकानुकारिणीममृतबिंदुनिस्यन्दिनीमदृष्टपूर्वां कुसुममंजरीमद्राक्षं। अस्याः परिभूतान्यकुसुमामोदो नूनमयं परिमल इति निश्चिन्वाना सा तं तयौवनयुवानमीक्षमाणा
हमचिन्तयं। अहो रूपातिशयनिष्पादनीयकरणकौशलस्याक्षीणता प्रजापतेर्यत् त्रिभुवनाद्भुतरूपसंभारं भगवंतं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिरयमपरो मुनिर्माया
मयो मकरकेतुरुत्पादितो मन्ये च सकलजननयनानंदकारिणं शशिबिंबं विरचयतास्तु लीलीलावासभवनानि च कमलानि सृजता प्रजापतिना प्रथममेतदाननाकारकरणकौशलाभ्यासः एव कृतः। अ
न्यथा किमिव हि सदृशवस्तुविरचनायां कारणमलीकं चेद्यथा किल सकलाः कलाः कलावतो बहुलपक्षे क्षीयमानस्य सुषुम्नानाम्ना रश्मिना रविरापिबतीति ताः खलु गभस्तयः समस्ता वपुरिदमावि
३४ शंति कुतोन्यथा रूपापहारिणि क्लेशबहुले तपसि वर्तमानस्येदं लावण्यमिति चिन्तयंतीमेव मामविचारितगुणदोषविशेषो रूपैकपक्षपाती नवयौवनसुलभः कुसुमायुधः कुसुमासवमद इव मधु
करीं परवशामकरोत्। उच्छ्वसितेन सह विस्मृतनिमेषेण किञ्चिदामुकुलितपक्ष्मणा जिह्मितरलतारेण दरेण दक्षिणेन च चक्षुषा सस्पृहमापिबंतीव किमपि याचमानेव त्वदायत्तास्मीति वदंतीवाभिमु
खं हृदयमर्पयन्तीव करणान्यनुप्रविशंतीव तन्मयतामिव गंतुमीहमाना मनोभवाभिभूतां त्रायस्वेति शरणमिवोपयान्ती देहि हृदयावकाशमिति अभ्यर्थनामिव दर्शयंती हा हा किमिदमसाम्प्रतमतिहूपण
मकुलकुमारीजनोचितं मया प्रस्तुतमिति जानानाप्यप्रभवंती करणानां स्तंभितेव लिखितेवोत्कीर्णेव मूर्छितेव संयतेव बद्धेव बलेन विभाव्यते किं तद्रूपसम्पदा किं मनसा किं मन्मथेन किमभिनवयौवनेन किमनु

का·द· वीमितिनाभ्यगच्छं। अज्ञातमदनवृत्तांता च किं गच्छामि किं तिष्ठामि किं रोदिमि किं स्मरणोमि किं पश्यामि किमाकलयामि कस्य कथयामि कोस्य प्रतीकार इति सर्वं च नाज्ञासिषं। केवलमारुह्य कुमारीप्रासादं वि
५३ सर्जसखीजनं द्वारनिवारिताशेषपरिजनप्रवेशा सर्वव्यापारानुत्सृज्यैकाकिनी मणिजालगवाक्षनिःक्षिप्तमुखी तामेव दिशं तत्सनाथतया प्रसाधितामिव कुसुमितामिव महारत्ननिधानाधि
ष्ठितामिव अमृतसागरपरिप्लावितामिव पूर्णचंद्रोदयालंकृतामिव दर्शनसुभगामीक्षमाणा तस्मादिशो गन्धवाहमागच्छन्तमनिलमपि च न कुसुमपरिमलमपि शकुनिमपि ध्वनिमपि तद्वा
र्तां प्रष्टुमीहमाना तद्गमनतया तपः परिक्लेशायापि स्पृहयन्ती तत्प्रभृत्येव गृहीतमौनव्रता तामसजनितपक्षपाता च तत्परिग्रहान्मुनिवेषस्य रम्यतां तदासक्ततया वनस्य चारुतां तच्छ्रवणात्संपर्का
त्पारिजातकुसुमस्य मनोहरतां तन्निवासात्सुरलोकस्य रम्यतां तद्रूपसंपदा कुसुमायुधस्य दुर्जयतामध्यारोपयन्ती दूरस्थितस्यापि कमलिनीव सवितुः सागरलेखेव चंद्रमसो मयूरीव
जलधरस्य तस्यैवाभिमुखी तथैव कांता हरहारानुरंजीवितोद्भ्रमरसावलीमिवाक्षमालां कंठेनोद्वहंती तथैव वतयाप्रस्तुतद्रहस्यापयेवकंठलग्नया पारिजातमंजर्या तथैव च तत्करतलस्पर्शसुख
जन्मना कंटकमुकुलकर्णपूरायमाणेन रोमांचेन कंटकिते कपोलफलके निःस्पन्दमतिष्ठं। अथ ताम्बूलकरंकवाहिनी मदीया तरलिका नाम मयैव सहगता स्नातुमासीत्। सा पश्चाच्चिरादिवा
गत्य तथावस्थितां शनैर्मामवादीत्। भर्तृदारिके यौ तौ तापसकुमारकौ दिव्याकारावस्माभिरच्छोदसरस्तीरे दृष्टौ तयोरेको येन भर्तृदुहितुरियमवतंसीकृता सुरतरुकुसुममंजरी स तस्माद्द्वितीयाद
मनोरमदर्शनमतिनिभृतपदः कुसुमितलतासंतानगहनान्तरेणोपसृत्य मामागच्छंतीमीषद्वलितो भर्तृदारिकामुद्दिश्य पृष्टवान् बालिके केयं कन्यका कस्य वापत्यं किमभिधाना क्व वा गच्छतीति। मयो
क्तमेषा खलु भगवतः श्वेतभानोरंशुभूतायामप्सरसि गौर्यां समुत्पन्ना देवस्य सकलगंधर्वमुकुटमणिशलाकाशिखरोच्चेरमसृणितचरणारविंदस्य प्रणयप्रसंगेन गंधर्वकामिनीकपोलपत्रलतालां
छितभुजशिखरस्य स्पर्शपीठीकृतलक्ष्मीकरकमलस्य गंधर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम। गंधर्वाधिवासं हेमकूटमचलमभिप्रस्थितेति कथितेपि मया किमपि चिंतयन्मुहूर्तमिव स्तंभीस्थित्वा विगत

निमेषेण च सुचिरमिव निरीक्षमाणो मामाशानुनयमर्थितामिव दर्शयन्पुनराह। बालिके कल्याणिनी नवाविसंवादिन्ययरूपाकाल्यभावेपीयमाकृतिः। तत्करोषि मे वचनमेकमभ्यर्थ्यमानेति। ततो मया सवि
नयमुपरचिताञ्जलिपुटया दर्शितादरमभिहितो भगवन्कस्मादेवमभिधत्से। काहं महात्मानासकलत्रिभुवनाभिवन्दनीयास्त्वादृशाः पुण्यैर्विना सकलकल्मषापहारिणीमसदृष्टिमुद्दिश्य मापि न पा
तयंति किं पुनराज्ञां। तद्विश्रब्धमादिश्यतां कर्तव्यमनुगृह्यतामयं जन इत्येवमुक्तस्तु मया सस्नेहं सखीमिवोपकारिणीमिव प्राणप्रदामिव दृष्ट्वा मामभिनंद्य निकटवर्तिनस्तमालपादपात्पल्लव
मादाय निष्पीड्य शिलातले तेन गंधगजमदसुरभिपरिमलेन रसेनोत्तरीयवल्कलैकदेशात्पाट्य पट्टिकां करकमलकनिष्ठिकानखशिखरेणाभिलिख्यार्यामिमं पत्रं गुह्यातस्यैकन्यकायै प्रच्छन्न
मेकाकिन्यै देयेत्यभिधायार्पितवान्। इत्युक्त्वा सा तांबूलभाजनात्पट्टिकामदर्शयत्। अहं तु तेन तत्संबंधेनालापेन शब्दमयेनापि स्पर्शसुखमिवान्तर्जनयता श्रोत्रविषयेणापि रोमोद्गमानुमि
न सर्वांगानुप्रवेशेन मदनावेशमंत्रेणेवाविश्यमाना तस्याः करतलादादाय तामरकलपट्टिकां तस्यामिमामार्यां लिखितामपश्यं। दूरं मुक्तालतया विप्रलोभितया विप्रलोभ्यमानो मे हंसः इव दर्शि
तपोमानसजन्मालयानीतः। अन्यया च मे दृष्ट्या दिग्मोहम्भ्रान्त्रेवप्रणपद्वत्स्मीनो वकुलनिप्रायेवांधस्य जिह्वा छिन्नेवमूकस्य इंद्रजालपिच्छिकयेवाततदर्शिनो ज्वरप्रलापप्रवृत्तेवासंबद्धभाषिणो तृष्ण
निद्रयेवाविषविह्वलस्य लोकायतिकविद्ययेवाधर्मरुचेः मदिरयेवोन्मत्तस्य ग्रहवेद्वरक्रियेव पिशाचग्रस्तस्य दोषविकारोपचयः सुतरामक्रियत तस्य रागातुरस्य मनसो येनाकुलीक्रियमाणा सरिद्
वरेणेवाविकलतामभ्यागमं। तां च द्वितीयदर्शनेन तस्य जनमहापुण्यामिव अनुभूतसुरलोकवासामिव देवताधिष्ठितामिव लब्धवरामिव पीतामृतामिव समासादितत्रैलोक्यराज्याभिषेका
मिवमन्यमाना सततसन्निहितामपि दुर्लभामिव परिचितामपूर्वामिव सादरमाभाषमाणा सर्वलोकस्योपरिस्थितामिव पश्यंती कपोलयोरलकरचनाभंगेषु च शोषयग्रहं स्पृशंती विपरीतनि
वपरिजनस्वामिसंबंधमुपदर्शयंती तरलिके कथय कथं स त्वया दृष्टः किमभिहितासि तेन कियंतं कालमवस्थितासि तत्र किं परमनुसर तत्समान सावागत इति पुनः पुनः पर्यपृच्छं। अनयैव चैकथ

का॰द॰ मासहतयातस्मिन्नेवप्रासादेतथैवप्रतिषिद्धाशेषपरिजनप्रवेशादिवसमत्यवाहयं। अथमदीयेनेवहृदयेनेवकृतरागसंविभागेलोहितायतिगगनतलोपान्तावलंबिनिरविबिंबेसरणादिवसकरदर्शनानुरक्तायांम
५४ तक्रमलशायनायामनङ्गानुरागयामिवपांडुतांव्रजंत्यामातपलक्ष्म्यांगैरिकगिरिसलिलप्रपातपाटलेषुकमलवनेभ्यःसमुत्थायवनगजयूथेष्विवपुंजीभवत्सुभास्करकिरणेषुगगनगामनापारश्रमवि
श्रामल्लाङ्गूलश्लथांगाश्वविरथवाजिनांहर्षहेषारवप्रतिशब्दकेनसहविश्रान्तिमेनुगिरिगह्वरंगतासरेमुकुलितपंकजपुटप्रविष्टमधुकरावलीषुरविविरहमूर्छान्धकारितहृदयास्विवप्रारब्धनिमीलनासु
पद्मिनीषुग्रासीकृतेस्वामान्यमध्यालवलताविवरसंक्रामितानीवपरस्परंहृदयानिसमादायविघटमानेषुरथांगनाम्नांयुगलेषुसाछत्रग्राहिणीमामागत्याकथयत्। भर्तृदारिकेतयोर्मुनिकुमा
रयोरन्यतरोद्वारितिष्ठतिकथयतिचाक्षमालामुपयाचितुमागतोस्मीति। अहंतुमुनिकुमारकनामग्रहणादेवस्थानस्थितापिगतेवद्वारदेशमुपजाततदागमनशंकासमाहूयान्यतरंकंचुकिनंगच्छ
प्रवेशयेतामित्यादिश्यप्राहिणवं। अथमुहूर्तादिवतेनस्यरूपस्येवयौवनंयौवनस्येवमकरकेतनंमकरकेतनस्येववसंतसमयंवसन्तसमयस्यचदक्षिणानिलमनुरूपंसवयसमपरमपिमुनिकुमारकंक
पिंजलनामानंजराधवलस्यकंचुकिनोनुमार्गेणचंद्रातपस्येवबालातपमागछंतमपश्यं। समीपमुपगतस्यचास्यपर्याकुलमिवसविषादमिवशून्यमिवार्थिनमिवाजर्गाकूतमाकारमलक्षयं।
उत्थायचकृतप्रणामासादरंस्वयमासनमुपाहरं। उपविष्टस्यचबलादनिच्छतोपिप्रक्षाल्यचरणावुपमृज्योत्तरीयांशुकपल्लवेनान्यवहितायांभूमावेवोपांतिकेसमुपाविशं। अथमुहूर्तमिवस्थित्वाकिं
मपिविवक्षुरिवसतस्यांमत्समीपोपविष्टायांतरलिकायांचक्षुर्व्यापारयत्। अहंतुविदिताभिप्राया
दृष्ट्वेवभगवन्नव्यतिरिक्तेयममस्मच्छरीरादशंकितमभिधीयतामित्यवोचं। एवमुक्तश्चमयासकपिंजलःप्रत्यवादीत्। राजपुत्रिकिंब्रवीमिवाग्गेवमेनाभिधेयविषयमवतरतित्रपयाकंदमूलफला
शीशांतोवननिरतोमुनिजनः। क्वायमनुपशांतजनोचितोविषयोपभोगाभिलाषकलुषोविविधविलाससंकटोरागप्रायःप्रपंचः। सर्वमेवानुपपन्नमालोकयकिमिदमारब्धंदैवेनायत्नेनैवखलु

तो१

पुलककंटकप्रोतामिवमदनशरशलाकाकीलितामिवसौभाग्यगुणास्यूतामिवकृच्छ्राद्दृष्टिमाकृष्यमाणानुमुद्वहन्तं। उपलक्षिताचमयिसद्वितीयोमुनिकुमारकस्तथाविधस्यास्यधैर्यस्खलितमालो
क्यकिंचित्प्रकटितप्रणयकोपश्चावादीत्। सखेपुंडरीकनैतदनुरूपंभवतः। क्षुद्रजनक्षुण्णएषमार्गोधैर्यधनाहिमहात्मानः। किंयःकश्चित्प्राकृतइवविक्लवीभवंतमात्मानंनरुणत्सि। कुतस्तवा
पूर्वोयमद्येन्द्रियविप्लवः। केनास्येवंकृतः· क्वतेतद्धैर्यं। क्वासाविंद्रियविजयः· क्वतद्वशित्वंचेतसः· क्वसाप्रशांतिः· क्वतत्कुलक्रमागतंब्रह्मचर्यं। क्वसासर्वविषयनिरुत्सुकता। क्वतेगुरूपदेशाः· क्वतानिश्रुता
नि· क्वतावैराग्यबुद्धयः· क्वतदुपभोगद्वेषित्वं। क्वसासुखपराङ्मुखता· क्वासौतपस्यभिनिवेशः· क्वसाभोगानामुपर्यरुचिः· क्वतद्यौवनानुशासनं· सर्वथानिष्फलाप्रज्ञानिर्गुणोधर्मशास्त्राभ्यासो
·निरर्थकःसंस्कारः· निरुपकारोविवेको· निष्प्रयोजनाप्रबुद्धता· निष्कारणंज्ञानं· यत्रभवादृशाअपिरागाभिषंगैःकलुषीक्रियंतेप्रमादैश्चाभिभूयंते· कथंकरतलाद्गलितामपह्रियमाणामप्यक्षमालामपिनल
क्षयसि· अहोविगतचेतनत्वमपहृतानामेयमिदमपितावदस्याहृयमाणंहृदयमनयानिवार्यतामित्येवमभिधीयमानश्चतेनकिंचिदुपजातलज्जइवप्रत्यवादीत्। सखेकपिंजलकिंमामन्यथा
संभावयसिनाहमेवमस्यादुर्विनीतकन्यकायामर्षयाम्यक्षमालाग्रहणापराधमित्यभिधायालीककोपकान्तेनप्रयत्नविरचितभीषणभ्रुकुटिभंगेणमुखेनचुम्बनाभिलाषस्फुरिताधरपुटेनमु
खेनमामवोचत्। चपलेप्रदेशादस्मादिमामक्षमालामदत्वापदात्पदमपिनगंतव्यमिति· तच्चश्रुत्वाहमात्मकंठादुन्मुच्यमकरध्वजलास्यारंभलीलापुष्पांजलिमेकावलीमाग्रतनमुक्ष
तामक्षमालेतिमन्मुखासक्तदृष्टेःशून्यहृदयस्यास्यप्रसारितेपाणौनिधायस्वेदसलिलस्नातापिपुनःस्नातुमवातरं। उत्थायचकथंकथमपिप्रयत्नेननिम्नगेवप्रतीपंनीयमानासखीजनेनबलात्
मयासहतमेवचिंतयंतीस्वभवनमयासिषं। गत्वाचप्रविश्यकन्यकांतःपुरंततःप्रभृतितद्विरहविधुराकिमागतास्मिकिंतत्रैवस्थितास्मिकिमेकाकिन्यस्मि· किंपरिवृतास्मि· किंतूष्णीमस्मि· किं
प्रस्तुतालापास्मि· किंजागर्मि· किंसुप्तास्मि· किंरोदिमिकिंनरोदिमि· किंदुःखमिदं· किंसुखमिदं· किमुत्कंठेयं· किंव्याधिरयं· किंव्यसनमिदं· किमुत्सवोयं· किंदिवसोयं· किंनिशेयं· कानिरम्याणिकान्यरम्याणिस

रवानानेकधारमनवरतमीक्षणयुगलेनवाष्पजलबिंदुदुर्दिनमुत्सृजंतमालोहिनीमधरप्रभामनङ्गदहनस्यप्रदहतोहृदयमूर्ध्वसंसर्पिणींशिखामिवाद्यायनिष्पतद्भिर्निःश्वासैरुरलीकृतास
न्नलतानुकुसुमकेसरंवामकपोलशयनीकृतकरतलतयासमुत्सार्यभिरमलैर्नखांशुभिर्धवलीकृतमछाछचंदनरसरचितललाटिकमिवललाटदेशमुद्वहंतं·मविरयनीतयारिजातकुसुमकर्णपूरतयास्वे
दयरिमललोभोपसर्पिणाकलविरुतिछलेनमदनसंमोहनमंत्रमिवजपतामधकरकुलेनस्फनीलोत्पलमिवसतमालपल्लवमिवश्रवणदेशेंदधानं·मुत्कंठाज्वररोमांचव्याजेनप्रतिरोमकूपनिपतिताना‍ंम
दनशराणांकुसुमशरकेसरशल्यशकलनिकरमिवाङ्गलग्नंदधानं·दक्षिणकरेणचस्फुरितकिरणनिकरंकरतलस्पर्शसुखकंटकिनामिवमुक्तावलीमविनयपताकामुरसिधारयंतं·मरकतशीक
रणाचूर्णेनेवकुसुमरेणुनातरुभिराहन्यमानं·मात्मरागमिवसंक्रामयद्भिरशस्त्रैरनिलचलितैरशोकपल्लवैःस्पृश्यमानं·सुरताभिषेककलशैरिवाभिनवपुष्पस्तवकमधुशीकरैर्वनश्रियाभिषि
च्यमानं·मसितिवहनिपीयमानपरिमलैरनुपरिपतद्भिश्चंपककुड्मलैःस्मरशरशल्यकैरिवसषट्पदैःकुसुमकेतुनाताड्यमानमतिविकसितसुरभिकुसुमबहलामोदमत्तमधुकरझंकारनिस्वनैर्हुंकारैरिव
दक्षिणानिलेननिर्भर्त्स्यमानं·मदकलकोकिलकोलाहलैर्वसंतजयशब्दकलकलैरिवमधुमासेनाकुलीक्रियमाणं·प्रभातचंद्रमिवपांडुतापरिगृहीतं·निदाघगंगाप्रवाहमिवकृशिमानमुपगतं·मग्नमिव·छलितमि
चनमयमिवजीवलोकंकुर्वन्तीमुग्धतामुन्मदयौवनकुंजरमदराजिभ्यांभ्रूलताभ्यांमनःशिलापंकलिखितेनचहरगाविद्धमन्मथहृदयेनेववदनलग्नेनलकविंदुनाविद्योतितललाटमद्रु·मुखघटे
मतालीपत्राभरणामरणमणामयमामुक्तकर्णोत्पलच्युतमधुधारासंदेहकारिणंकर्णपाशदोलायमानपत्त्रमरकतमाणिक्यकुंडलंदधती·पाटलीकृतललाटेनसीमंतचुम्बितचूडामणेः
सरतांशुजालेनमदिरारसेनेवप्रक्षाल्यमानशीर्षकेशकलापां·देहार्धप्रविष्टहरगर्वितगौरीविजिगीषयेवसर्वाङ्गानुप्रविष्टमन्मथदर्शितशोभाप्यविशेषामुरःस्थमाणिपिंतेकलक्ष्मीमुदितनारायणा
वलेपहरणायप्रतिविम्वकैर्निजरूपनीलक्ष्मीशतानीवसृजंतीमुक्तमाङ्कु·निहितैकचंद्रविस्मितहराभिमाननाशायविलासस्मितैश्चंद्रसहस्राणीवदिक्षुक्षिपंतीनिर्दयदग्धैकमन्मथप्र
मथनायरोषेणेवप्रतिहृदयंमन्मथायुतान्युत्पादयंतीरजनिजागरखिन्नस्यपरिचितचक्रमिथुनस्यस्वसुंक्रीडानदिकासुकमलपलिवालुकाभिर्वालपुलिनानिकारयंतीपरिजनन्नू
रकप्रस्थितंदुर्लभंचहंसमिथुनंमृणालनिगडकेनबधानेतिहंसपालीमादिशंतीमाभरणमरकतमयखांक्षिहनेहरिणप्रावकायसरवीश्रवणादपनीयपवाङ्कुरप्रसवंप्रयच्छंती·मा

का·द· श्वेन दत्तो दासजनस्त्वात्मानमिव प्रतिग्राहयंती अद्य प्रभृति भवतो हृदयेवर्तनद्गतिर्जीवितमिव स्वायर्पयंती ताम्बूलमदात्। आकर्षंती च करकिसलयं भुजलतानुसारेण स्पर्शोत्कम्पागतमनङ्गेण
९९ इभित्रमर्थ्यंस्तरस्यमिव यतितमपि रत्नवलयं नाज्ञासीत्। गृहीत्वा परं ताम्बूलं महाश्वेतायै प्रायच्छत्। अथ सहसैव स्खलितगतिस्त्रिवर्णरागमिन्द्रायुधमिव कुररीरुतं कंठेन वहन्ताविद्रुमाङ्कुरेणानु
कारिणा चंचुपुटेन मरकतद्युतिपक्षतिना मंथरगतेन शुकेनानुबध्यमाना कुसुमकेसरपिञ्जरतया चरणयुगलस्य चम्पककलिकाकारतया मुखस्य कुवलयदलतया च पक्षद्युतीनां कुसु
ममयीवागत्य सारिका सक्रोधमवादीत्। भर्तृदारिके कादम्बरि कस्मात्र निवारयस्येनमलीकसुभगाभिमानिनमतिदुर्विनीतं मामनुबध्नंतं विहङ्गापसदं। यदि मामनेन परिभूयमानामु
पेक्षसे ततो ऽहं नियतमात्मानमुत्सृजामि सत्यं शपामि ते पादपद्मं जस्पर्शेनेत्येवमभिहिता च तया कादम्बरी स्मितमकरोत्। अविदितवृत्तान्ता तु महाश्वेता किमियं वदतीति मदलेखामपृ
च्छत्। सा वाकथयदेषा भर्तृदारिकायाः सखी कादम्बर्याः लवलीति नाम्ना सारिकेति परिहासनाम्नः शुकस्य भर्तृदारिकयैव पाणिग्रहणपूर्वकं जायापदं ग्राहिता। अद्य चानया प्रत्युषसि
कादम्बर्यास्ताम्बूलकरङ्कवाहिनीमिमां तरलिकामेकाकिनीं किमपि पाठयन्नेष दृष्टो यतस्ततः प्रभृति संजातेर्ष्या विराङ्मुखी नैनमुपसर्पति नालपति न स्पृशति न विलोकयति सर्वाभिरस्मा
भिः प्रसाद्यमानापि न प्रसीदतीत्येतदाकर्ण्य स्फुरत्स्फुरितकपोलोदरश्चंद्रापीडो मंदं मंदं विहस्याब्रवीत्। अस्त्येषा कथा श्रूयते श्वेतराजकुले कर्णपरम्परया परिजनोऽप्येवं मंत्रयते बहिर
पि जनाः कथयंत्येवं दिगंतरेष्वपि यथायमालापो वर्तते एवास्माभिरप्येतदाकर्णितमेव यथा किल देव्याः कादम्बर्यास्ताम्बूलदायिनीं तरलिकां कामयमानः परिहासनामा शुको मदनपरवशो ग
तान्यपि दिनानि न वेत्तीति तदयमास्तां तावदुद्दामवारः परित्यज्य निजकलत्रो निस्त्रपो ऽनया सह देव्याः कादम्बर्याः कथमेतद्युक्तं यन्न निवारयतीमां चपलां दुष्टदासीं मयवा देव्यापि कश्चि
न्नैव निसिद्धता प्रथममेव इमां वराकीं कालिंदीमीदृशाय दुर्विनीताय विहंगाय प्रयच्छंत्या किमिदानीमियं करोतु यदेतत्सापत्न्यकरणं नारीणां प्रधानं कोपकारणं। अग्रणीर्विरागहेतुः परं

परिभवस्थानं· इयमेव केवलमतिधीरा यदनयानेन रोर्भाग्यगारिमद्या तातवैराग्यया विषं वा नास्वादितमनलो वा नासादितोऽनशनं वा नाङ्गीकृतं न ह्येवमपरमास्ति योषितां लाघिमनः का
रणं· यदि चेयमीदृशेऽथ पश्येनुनीयमानानेन प्रत्यासपनिभेष्यति तदाधिगिमाम लमनया दूरतो वर्जनीयेयमभिभवनिस्पाकरनां पुनरालाय पिष्यति को वावलोकयिष्यति को वास्याना
मग्रहीष्यतीत्येवमभिहितवति तस्मिन्सर्वास्ताः सह कादम्बर्या क्रीडालापभाषिता जहसुरङ्गनाः। परिहासस्तु तस्य नर्मभाषितमाकर्ण्य जगाद। धूर्त राजपुत्र निपुणोऽयं न त्वया येन वालोऽना
पि प्रतारयितुं शक्यते एषापि बुध्यते एतावतीर्वक्रोक्तीरियमपि जानात्येव परिहासजल्पितानि· अस्या अपि राजकुलसम्पर्कचतुरा मतिर्विरम्यतामभूमिरेषा भुजंगभंगिभाषितानां
मियमेव हि वेत्ति मम स्नुभाषिणी काले च कारणं च प्रमाणं च विषयं च प्रस्तावं च कोपप्रसादयोरिति। अत्रान्तरे चागत्य कंचुकी महाश्वेतामवोचदायुष्मति देवश्चित्ररथो देवी च मदिरा त्वां द्रष्टु
माह्वयतः इत्येवमभिहिता च गन्तुकामा महाश्वेता चंद्रापीडः क्वास्तामिति कादम्बरीमपृच्छत्। अथ सा तु पर्याप्तमनेकस्त्रीसहस्रहृदयावस्थानेनानेनेति मनसा विहस्य प्रकाशमवदत्। सखि महा
श्वेते किं त्वमभिदधासि दृष्टो न दारभ्य शरीरस्याप्ययमेव प्रभुः किमुत भवनस्य परिजनस्य वा यत्रास्मै रोचते प्रियसखीहृदयाय वा तत्रायमास्ताम्। तच्छ्रुत्वा महाश्वेतावदत्। अत्रैव त्वत्प्रासा
दसमीपवर्तिनि प्रमदवने क्रीडापर्वतमणिवेश्मन्यास्तामित्यभिधाय गंधर्वराजं द्रष्टुमयासीत्। चंद्रापीडोऽपि तथैव सह निर्गत्य विनोदार्थं वीणावादिनीभिश्च वेणुवाद्यनिपुणाभिश्च गीतक
लाकुशलाभिश्च दुरोदरक्रीडारागिणीभिश्चाष्टापदव्यनुरागिभिश्चित्रकर्मकुशलाभिश्च सुभाषितपाठिकाभिश्च कादम्बरीसमादिष्टप्रतीहारीभिश्च कामिनीभिरनुगम्यमानः पूर्वदृष्टेन के
यूरकेणोपदिश्यमानमार्गः क्रीडापर्वतमणिमंदिरमगात्। गते च तस्मिन्गंधर्वराजपुत्री विसर्ज्य सकलं सखीजनं च परिमितपरिचारिकाभिरनुगम्यमाना प्रासादमारुरोह। तत्र शयनीये
निपत्य दूरस्थिताभिर्विनयाविष्टाभिः परिचारिकाभिर्विनोद्यमाना कुतोऽपि प्रत्यागतचेतना चैकाकिनी तस्मिन्काले चपलेके किमिदमारब्धमिति निगृहीतेव लज्जया गंधर्वराजपुत्रि कथमेतद्युक्त

का·द· मित्युपालब्धेव विनयेनायमसावुत्पन्नो बालभावः क्वगतस्त्वयेत्युपहसितेव मुग्धतयास्वैरिणि मा कुरु पदे पदे एकाकिन्यविनयमित्यामन्त्रितेव कुमारभावेनाभिनुनायं कुलकन्यकानां क्रमः दूतिगर्हितेव महत्त्वेन दुर्विनीतेर ह्याविनयमिति तर्जितेवाचारेण मूढे निग्रहयतांमदेन लघुतांनीतासीत्यनुशासितेवाभिजात्येन कुतस्तवेयं तरलतेति धिक्कृतेव धैर्येण स्वच्छंदचारिणि अप्रमाणीकृतोहं त्वयेति निन्दितेव कुलस्थित्यात्यति गुर्वी

७· लज्जामुवाह। सममिजनयंदेव मगारिगतसर्वशङ्क यातरलहृदयतां दर्शयंत्या घमयाकिं कृतमिदं मोहांधयातथा हृदयस्थ एवायमतिसाहसिकयामयानशङ्कितं लघुहृदयामां कलयिष्यतीति निर्ही कयानाकलितं कास्यापि चित्तज्ञानिरितिमूढयानपरीक्षितं दर्शनानुरक्ताहमस्य नेति वातरलतयानकृतो विचारक्रमः प्रत्याख्यानवैलक्ष्यान्नभीतं गुरुजनात्त्रस्तं लोकापवादान्नोद्विग्नं तथाच महाश्वेता दुःखितेति निर्दाक्षिण्यया नापेक्षितमासन्नवर्तिसखीजनोप्युपलक्षयतीति मंदयानलक्षितं पार्श्वस्थितः परिजनः पश्यतीति नष्टचेतनया नदृष्टं स्थूलबुद्धयोपि जादृशीं विनयच्युतिं विभावयेयुः किमुतानुभूतमदनवृत्तान्ता महाश्वेता। सकलकलाकुशलाः सख्यो वा राजकुलसंचारचतुरो वानित्यमिङ्गितज्ञः परिजनः दृष्टचेष्टितानिपुणतरदृष्टयोजनयुवदासः सर्वथाहृतास्मिमन्दपुण्या मरणंमे श्रेयोनलज्जाकरं जीवितं श्रुत्वैतद्वृत्तान्तं किं वक्ष्यत्यम्बातातोवा गंधर्वलोको वा। किं करोमि कोत्र प्रतीकारः केनोपायेनस्खलितमिदं प्रच्छादयामि कस्यवा चापलमिदमेतेषां दुर्विनीतानामिन्द्रि याणां कथयामि धक्वानेनदग्धहृदयेन नखलुज्ञाना मिरहीनागच्छामि तथामहाश्वेताव्यतिकरेणप्रतिज्ञाकृता तथा प्रियसखीनां पुरो मंत्रितं। तथा चकेयूरकस्य हस्ते संदिष्टं नखलुज्ञाना मिकिंर भागिनी शठविधिनोहृत मन्मथेनवा एकेनापुण्यसंचयेन मम सुहृत्केनवान्येनकेनाप्यमानीतो मम विप्रलंभकश्चन्द्रापीडः कोपिवानकदाचिद्दृष्टोनानुभूतो नच श्रुतोनचिन्तितो नोप्रेक्षि तोमां विडम्बयितुमुपनतो यस्यदर्शनमात्रेणैव संयम्य दत्तेवेन्द्रियैः शरपंजरेणेव समर्पितेव मन्मथेन दासीकृत्योपनीतेवानुरागेण निर्यातितेव रागहीनमूल्येन गुणगणेन विक्रीतेव हृदयेनो पकरणीभूतास्मि नमेकार्यं तेनेति सत्यामिवसंकल्पमकरोत्। कृतसंकल्पायाच गतेनमिथ्याविनीते परिमयानकृत्यमेवगच्छामीति हृदयोत्कंपचलितेनपरिहसितेव चंद्रापीडेनतत्परित्यागसंकल्प

प्रभावर्धिष्णुपयाहः देशेसप्रेमपाणिनास्पृशन्तीमधुकरभरपर्यस्तं वकर्णावतंसमुन्नेपयंती चामरपवनविक्षिप्तियर्थस्तालकबल्लरीमनुष्णाञ्जमानाकादम्बरीमनामयं पप्रच्छ। सातु सखीप्रेम्णा गृहनिवासेनकृतापराधेवानामयेनैवलज्जमानाकृच्छ्रात्किंकुशलमाचचक्षे। समुपजातशोकापितस्मिन्काले महाश्वेतामुखनिरीक्षणतत्परापि मुहुर्मुहुरपाङ्ग विक्षेपप्रचलिततरलतर तारकासारोदरं चक्षुर्मरकतवायेन भगवताकुसुमधन्वनाबलान्नीयमानं चंद्रापीडपीडनयैवनशशाकनिवारयितुं तेनैवचक्षणेननेनासन्नसखीकपोलसंक्रान्तेनेर्ष्यारोमाञ्चभिद्यमानकुचनखप्र तिबिम्बेनविरहव्यथास्वेदार्द्रवक्षःस्थलचरितशालभञ्जिकाप्रतिमेनसपत्नीरोषात्प्रियतोरोर्भग्यशोकमानं दर्जनतातिरोहितेनांधतागुः स्वममभवत्। सामुहूर्तोपगमेचताम्बूलदानोद्यतां महाश्वे तामभाषत। सखिकादम्बरिसम्प्रतिसर्वाभिरेमेवास्माभिरभिनवागतश्चन्द्रापीड आराधनीयस्तदस्मैतावद्दीयतामित्युक्ता च किञ्चिद्विवर्तितावननमितमुखीप्राने त्र्यञ्जक्रमिव प्रियसखिलज्जेह मनुपजातपरिचयात्प्रागल्भ्येनानेनगृह्यताम् त्वमेवास्मै प्रयच्छेत्युवाचतां। पुनः पुनरभिधीयमाना च तयाकथमपि ग्राम्येव विशादानाभिमुखं प्रजल्पन्त्ये महाश्वेतामुखादनाकृष्टदृष्टिरेखवेपमाना द्वयविषमुकुलितलोचनास्थूलं स्थूलं निश्वसंती निजप्रहारप्रहारमूर्छितामन्मथेनस्नपितेवस्वेदजलविसरैः स्वेदजलाविसरनिमज्जनभयेनचहस्तावलम्बनमिवयाचमानासाध्वसपरवशाय तामीतिललितमिव कृतप्रयत्नाप्रसारयामासताम्बूलगर्भं हस्तपल्लवं। चंद्रापीडस्तु जयकुञ्जरकुंभस्थलास्फालनसंक्रान्तसिन्दूरमिवस्वभावपाटलं धनुर्गुणाकर्षणकृतकिणश्यामलं कचग्रहाकृष्टारिदारेलक्ष्मीलोचनपरामर्शान्लग्नाञ्जनबिन्दुमिवविसर्पन्नखकिरणतया तिरभसेन प्रधाविताभिरिवविवर्धिताभिरिव प्रहसिताभिरिवाङ्गुलीभिरुपेतंस्पर्शलोभा दिवतत्कालकृतसन्निवेशाः सरागाः पंचापीन्द्रियस्त्रीरपराङ्गुलीरुद्वहंतंप्रसारितवान्पाणिम्। तत्कालविलासदर्शनकुतूहलिभिरिवकुतोप्यागत्यसर्वरसैरधिष्ठिता तेनाति बद्ध लक्ष्मप्रसारितेन चंद्रापीडहस्तान्वेषणायेवपुरः प्रवर्तितनखांशुनिवहेनवेपथुवशिनवलयावलीवाचालेनसंभाषणमिवकुर्वताहस्तेनस्वेदसलिलपातपूर्वकंग्रहस्तामयं प्रन्म

का०द० मम्प्रार्थितानुरूपो मन्मथः प्रकटीकरिष्यति। स एवार्थोऽस्यापस्य शेनाभविष्यतीत्यवधार्योत्थायोपविश्य वनाभिः कन्यकाभिः सह ह्रीदर्पैश्च विपंचीवीणावाद्येषु पाणविकेषु स्वरसंदेहविवादेषु सुभा
७१ षितगोष्ठीभिश्चान्यैर्नैर्नैरालापैः सुकुमारैः कलाविलासैः क्रीडन्नासांचक्रे। मुहूर्तं चास्थित्वा निर्गम्योपवनालोकनकुतूहलाक्षिप्तचित्तः क्रीडापर्वतशिखरमानुरोह। कादम्बरी तु तं दृष्ट्वाचिरयतीति महाश्वेतापाः
किलवर्त्मावलोकयितुं विमुच्यतां गवाक्षमनंगाक्षिप्तचित्ता सौधस्योपरितनं शिखरमारुरोह। तत्र च विरलपरिजना सकलशशिमंडलपांडुरेणातपत्रेणोद्धेमदंडेन निवार्यमाणातपा चचतुर्भिर्वालव्यजनैश्च
फेनपुंविभिरुद्धूयमानैरुपवीज्यमाना शिरीषकुसुमगंधलुब्धैर्भ्रमता भ्रमरकुलेन दिवापि नीलावगुंठनेनेव चंद्रापीडाभिसरणवेषाभ्यासं कुर्वती मुहुश्चामरशिखां समासज्य मुहुः छत्रदंडमवल
म्ब्य मुहुस्तमालिकास्कंधे करौ विन्यस्य मुहुर्मदलेखांपरिषज्य मुहुः परिजनान्तरितसकलदेहा नेत्रत्रिभागेन मुहुराकलितत्रिवली चलया परिवृत्य मुहुः प्रतीहारीवेत्रलताशिखरे कपोलं नि
धाय मुहुर्निश्चलकरविधृतामथ रपत्रवीटिकां च। निवेश्य मुहुरुत्कीर्णकर्णोत्पलप्रहारपलायमानपरिजनानुसरणादलकतिपयपदाविहसन्ती विलोकयंतीति नेन चाविलोकमानामहात्रमपिकालमति
क्रान्तं नाज्ञासीत्। आरुरोह च प्रतीहार्या निवेदितमहाश्वेताप्रत्यागमना [redacted] तस्मादवततार स्नानादिसुमंदारम्भमहाश्वेतानुरोधेन दिवसव्यापारमकरोत्। चंद्रापीडोऽपि तस्मादवतीर्य
प्रथमविसर्जितेनैव कादम्बरीपरिजनेन निर्वर्तितस्नानविधिर्निरूपहृतशिलामिमतार्चितदेवतः क्रीडापर्वतक एव सर्वमाहाराह्निकमहः कर्म चक्रे। क्रमेण च कृताहारः क्रीडापर्वतकप्राग्भागभाजि मनोहा
रिणि हारीतहारिणि शिरोमंथफेनपीक्शासारे सीरायुधहूलभयनिश्चलकालिन्दीजलत्विषि तरुणीचरणालक्तकशोणाशोकचितिकुसुमरजः सिकतिलतले लतामंडपोपगूढे शिखंडिताण्डवसंगीत
गृहे मरकतशिलातलेसमुपविष्टो दृष्टवान् सहसैवातिबहलधाम्ना धवलेनालोकेन जलेनेव निर्वाप्यमानं दिवसं। मृणालवलयेनेव पीयमानमातपं। क्षीरोदेनेव प्लाव्यमानां महीं। चंदनरसवर्षेणेव
सिच्यमानानाशाद्विग्गजान्सुधयेव विलिप्यमानममम्बरतलं। आसीच्चास्य मनसि किं मुखलुभगवानोषधिपतिरकांड एव धीतांशुरुदितो भवेदुत पंत्रविक्षेपविशीर्यमाणैः पांडुरधारासहस्त्राणि धारागृहाणि

मुक्तान्याहोस्विदनिलविकीर्यमाणाः शीकरनयववलितभुवनाम्बरसिंधुधरानलमवतीर्णाकुतूहलाद्यालोकानुसारप्रहितचक्षुरद्राक्षीत्। अनल्पकन्यकाकदंबपरिवृतां ध्रियमाणधवलातपत्रांउद्
यमानचामरयुगां कादम्बरीप्रतीहार्या वामपाणिना वेत्रलतागर्भेणार्द्रवस्त्रशकलावच्छन्नमुखं चंदनानुलेपनसनाथं नारिकेलमुद्वहन्त्या दक्षिणकरेण दत्तहस्तावलंबां केयूरकेण च निश्वासहा
र्येनिर्मोकप्युचिनी धौतेनैकल्पलतादुकूले दधतानिवेद्यमानमार्गामालतीकुसुमदामाधिष्ठितरैकेनलपावनमाक्षिकपानुगम्यमानामागच्छंतीं महाश्वेतां तस्याश्च समीपे तरलिकातया च सितांशुकोपच्छदपट
लगृहीतं धवलताकारणमिव क्षीरोदस्य सहभुवं मृणालदंडमिव नारायणनाभिपुंडरीकस्य। मन्दरक्षोभविक्षिप्तमिवामृतफेनपिंडनिकरं वासुकिनिर्मोकमिव मंथनश्रमोक्षिप्तं हासमिव श्रियः कुलगृहवि
योगगलितं मंदरमथनविस्तंभितशेषशशिकलाखंडसंचयमिव संहृतं प्रतिमाताराणामिव जलादुद्धृतं दिग्गजकरशीकरासारमिव पुंजीभूतं नक्षत्रमालाभरणमिव मदनद्विपस्य शरन्मेघशकलैः
रिवकल्पितं कादम्बरीरूपप्रव्रीडितमुनिजनहृदयैरिव निर्मितं गुहमिव सर्वरत्नानां यशोराशिमिवैकत्रचरितं प्रतिपक्षमिव चंद्रमसः जीवितमिव ज्योत्स्नायाः लक्ष्मीहृदयमिव नलिनी
दलगलज्जलबिंदुर्विलासतरलं उत्कंठितमृणालवलयधवलं केदारकच्छेदिनमिव च नमुक्तारूनिवहधवलितदिङ्मुखं मंदाकिनीप्रवाहमिव सुरयुवतिकुचपरिमलवाहिनं प्रभावर्षिणमतितार
हारं दृष्ट्वा च यमस्य चंद्रापीडश्चंद्रातपद्युतिमुषोधवलिम्नः कारणमितिनिमनसा निश्चित्य दूरादेव प्रत्युत्थानादिना समुपचितोपचारक्रमेण मदलेखामापतंतीं जग्राह। सा तु तस्मिन्नेव मरकत
ग्रावणि मुहूर्तमुपविश्य स्वयमुत्थापनेन चंदनांगरागेणानुलिप्य तेदूर्चदुकूले परिधाय तेश्च मालतीकुसुमदामभिरारचितशेखरं कृत्वा तं हारमादाय चंद्रापीडमुवाच। कुमार न बेयमय
हृष्टिताहंकारकान्तापेशलताप्रीतिपरवशं जनं कमिव न कारयति। प्रश्रयस्व दत्रात्यवकाशमेवं विधानामनया चारुत्मा कस्यासि न जीवितस्वामी। अनेन च कारणा विष्ठजवात्सल्येन चरि
तेन कस्य न बंधकलमध्यारोपयसि। एषा च ते प्रकृतिमधुं राप्यवचःतिः कस्य न च यस्मतामुत्पादयति। कं वानन्यमाश्वासयत्यमीस्वभावस्ला। कुमार रजयो भवद्गुणाः। त्वन्मूर्तिरेवात्रोपालंभमर्ह

का॰८ ति·यथाप्रथमदर्शनएवविस्रंभमुपजनयति·तथाह्यलब्धविशेषकलंभुवनप्रथितमप्यात्मानंसर्वमिवानुचितमिवाभाति·संभाषणमथधःकरणमिवापतति·आदरोपिप्रभुताभिमानमिवानु
७२ मापयति·स्तुतिरप्यौत्सुक्यमिवसूचयति·उपचारोपिचापलतामिवप्रकाशयति·प्रीतिरप्युन्मत्ततामिवख्यापयति·विज्ञापनापिप्रागल्भ्यमिवज्ञापयते·सेवापिचापलमिवदर्शयते·दा
नमपिपरिभवइवभवति·अपिचस्वयंगृहीतहृदयायकिंदीयतेजीवितेश्वराय·किंप्रतिपाद्यतेप्रथमकृतागमनमहोपकारस्य·कातेप्रत्युपक्रियापादर्शनदत्तजीवितफलस्यःसफलमागमनंके
नतेक्रियते·प्रश्रायितांचानेनव्यपदेशेनदर्शयतिकादम्बरीलविभवं·अप्रतिपाद्याद्यप्रियस्यतास्मैजननिभवान्तां·आर्त्तामावद्विभवोभवात्परसस्दास्पमङ्गीकुर्वाणानाकार्यकारिणीतिनियुज्यते·
दत्तात्मानमपिवंचितानभवतिजीवितमथर्थयिसानयश्चानयतेप्रणयिजनप्रत्याख्यानपराङ्मुखीचदाक्षिण्यपरवतीमहत्ताशंसी·नचमादृशीभवतियाचमानानांयादृशीददतांलज्जा·यत्तुसत्य
ममुनायतिकरेणकृतापराधमिवलब्धात्मानमवगच्छतिकादम्बरी·तदयममृतमथनसमुद्भूतानांसर्वरत्नानामेकशेषइतिशेषनामाहारोयममुनैवदेहेनावहुमतोभगवतांमर्सायत्यागद्मुपगा
तायंप्रचेतसेदत्तःपाश्रमतापिगंधर्वराजायगंधर्वराजायगंधर्वराजेनापिकादंबर्यैःतयापिचद्युस्यानुरूपमाभरणस्येतिविभावयंत्या·नभःस्थलमेवोचितंसुधासूतोभामनरेत्यवधार्यानुप्रेषितः·यद्यपि
निजगुणगणाभरणभूषिताङ्गःपयथोभवादृशाःक्लेशहेतुमितरजनबहुमतमाभरणमारमहे·पुनारोपयंति·तथापिकादम्बरीप्रीतिरत्रकारणं·किंनकृतमुरसिशिलाशकलेकौस्तुभाभिधानेलक्ष्म्याःस
हृतमितिबहुमानमाविष्कुर्वताभगवताशार्ङ्गपाणिना·नचनारायणोत्रभवंतमतिरिच्यतेनापिकौस्तुभमणिरप्युनापिगुणलवेनशेषमतिरोते·नचापिकादम्बरीमाकाशनुकृतिकलयापिलक्ष्मीस्तुल
नुमल·मर्नोर्हतीयामिमंबहुमानंलंतो·नचाभूमिरेषाप्रीतिप्रसरस्य·नियतंभवताभग्नप्रणयामहाश्वेतामुपालम्भसहस्रैःखेदयिष्यत्यात्मानमुत्स्रक्ष्यति·अतएवमहाश्वेतातरलिकामयीमंहाश्मादा
यतत्सकाशंप्रेषितवती·तयापिकुमारस्यरागहृदियमेवनस्रस्तुमर्हाभोगेनमनसापिकार्यः·कादम्बर्याःप्रथमप्रसादअप्रसरभंगदुःखातारचक्रमिवचामीकरवक्षस्तटेतंतस्यवक्षस्थलेवबंधा·चंद्रापीडस्तुवि

समकालप्रस्थितेनकंठलग्नेनएवजीवितेना·विशेषतस्तुपुनरपिप्रक्षालितलोचनयादृश्यतापसौजनःप्रत्याख्यानयोग्योनवेतितत्कालागतेनाभिहितेवबाष्पेणापनयामितेसहासुभिर्दुर्वारबलेपमिति
निर्भर्त्सितेवमनोभुवा·पुनरपितथैवचंद्रापीडाभिमुखहृदयावभूवान्तरेचमस्तमितप्रतिसमाधायनवलावलानप्रमावेशेनास्वतंत्रीकृताप्रवशेवोत्थायजालवातायनेनजनमेवक्रीडापर्वतमवलोकयंत्य
तिष्ठत्।तत्रस्थाचसातमानन्दजलव्यवधानाद्विद्वेषस्मात्दर्शनचक्षुषा·अङ्गुलीगलितस्वेदपरामर्शभीतेवचित्रयालिलेख·नचचित्रतूलिकयारोमाञ्चतिरोधानशंकितेवहृदयेनालिलिंगु
नवससा·तत्संगमकालातियातात्संशुर्स्तेषमनोगमापनियुक्तवतीजयपरिजनं।चंद्रापीडोपिप्रविश्यस्कंधावारंस्वहृदयमिवद्वितीयंमणिगृहं·शिलातलचरणयुगलस्ताभिर्यथाविशेषमुभयभागेमूपविष्टाभिः
कन्यकाभिःपरिवृतोदोलायमानेनचेतसाचिंतांविवेश।किंतावदस्यागंधर्वराजदुहितुःकादम्बर्याःसहभुवएतेविलासाहृवेदग्धाःसकललोकहृदयहारिणःआहोस्विदनाश्रितप्रसंगेनभगवता
मकरकेतुनामयिनियुक्तायेनभासास्रेणसरागेणाकूणितत्रिभागेनहृदयानःपतत्स्मरशरकुसुमरजोरूषितेनेवचक्षुषातिर्यग्विलोकयति।मद्विलोकितावधवलेनस्मितालोकेनदुकूलेनेवलज्जा
मात्मानमारणोति·मद्वक्त्राविवर्तमानवदनाचप्रतिबिम्बप्रवेशलोभेनेवकपोलदर्पणमर्पयति·मद्वकाप्रागापिनोहृदयस्यप्रथमाविनयलेखामिवकरनुखेणापयनांक्षलिखति·मत्तांबूलवी
टिकोपनयनखेदविफलेनकरकौत्पलभ्रमभ्रमरद्वन्द्वेनकरतलेनखिन्नंमुखमिवगृहीततमालपल्लवेनेववीजयति।पुनश्चाचिंतयत्।प्रायेणामानुष्यकसुलभालघुतामिथ्यासंकल्पसहस्रैरेवमां
विप्रलम्भतेलुप्तविवेकोयौवनमदोमदनोवा·पतत्तिमिराहतेवपूनांदृष्टिरल्पमपिकलुषंमहत्पश्यति·स्नेहलवोपिवारिणीवयौवनमदेनदूरंविस्तार्यते·स्वयमुत्पादितानेकविकल्पाशताकुलाकवि
मतिरिवतरलतानकिंचित्रौत्प्रेक्षते·निपुणमन्मथगृहीताजतरणाचित्रवृत्तिर्नकिंचिन्नालिखति।संजातनूपाभिमानाकुलदृष्टेवात्मसंभावनानकिंचिन्नात्मानमर्पयतिस्वप्नदृष्टानतुभूतमपिमनो
रथोदर्शयति·इंद्रजालपिच्छिकेवासंभाव्यमपिप्रत्याशापुरःस्थापयति।भूयश्चचिन्तितवान्·किमनेनव्यर्थेवमनसाखेदितेनयदिसत्यमेवेयंधवलेक्षणामय्येवंजातवृत्तिरसदाहविज्ञास्यति

का॰द॰ नश्रीसमागमाभ्यागमिरेवानुरागिणीभिःसहैवदीधितिभिरदर्शनतामुपगतेभगवतिगभस्तिमालिनि·तत्कालविजृंभितेनचक्रांगीहृदयरागरससागरेणेवापूरितेसंध्यारागेणजीवलोकेकुसुमायुधानलद
७३ ह्यमानचक्रवाकहृदयसहस्रधूमरेखजनितमानिनीनयनवारिणिविकीर्यमाणेतरुणतमालत्विषितिमिरे·दिक्षुविकीर्णशीकरशारदश्वेतायमानतारागणेगगनेजातेजातायां
चादर्शनक्षमायांवेलायांसौधशिखरादवततारकादम्बरी।क्रीडापर्वतकनितम्बाच्चचंद्रापीडः।ततोचिरादिवगृहीतपादःप्रसाद्यमानइवकुमुदिनीभिःकलुषमुखीःकुपिताइवप्रसादयन्ना
शाः·प्रवेशार्थंकथयेवपरिहरन्स्फुटाःकमलिनीः·लांछनच्छलेननिशामिवहृदयेनसमुद्वहन्·रोहिणीचरणालक्तकरसमिवोदयरागंदधानस्तिमिरनीलाम्बरांदिवमभिसारिका
मिवोपसर्पन्नतिबहलभक्तयाविकिरन्निवसौभाग्यमुदगाद्भगवानीक्षणोत्सवःसुधासूतिः।उद्गतेचकुसुमायुधाधिराज्यैकातपत्रेकुमुदिनीवधूवरे·विभावरीविलासदन्तपत्रेश्वेतभा
नौधधवलितदिशि·दन्तादिवोत्कीर्णेभुवनेचंद्रापीडश्चंद्रातपनिरंतरतयेवकुमुदमय्यादिवगृहकुमुदिन्याःकल्लोलधौतसुधाधवलसोपानेनतनुतरंगतालवृंतवाततवाहिनिसुप्तहंसमिथुनेविरहवाचालच
क्रवाकयुगलेतीरेकुमुदवनावलीभिःपर्यन्तलिखितयन्त्रलतमण्डपलासिंदुवारदामोपहारंहरिचंदनरसैःप्रक्षालितंकादम्बरीपरिजनोपस्तीर्णमुक्ताशिलापट्टं·चंद्रशीतलमधिशिशये·तत्रस्थस्यचा
स्यागत्याकथयत्केयूरकोदेवीकादम्बरीदेवंद्रष्टुमागतेति।अथसंभ्रममुत्थायागच्छन्तीमस्यसखीजनपरिवृतामपनीताशेषराजचिह्नाभिरामेकावलीमात्राभरणामच्छाच्छेनचंदनरसेनधवली
कृततनुलतामेककर्णावसक्तरत्नकर्णपत्राभिरुकलाकलिकाकोमलंकर्णपूरीकृतंकुमुदकलिंदधानां·ज्योत्स्नाम्बुधिविनीकल्पद्रुमरकुलेचिभ्रन्तीतत्कालरमणीयेनवेषेणसाक्षादिवचंद्रोदयदेवताम
दलेखयापादनहस्तावलम्बांकादम्बरीमपश्यत्।आगत्यचप्रीतिपेशलंदर्शयन्तीप्राज्ञैतेवपरिजनोचितेभूतलेसमुपाविशत्।चंद्रापीडोपिकुमाराध्यासितांशिलातलमेवेत्यसकृदनुवध्यमानोपिमदलेख
यामूमिमेवाभजत्।सर्वासुचासीनासुमुहूर्तमिवस्थित्वाचकुमुपचक्रमेचंद्रापीडः·देविदृष्टिमात्रप्रतीतेदासजनेसंभाषणादिकस्यापिप्रसादस्यनास्त्यवकाशः·किमुतैतावतोनुग्रहस्य·नखलुचिंत

यत्रापिनिपुणंजमात्मनोगुणलवमालोकयामि·यस्यायमनुरूपोनुग्रहातिरेकोतिसरलातेवेयमपगताभिमानमधुरासुजनता·यद्भिनवसेवकजनेयेयमनुरूध्यते·प्रायेणमामुपचारहार्यमदक्षि
णंदेवीमन्यते·धन्यःखलुपरिजनस्तेयस्योपरिनियंत्रणास्यात्·आज्ञासंविभागकरणोचितेभृत्यजनेकएवादरः।परोपकारोपकरणंशरीरं·तृणलवलघुचजीवितं·अपत्रपेत्वत्प्रतिपत्तिभिरु
पायनीकर्तुमागतास्तेवयमेतेशरीरभिदमेतज्जीवितमेतानीन्द्रियाणिएतेषामन्यतरद्दारोपयपरिग्रहेणगरीयस्त्वमिति।अथैवंवादिनोस्यवचनमाक्षिप्यमदलेखाससस्मितमवादीत्।कुमार
भवत्वतियंत्रणयाखिद्यतेसखीखलुकादम्बरीकिमर्थमेवमुच्यतेसर्वमिदजनेणापिवचनमनयापरिगृहीतंकिंपुनरमुनोपचारफल्गुनावचसासंदेहदोलामारोप्यतइति·स्थित्वाचकंचित्कालंक
तेप्रस्तावात्कथंराजातारापीडः·कथंदेवीविलासवतीकथमार्यःशुकनासःकीदृशीचोज्जयिनीकियदध्वनिसाकीदृग्भारतंवर्षरमणीयोवामर्त्यलोकइत्यशेषंपप्रच्छ।एवंविधाभिश्चकथाभिःसुचिरंस्थि
त्वोत्थायकादम्बरीकेयूरकंचंद्रापीडसमीपशायिनंसमादिश्यपरिजनंचशयनसौधशिखरमारुरोह।तत्रचसितदुकूलवितानतलास्तीर्णशयनीयमलंचकार·चंद्रापीडोपितस्मिन्नेवशिलातलेनिर
भिमानतामभिरूपतामतिगम्भीरतांचकादम्बर्यानिष्कारणवत्सलतांचमहाश्वेतायाःसुजनतांचमदलेखायामहानुभावतांचपरिजनस्यातिसमृद्धिंचगंधर्वराजलोकस्यरम्यतांचकिम्पुरुषदे
शस्यमनसाभावयन्केयूरकेणसंवाह्यमानचरणःक्षणादिवस्वापंस्थापितवान्।अथक्रमेणकादम्बरीदर्शनप्रजागरखिन्नःसुप्तमिवतालतमालतालीकदलीकंदलिनीप्रविरलकल्लोलानिलापीत
लांवेलावनराजिमवततारतारापतिः।अभ्यर्णविरहविक्लवस्यचकामिनीजनस्यानिश्वासितैरिवविश्लिष्टैर्म्लानिमनीयतचंद्रिका।चंद्रापीडविलोकनानुरूपमदेनेवकुमुदवनोदरनिशायंकजेषुनिपपात
लक्ष्मीः।क्षणदापगमेवस्त्रस्तकामिनीकर्णोत्पलप्रहाराणामुत्कण्ठितेष्विवक्षामतांव्रजत्सुरूपांडुतनुषुवासगृहप्रदीपेष्वनवरतशरक्षेपखिन्नानङ्ग·निश्वासविभ्रमेषुवहत्सुलताकुसुमपरिमलेषु
प्रभातमातरिश्वसुमंदरशिगिरिलतागहनगहनानिचभियेवभजतोमनुष्योरियोपसुप्तविनीशुगारकासु·क्रमेणचसमुद्गतेचक्रवाकहृदयानिवाससत्यानुरागमिवलोहितंमंडलमुद्वहतिसवितरिप्रिलात

का॰ द॰ दादुत्थाय प्रक्षालितमुखकमलः कृतसंध्यानमस्कृतिर्गृहीतताम्बूलः केयूरक विलोक य देवी कादम्बरी प्रबुद्धा न वा क्व वा तिष्ठतीत्यवोचत्। गतप्रतिनिवृत्तेन च तेन गान्धर्वराजतनयामालोकयितुमाजगाम। ददर्श च धवलम

७४ स्रक्सारिकाभिरक्षमालिकापरिवर्तनप्रचलकरतलाभिः पाशुपतव्रतधारिणीभिर्धातुरागारुणाम्बराभिश्च परिव्राजिकाभिः परिणततालफलवल्कललोहितवस्त्राभिश्च रक्तपटव्रतवाहिनीभिः सितवस

नाभिर्जिनबद्धस्तनपरिकराभिश्च श्वेतपटपञ्जनाभिर्जराजिनमौञ्जीवल्कलाषाढधारिणीभिर्वर्णिचिह्नाभिस्तापसीभिः साक्षादिव मंत्रदेवताभिः पठंतीभिर्भगवतस्त्र्यम्बकस्याम्बिकायाः कार्तिकेयस्य विश्रव

सोजिनस्यार्यावलोकितेश्वरस्यार्हतो विरिंचस्य पुण्याः स्तुतीरुपास्यमानाम नव्युराभ्यर्हिताश्च शाठ्याद्रनमस्कारैराभाषणैरभ्युत्थानैरासनैर्वेत्रासनदानैश्च दर्शनागतगंधर्वराजबांधववृद्धाः सम्मानयंतीं महीयसे नाप्र

यतश्च समुपविष्टेन किन्नरमिथुनेन मधुकरमधुराभ्यां वेणुभ्यां दत्तेनानेकलयपरिशुद्धायां गायता नारददुहित्रा पठ्यमाने च सर्वमंगलमहीयसि महाभारते दत्तावधानां पुरोऽवस्थिते च मणिदर्पणे तांबूलरागबद्धश्रि

कांधकारिम्न्नरदत्रानज्योत्स्नासिक्तमुक्तस्तंभच्छिपं दृष्टपाटलमधरं विलोकयंतीं शैवलतमस्यकर्णपूरशिरीषपेशलमिर्लोनानविलोचनेन बहुमदलंभमताभवनकलहंसेन प्रभातशशिनेव क्रियमाणामनप्र

णामप्रदक्षिणां कादम्बरीं च समुपसृत्य कृतनमस्कारस्तस्यामेव सुधावेदिकायां विन्यस्तमासनं भेजे। स्थित्वा च कंचित्कालं महाश्वेतया वदनं विलोकयन् सुस्मितकपोलो दर्शनं दर्शितमकरोत्। असौ नु तावदेव वि

दिताभिप्राया कादम्बरीमब्रवीत्। सखि भवत्या गुणैश्चंद्रापीडश्चन्द्रकान्तद्रव इव चन्द्रमयूखैरार्द्रीकृतो न शक्नोति वक्तुं जिगमिषति खलु कुमारः। पश्चाद्गुरुः स्वयमविदितवृत्तान्तं राजचक्रमास्ते। अपि च युवयोर्दूरस्थित

योरपि स्थितेयमिदानीं कमलिनीकमलबांधवयोरिव प्रीतिराप्रलयादनोभ्यनुजानात्वनुभवतीति। अथ कादम्बरी सखि स्वाधीनोऽयं सपरिजनो जनः कुमारस्य स्वदेहात्तत्साकरात्वा तु अनुशेषद्वपमभिधाय गंधर्वकुमारा

नाहूय प्रापयत कुमारं स्वां भूमिमित्यादिदेश। चंद्रापीडोऽप्युत्थाय प्रणम्य प्रथमं महाश्वेतां ततः कादम्बरीं तस्याश्च प्रेमस्निग्धेन चक्षुषा मनसा च गृह्यमाणो देवि किं ब्रवीमि बहुभाषिणो न श्रद्दधाति लोकः

स्मर्तव्योऽस्मि परिजनकथास्वित्यभिधाय कन्यकान्तःपुरान्निर्जगाम। कादम्बरीवर्जमशेषः कन्यकाजनो गुणगौरवाकृष्टः पश्चात्पश्चात्तं व्रजंतमा बहिर्निष्क्रमणादनुवव्राज। निवृत्ते च कन्यकाजने केयूरकेणोपनीतं

स्वपनः प्रपवादीत्। मदलेखे किमुच्यते निपुणासि जानासि ग्राहयितुमुत्तरमेवकाश्मपदं व्याकृतं वचसि कोऽशार्ले। अपि मुग्धे केवलमनीशोऽहमात्मनः केवा वयं ग्रहस्याग्रहणस्य वागतास्खलितं कथा

सौजन्यशालिनीभिर्भवतीभिरुपकरणीकृतोऽयं जनो यथेष्टमिष्टेष्वनिष्टेषु वा व्यापारेषु विनियुज्यतामिति दक्षिणायाः खलु देव्याः कादम्बर्या निर्दाक्षिण्यं गुणानर्कं किन्नरदासीकुर्वती त्वक्काच कादम्बरीसंव

द्धाभिरेव कथाभिः सुचिरं स्थित्वा विसर्जयांबभूव मदलेखां। अनतिदूरं गतायां तस्यां क्रीडापर्वतकगतमुदयगिरिगतमिव चंद्रमसं चंदनद्रवलहारधवलं चंद्रापीडं ददर्श स समुत्सारितवेत्रच्छत्रचामरचिह्नानि

बिडाशेषपरिजना तमालिका द्वितीया चित्ररथसुता पुनरपि तदेव सौधशिखरमारुरोह। तत्र स्थिता च पुनस्तथैव विविधविलासतरंगितैर्विलोकितैर्जहारास्य मनः। तथा हि मुहुर्नितम्बबिम्बन्यस्तवामहस्त

पल्लवां सप्रारंतांशुकानुसारस्रस्तारिततदक्षिणकरा निश्चलतारका लिखितेव। मुहुर्जृम्भिकारम्भदत्तोत्तानकरतलतया तत्क्षोत्रस्खलनभियानिपुणवदनेव मुहुरंशुकपल्लवतारितनिश्वासामोदलुब्धम

धुकरमुखरतया प्रस्तुताङ्गनेव मुहुरनिलगलितांशुकसम्भ्रमद्विगुणीकृतभुजयुगलप्रावृतपयोधरतया रत्नालिङ्गनसंज्ञेव मुहुः केशपाशाक्लेशकुसुमपरितातत्त्वलिसमाघ्राणलीलया कृतनमस्का

रेव। मुहुरुन्मयतर्जनीभ्रमितमुक्ताप्रालम्बतया निवेदितस्वरयोकलिको द्रुममिव। मुहुरुपहारकुसुमस्खलनविधुतकरतलतया कथितकुसुमायुधप्रहारखेदेनेव। मुहुर्गलितरसनानिगडनियतितचरणा

तया संयम्यार्पितेव मन्मथेन। मुहुः स्खलितोत्क्षेपितशिथिलदुकूलाक्षितितलदोलायमानांशुकैकदेशाच्छादितकुचा चकितपरिवर्तनतनुत्रिवलीवलयांसस्रस्ताचिकुरकलापसंकलनाकुलकरकम

ला। करासंस्पृष्टधवलीकृतकर्णोत्पलविलसमाणा स्मितसुधाधूसरितकपोला सा वीक्षतत्वरलमनेकरसभंगिभंगुरं विलोकयंती तावदवतस्थे यावदुपसंहृतालोको लोहितो दिवसो बभूव। अथ स्वर

पस्थितकमलिनीरागेणेव रज्यमाने राजीवजीवितेश्वरे सकललोकचक्रवालचक्रवर्तिनि भावति एषि। क्रमेण च दिनपरिलंबनशेखरकाभिः कामिनीदृष्टिभिरिव संक्रमितशोणिम्नि हतशोभे विप्रिया

तेजरठहारीतहरितवाजिनि। रविविरहमीलितसरोजसंहतिषु हरितायमानेषु कमलवनेषु श्वेतायमानेषु कुमुदषण्डेषु लोहितायमानेषु दिङ्मुखेषु नीलायमानेषु शर्वरीमुखेषु शनैः शनैश्च पुनर्दि

का॰ उ॰ तिलकयुवतिसीमंतकमकरिकाकोटिकोटीन सकलकन्यालोकस्य· सचरणरजःस्पर्शेनचयाद्प्रणामेन नमालिका· संदिष्टं च महाश्वेतया धन्याः खलु ते येषां न गतोसि चक्षुषोर्विषयं· तथा नाम स
मसृणंभवास्तेतुहिनशीतलाश्चंद्रमया इव गुणाः विरहे विषमया इव ज्वरयंति खलु जनाः कथमपि दिवसोपपादितायाम नोत्यान्निमेषशय्येवातीतदिवसाय· त्वया वियुक्तं निस्तनमहोत्स
७५ वासमिव वर्तते गंधर्वराजनगरं· जानासि च मां कृतसकलपरित्यागां तथापि कारणपक्षपातिनं भवंतं द्रष्टुमिच्छति· अनिच्छंत्या अपि मे बलात् हृदयमपि च वल्लवल्लभस्य शरीराकारस्मरी स्मार
तिचस्मेरा ननं स्मरकस्यं त्वामतः पुनरागमनगौरवेणार्हसीमां गुणवद्भिमानिनी कर्तुमुदारजना दरोहि बहुमानमारोपयत्यपत्यं सोढव्या चेयमस्माद्विषजनपरिचयकदर्थनानुभावेण·
भवमुजननेव जनयत्यनुचितं संदेशप्रागल्भ्यमेषदेवस्य प्रशासनीये विस्मृतः शेषोहारः प्रहितस्तु नवीयपराज संयतं सूक्ष्मसूत्रविवरनिःसृतैरंशुसंतानैः संसूच्यमानं विमुच्य वामकराग्राद्विण्या
:केयूरमर्पितवान्। अथ चंद्रापीडो महाश्वेताचरणारोधनतयः फलमिदं परिजनेषु नुस्मरणाय किं प्रसादमारम्भनि महान्नमारोपयति देवी कादम्बरीनु स्नातः सर्वं शिरसि कृत्वा स्वयमेव जग्राह।
तेन च कादम्बर्याः कपोलतलावण्येनेव गलितेन स्मितालोकेनेव रुदतामुपनीतमिव हृदयेनेव द्रुतेन गुणगणेनेव विसर्पितेन स्पर्शवता ख्यातिना सुरभिणा च विलेपनेन विलिप्तकंठेन मेव हारमकरोत्।
आगृहीत तां मूलमुहूर्तं स्थित्वोत्थाय वामबाहुना स्कंधदेशे समवलंब्य केयूरकं मूर्ध्नि स्थित एक तनयया त्रियमाणा सम्मानमुदितं प्रधानराजलोकं विसर्जयन् शनैः शनैर्गंधमादनं करिणं कुसुमयाञ्जी
तत्र च स्थित्वा क्षणमिव नक्षेस्वयमेव निजनखांशुजालजटिलं समणीकृमिव शाप्यकवलमवकीर्य वच्चभुरंगममनुरागाभिमुखः प्रतस्थे। गच्छंश्चोभयतः किंचित् किंचिद्विकीर्णस्वलितवदनः परिजनं विलो
कयां बभूव। अथ विजर्जरैः प्रतीहारैः प्रतिनिषिद्धानुगमनेन निखिलेन समुत्सारिते परिजने केयूरक द्वितीय एव मंदुरां विवेश। छन्नाहरणभयसंभ्रांतलोचनेषु प्रणम्यापसृतेषु मंदुरापालेषु इंद्रायुधस्य पार्श्वं गु
ठनयदं किंचिदेकपार्श्वगलितं समीकुर्वन्नुत्सार्य पश्चात्कूणितनेत्रत्रिभागस्पष्टदृष्टिनिरोधिकुंकुमकपिलां केसरसटां खुरखातरणी विन्यस्तचरणो लीलामंदं मंदुराद्वारदेशस्तम्भे देहभरः सकुतूहलमुवाच। केयूर

क कथममस्मन्निर्गमादारभ्य को वाहुत्तान्तो गंधर्वराजकुले· केन वा व्यापारेण वासरमतिनीतवती गंधर्वराजपुत्री· किं वाकरोन्महाश्वेता· किमभाषत वा मदलेखा· के वा भवत्रालापाः परिजनस्य· भव
तो वा को व्यापार आसीत्· आसीद्वा काचिदस्मदाश्रयणी कथा· केयूरकस्तु सर्वमाचचक्षे। देव श्रूयतां· निर्गते त्वयि स्वहृदयसदृशमप्रयाणपटहकलकलमिव नूपुरचक्रक्वणितेन कन्यकाजनसुरेकुर्वंती दे
वी कादम्बरी सपरिजना सौधशिखरमानुरूढानुरागप्रसरं देवस्यैव गमनमार्गमालोकितवती। तिरोहिते तद्दर्शने च देवे मदलेखास्कंधनिहितमुखी प्रीत्यानंदिगंतं दुग्धोदधिधवलैः प्लावयंतीव दृष्टि
पातैः सितातपत्रापदेशेन शशिनेव ईर्ष्यया निवार्यमाणरविकरस्पर्शा सुचिरं तत्रैव स्थितवती· तस्माच्च कथमपि सखेदमवतीर्य क्षणमिवास्थानमंडपे स्थित्वोत्थाय यत्र वल्लभीये वनिवेशमागोपहा
र कुसुमाघ्रायमाणैर्मधुकरैर्जलनखमयूखोन्मुखानामनुगलं गलद्भिर्वल्लयैः कंठबंधनिवेशपया द्यंती केकारवो हृद्याभवनशिखंडिनां· पदे पदे च कुसुमधवलान्करेण गाहृत्स्नायच्छवान्मन
सा रेवस्य गुणगणानवलम्बमानातमेव क्रीडापर्वतकमागतवती यत्र स्थितवान्देवः· तमुपेत्य च देवेनात्र मरकतशिलामकरिकाप्रणालप्रस्रवणासिच्यमानहरितलतामंडपे रत्नकशिलाशिलातले
स्थित· अत्र गंधोदकपरिमललीनालिजटिलशिलाप्रदेशे स्नातमत्र कुसुमधूलिसिकतिले गिरिनदिकातटे भगवानर्चितः शूलपाणिरत्र दैयितप्राग्धरशोचिविस्फटिकशिलातले भुक्तमत्र संक्रांत
चंदनरसलांछने मुक्ताशैलशिलापट्टे सुप्तमिति परिजनेन पुनः पुनर्निवेद्यमाना निर्देवस्यैव स्थानचिह्नानि पश्यंती क्षपितवती दिवसं। दिवसावसाने च कथमपि महाश्वेताप्रयत्नादनभिमतमपि तस्मिन्ने
व स्फटिकमणिवेश्मन्याहारमकरोत्। अस्तमुपगते च भगवति रवावुदिते चंद्रमसि तत्रैव कंचित्कालं स्थित्वा चंद्रकांतमयीव चंद्रोदये प्रस्यार्दीकृततनुश्चंद्रबिम्बप्रवेशभयेनेव करेणैकपोलयोः कृत्वा किमपि चिंतयंती
मुकुलितेक्षणा क्षणमात्रं स्थित्वोत्थाय विमलनखनिपतितशशिप्रतिमाभरगुरुणीव कृच्छ्रादुत्क्षिपंती लीलामंथरगमनपटू निपदानि शय्यागृहमगात्। शयने निक्षिप्तमात्रयष्टिश्च ततः प्रभृति प्रव
लया शिरोवेदनया विचेष्टमाना दारुणेन च दाहज्वरेणाभिभूयमाना केनाप्यधिगमाधिगमं गलप्रदीपैः कुमुदाकरैश्च चक्रवाकैश्च सार्धमनिमीलितलोचना दुःखदुःखेन क्षणदामनैषीत्· उषसि च मामाहू

लि३

का·द· पत्रलेखस्य वार्त्ताव्यतिकरेण सोपालंभमास्थितवती· चंद्रापीडस्तदाकर्ण्य जिगमिषुरश्वोत्क्षुरतिवरन्भवनान्निर्ययौ· आरोपितपर्याणं च तारितुरगं परिवारकोपनीतमिंद्रायुधमारुह्य पश्चीकृतशेषपत्र
लेखां स्कंधावारे स्थापयित्वा वैशम्पायनमशेषपरिजनं निवर्त्य चान्यतुरगारूढेनैव केयूरकेणानुगम्यमानो हेमकूटं ययौ। आसाद्य च कादम्बरीभवनद्वारमवततार। अवतीर्य च द्वारपालार्पिततुरंगः
७६ कादम्बरीप्रथमदर्शनकुतूहलिन्या च पत्रलेखया चानुगम्यमानः प्रविश्य क्व देवी कादम्बरी तिष्ठतीति सम्मुखागतमन्यतमं वर्षधरमप्राक्षीत्। कृतप्रणामेन च तेन देव मत्तमयूरस्य क्रीडापर्वतक
स्याधस्तात्कमलवनदीर्घिकातीरे विरचितं हिमगृहमध्यास्ते इत्यावेदिते केयूरकेणोपदिश्यमानवर्त्मा प्रमदवनमध्येन गत्वा किंचिद्धानं मरकतहरितानां कदलीवनानां प्रभया श्यामीकृतरवि
किरणं हरितायमानं दिवसं ददर्श· तेषां च मध्ये निरंतरनलिनीदलछत्रं हिमगृहमपश्यत्। तस्माच्च निष्पतंतमार्द्रांशुकच्छलेनाङ्गेर्जलेनेव संवाततं बाहुलताविष्टनैर्मृणालवलयैरा
रणकैरिव धवलितावयवमापांडुभिश्चैकश्रवणाश्रयैर्मृणालंकीकृतैः केतकीगर्भदलैरुपहसितदंतपत्रमालिखितचंदनललाटिकानिमुखार्धविंशान्निबद्धशोभामुपयदानीवद्धानं कृतचंदनबिंदुविश्रो
षकांश्चादिवापि स्पर्शलोभस्थितेन प्रतिबिम्बानिव कपोलानुद्वहन्तमपरत्नाशेषशिशिरशोभाभ्याभिः शैवलमंजरीभिः कृतकर्णपूरं कर्पूरधूलिधूसरेषु मृणालपञ्जरस्खलद्वलुलितेषु च कुलावली
वलयेषु स्तनेषु न्यस्तनलिनीपत्रप्रावरणमनवरतचंदनचर्चाप्रणयपांडुरैः संतापशेषमदितैः बकुलैरिव करैः कारयितमधुरालसं दृशा निविसत्तं तु मया निचामशरीरविभाजमुज्ज्वालनैः कमलैः कुमु
दैः कुवलयैः कदलीदलैः कमलिनीपलाशैः कुसुमरूपचकैश्चातपत्रीकृतैर्निवारितातपं जलदेवानामिव समूहं अनुपाश्रयामिव समागमं शरदामिव समाजं सरसीनामिव गोष्ठीबंधं शिशिरोपचारनिपुणं
कादम्बर्याः प्रतीपपरिचारिकाप्रायं परिजनमद्राक्षीत्। तेन च प्रणम्यमानः पादनखपतनभयादिव त्वरितापसृतेन दीयमानमार्गः सुंदरनयं कृतवेदिकानां पुंडरीककलिकाघटितघंटिकानीविकसितसितसिं
दुवारकुसुममंजरीचामराणां लम्बितस्थूलमल्लिकामुकुलहाराणामाबद्धलवंगपल्लवचंदनमालिकानां दोलायमानकुसुमदामधजानां मध्यात् लवेत्रहस्ताभिर्दृष्टीनां रुचिरकुसुमाभिर्मधुलक्ष्मीप्रकृतिभिरिव द्वा

वाजिनमारुह्य गंधर्वकुमारकैरनुगम्यमानो हेमकूटात्प्रत्यागंतुं। गच्छतश्चास्य चित्ररथतनयानकेकजन्मजर्वैहिद्वर्षिव सर्वेषां निबंधनमासीत्। तथाहि तन्मयेन मानसेनासहाविरहदुःखानुपायलग्नामि
वपृष्ठतः कृतमार्गगमननिरोधामिव पुरस्तात् दृशोरगाकुलतदर्यो कलिकावेशविक्षिप्तामिव नभसि सम्यगालोकयितुं वदनविरहातुरमानसामिवावस्थितामुखस्य लेखामिव मृगलोचनां ददर्श। क्रमेण च
प्राप्य महाश्वेताश्रममच्छोदसरस्तीरे सन्निविष्टमिन्द्रायुधखुरपुटानुसारेणैवागतमात्मस्कंधावारमपश्यत्। निर्वर्तिताशेषगंधर्वकुमारश्च सानन्देन सकुतूहलेन सविस्मयेन च स्कंधावारवर्तिना जनेन प्र
णम्यमानः स्वभवनं विवेश। सम्मानिताशेषराजलोकश्च वैशम्पायनेन पत्रलेखया च सहैवं महाश्वेतैवं कादम्बर्येवं मदलेखैवं केयूरक इत्यनयैव कथया प्रायो दिवसमनैषीत्। कादम्बरीरूपदर्शनहृदयेनास
पुरेव श्रीनिभकरोद्राजलक्ष्मीः। तामेव च धवलेक्षणामबद्धरणास्य-- न चेन सा चिंतयतो जाग्रत एव सा जगाम रात्रिः। अपरेद्युश्च समुत्थिते भगवति रव्यवस्थानमंडपगत-- तेनैव मनसा सह से
वप्रतीहारेण सह प्रविशंतं केयूरकं ददर्श। दूरादेव च क्षितितलस्पर्शिना मौलिना कृतपादपतनमेह्येहीत्युक्त्वा प्रथममपांग-विसर्पिणा च चक्षुषा ततो हृदयेन ततो रोमोद्गमेन पश्चाद्भुजाभ्यां प्रधावितः प्रस
तमालिलिंग गाढं। उपावेशयच्चैनमात्मासनसमीप एव पप्रच्छ च स्मितसुधाधवलीकृताधरं प्रीतिद्रवमयमिव वचनमाहत· केयूरक कथय कुशलिनी देवी सह सखीजनाः सपरिजना कादम्बरी भगवती महा
श्वेता चेति· असौ तु तेन राजसूनोः प्रीतिप्रहर्षजन्मना स्मितेनैव स्नापित इवानुलिप्त इव सर्वस्यापगताध्वखेदः प्रणम्यादृततरमवोचत्। अद्य कुशलिनी यस्मादेवं देवः पृच्छतीत्यभिधाय अपनीयार्द्रवस्त्रक
पटावगुंठितं विससूत्रसंयतमुखमार्द्रचंदनपंक-न्यस्तवालम्बनालवलयमुद्रं नलिनीपत्रपुटमदर्शयत्। उद्घाट्य च तत्र कादम्बरीप्रहितान्यभिज्ञानान्यदर्शयत्। तद्यथा· मरकतहारिणं तिर्यग्नीतं चित्रा
रमंजरीभाञ्जि क्षीरणिपूगीफलानि· शुककामिनीकपोलपांडूनि ताम्बूलीदलानि· हरकंठखंडस्थूलशाकलं च कर्पूरं· मतिबहलमृगमदामोदमनोहरं च मलयजविलेपनं· अब्रवीच्च· चूडामणिचुम्बिनाको
मलाङ्कः ललाटविनिर्गतज्योतिर्जालेनाञ्जलिना देव मर्चयति देवी कादम्बरी· महाश्वेता च सकंठग्रहेणानुप्रश्नवसापर्यस्तशिखंडमाणिक्यज्योत्स्नापितललाटेन च नमस्कारेण मदलेखा·हि

विरहदुःखदुःसहदिवसातिवाहनस्थानमिव कुमुदिनीनां· हुतहुताशननिर्वापणक्षेत्रमिव मकरध्वजस्य· दिनकरकरैरपि सर्वतोजलयंत्रधारासहस्रसमुत्सारितैरतिशीतस्पर्शभयेनेव परिहृतं· अनिलैरपि
का॰ द॰ कदम्बकेसरोत्करवाहिभिः कंटकितैरिवानुगतं· कदलीवनैरपि पवनचलितदलैर्जाड्यजनितवेपथुभिरिव परिवारितं· मलिभिरपि कुसुमामोदमदमुखरैरवबद्धदंतवीणैरिवावासितं लताभिरपि निर
७१ न्तरमधुकरपटलजटिलाभिर्गृहीतनीलप्रावरणाभिरिव विराजितमासमासाद्य क्रमेण चतत्रान्तर्बहिश्चातिबहलेन पिंडहार्येणेव लिप्यमानेनातिपीनेन स्पर्शेनामन्यतात्मनो मनसश्च हिममयं कुमुदमया
नीन्द्रियाणि· ज्योत्स्नामयान्यङ्गानि· मृणालिकामयीं धियमगणयच्च हरिचंदनमयानर्ककिरणांश्चंद्रमयमातपं कर्पूरमयं पवनं मुक्तामयं कालं तुषारमयं त्रिभुवनमेवंविधस्य तस्यैकदेशे सखीकदम्बकपरि
वृतामग्रेवसरित्परिवारामिव भगवतीं गंगां हिमवतो गृहावलग्नां· कुल्याम्भःसिम्भितेन कर्पूररससस्रोतसा कृतपरिक्षेपामणालदंडमंडपिकायास्तले कुसुमशयनमधिशयानां हाराङ्गदवलयरसनानूपु
रैर्मृणालमयैर्निगडैरिव संयतां· मीर्ष्यामयेन चन्दनधवलेस्पृष्टामिव ललाटे· शशलांछनेन बाष्पवारिवाहिनि चुम्बितामिव चक्षुषि· वरुणेन वर्धितनिश्वासमरुतिदष्टामिव मुखे· मातरिश्वना संताप
• प्रतप्तेऽध्यासितामिवाङ्गे· सुपतङ्गेन कन्दर्पदाहदीपितेन गृहीतामिव हृदये· हुतभुजा स्वेदिनि परिष्वक्तामिव वपुषि· जलेनेव स्वेदैरपि विलुप्यमानसौभाग्यामिव· सर्वतोत्सृष्टेनेव समूहप्रियतमस
मीपमिवोपगतेन हृदयेन कृशजनितदौर्बल्या· मायानं चंदनपांडुरं चरणौ मान्थमनवरतहारस्पर्शलग्नमुक्ताफलकिरणपुञ्जमिवोद्वहन्ती· स्विदसीकरिणीचकपोलपालीपञ्चपवनेन वीजयद्भि
रनुकम्प्यमानामिवावतंसमधुकरैः· श्रवणसमधुकरस्वनं दहनदग्धमिव श्रोत्रमपाङ्गनिर्गतेनाश्रुस्रोतसा सिंचन्ती· गतिप्रवर्तनस्य चाश्रुणो निर्वाहप्रणालिकामिव कर्पूरकेतकीकलिकां कर्णे कल
यन्ती· मायतन्वासविक्षतितरलितेन नवसंतापभयपलायमानेन हृदयप्रभाविताने नेवांशुकेन विमुच्यमानकुचकलशाम्· आपतत्प्रचलचामरप्रतिबिम्बं चकुचकलशयुगलं प्रियाप्तिकामनोत्स्कन्दकृतप
हमिव करतलेन निर्धुन्वतीं मुहुर्मुहुर्भुजलतया तुषारशिलाशालभंजिकामालिंगन्तीं मुहुः कपोलफलकेन कर्पूरपुत्रिकामाश्लिष्यन्तीं मुहुश्चरणारविन्देन चंदनपङ्कप्रतियातनामास्पृशन्तीं स्तनसंक्रा

न्तेनात्ममुखेनापि कुतूहलिनेव परिहृत्य विलोक्यमानां कर्णपूरपल्लवेनापि स्वप्रतिबिम्बपल्लवप्रणयिना सोत्कंठेनेव चुम्ब्यमानकपोलफलकां हारैरपि मुक्तात्मभिर्मदनशरवर्षैरिव प्रसारितकरैरा
लिङ्ग्यमानां· मणिदर्पणमुखसन्निहितं विनोदितव्यमिति दृष्टिजीवनस्पर्शसमयं शशिनमिव कारयन्तीं करिणीमिव सम्मुखागतप्रमत्तवनगंधवारणप्रसारितकरां· प्रस्थितामिवाभीष्टद
क्षिणवातसंगागमनां· मदनाभिषेकवेदिकामिव कमलाहृतचंदनधवलपयोधरकलशां वक्षःपार्श्वोपाकाशकमलिनीमिव स्वच्छाम्बरजलदृश्यमानमृणालकोमलोरुमूलां कुसुमचा
पलेखामिव मदनारोपितगुणकोटिकान्तरांगमधुमासदेवतामिव शिशिरहारिणीं मधुकरीमिव कुसुममार्गणाकुलां· चन्दनविलेपनामनङ्गरागिणीं च बालां मन्मथजननीं च· मृणालिनीमप्य
• र्थितनुषारस्पर्शां चिकाद्रवस्वेदीं च लोकयत्। अथ सा यथादर्शनमागत्यागत्य चंद्रापीडागमनमावेदयन्तं परिजनमुत्तरलतारकेण चक्षुषा विलोक्य कथय किं सत्यमागतो दृष्टस्त्वया किपाय
धनिकासाविति प्रतिमुखं निक्षिपन्ती सा स्वयं प्रवर्धमानधवलिम्ना चक्षुषाद्दृष्ट्वा सम्मुखमायान्तं दूरादेव वरारोहा नवग्रहाकरिणीवोत्तम्भविद्युतावेष्टमाना हिमकुसुमशयनपरिमलोपगतैःपदव
श्रामुखरैर्मधुकरकुलैरिवाह्यमानासंभ्रमच्युतोत्तरीयाकाचहारकिरणानुरासिकर्तुमिच्छन्ती· मणिकुट्टिमनिहितेन वामकरतलेन हस्तावलम्बनमिव निजप्रतिमामिव याचमाना· स्रस्तकेशकलाप
संयमनं भ्रमितेन गलत्स्वेदसलिलेन दक्षिणाकरेण सम्मुखसेव्यमानपर्यन्तीवलितत्रिकता मम म्रत्रिवलीतरंगितरोमराजि यानिष्पीड्यमानेव सर्वरसानन्दे· नान्तः प्रविष्टस्फाटिका
चंदनरसमिव प्रमिव चक्षुषा स्रवंती शिशिरमानन्दजलमानन्दविन्दुवारिणी कपायचरितावतंसधूलिधूसरं प्रियप्रतिमाप्रवेशलोभेनेव कपोलफलकं प्रक्षालयन्ती· लल्लाटिका
चंदनभरेणेव किञ्चिदधोमुखी· तत्क्षणमपाङ्गभागपुंजिततारकपातम्मुखलग्नेव दीर्घयादृष्ट्या कृष्यमाणा कुसुमशयनादुदतिष्ठत्। चंद्रापीडस्तु समुपसृत्य पूर्ववदेतां महाश्वेताप्र
तीहार्यासमुपनीतां जाम्बूनदमयीमासंदिकां शे चिह्नम् लन्मतुममयादं यादृशेनैवोत्सार्य क्षितावेवोपाविशत्। अथ केयूरकोऽपि देवस्य चंद्रापीडस्य प्रसादभूमिरेषा पत्रलेखानामताम्बूल

का॰द॰ कंरंकवाहिनीत्यभिधायपत्रलेखामदर्शयत्। अथकादम्बरी दृष्ट्वातामहोमानुषीषुपक्षपातःप्रजापतेरितिचिंतयांबभूव। कृतप्रणामांचसादरमेह्येहीत्यभिधायात्मनःसमीपेसकुतूहलपरिजनदृ
श्यमानांपृष्ठतःसमुपावेशयत्। दर्शनादेवोपारूढप्रीत्यतिशया मुहुर्मुहुरेनांसोपग्रहंकरकिसलयेनपस्पर्श। चंद्रापीडस्तु क्षणमिवस्थित्वा सकलागमनाचितोपचारः तदवस्थांचित्ररथतनयामालोका
७८ चिंतयत्। अतिदुर्विदग्धं हि मे हृदयमद्यापि न श्रद्दधाति। भवतुपृच्छामितावदेनांनिपुणमुपायेनेतिप्रकाशमब्रवीत्। देविज्ञानाभिकामस्मि नितिभिजीकृत्य प्रश्नेऽयमविचलसंतापतंत्रो व्याधिः
सुतनुसत्यं न तथात्वामेषव्यथयतियथास्मानिच्छामिदेहदानेनापिस्वस्थामत्रभवतींकर्तुमुत्कंठिनीमुत्कम्प्यमानस्यकुसुमेषुपीडयापतितामवेक्षमाणस्यपततीवमेहृदयमनंगः देव
भूमनेभुजलतेगाढसंतापतयाचदृष्ट्वाबहुविसमलकमलिनीमिवरंजनामुष्या दुःखितार्याचसखीपरिजनोपिवानवरलकृताश्रुविंदुपातेनवर्तते। मुक्ताभरणतांगृहाणस्वयंवराहाणि
मंगलप्रसाधनानिकुसुमशिलीमुखात्रह्निताशोभनेतथालतेति। अथकादम्बरीबालतयास्वभावमुग्धापिकंदर्पेणोपदिश्यमानेवप्रज्ञयातमशेषमस्याव्यक्तव्याहारसूचितमर्थमनसा
जग्राह। मनोरथानांतावतीतांभूमिमसंभावयंतीशालीनतीबालम्बमानात्क्षणमिवासीत्। केवलमुत्पादितान्यव्यपदेशेनतत्क्षणंतमाननामोदमधुकरपरलांकारितंकुसुमितस्मितालो
कमकरोत्। ततोमदलेखाप्रत्यवादीत्। कुमारकिंकथयामिदारुणोयमकथनीयःखलुसंतापोपिचकुमारभावोयेनास्याः किमिवास्यायत्रसंतापायजथाहिमृणालिन्याःशिशिरकिसलयमपिहु
ताशनायतेज्योत्स्नाप्यातपायते। ननुकिसलयतालवृंतवातैर्मनाक्शितायमानंकिंनपश्यसिखेदंधीरत्वंप्राणसंधारणहेतुरस्याइतिकादम्बरीहृदयमेवजनमदलेखालापमस्यप्रत्युत्तरीचकार। चं
द्रापीडोप्युभयथाघटमानार्थतयासंदेहदोलारूढएवचेतसामहाश्वेतयासहप्रत्युपचयचतुराभिःकथाभिर्महांतंकालंचस्थित्वातथैवमहतायत्नेनमोचयित्वात्मानंस्कंधावारगमनायकाद
म्बरीभवनान्निर्ययौ। निर्गतंचतुरंगमानुबद्धंतंपश्चादागत्यमयूरकोभिहितवान्। देवमदलेखाविज्ञापयतिदेवीखलुकादम्बरीप्रथमदर्शनजनितप्रीतिःपत्रलेखांनिवर्तमानामिच्छतिपश्चादा
सतीतिश्रुत्वादेवःप्र॰१

एपालिकाभिरधिष्ठितानांकदलीतोरणानांतलेनप्रविश्यसर्वतोनिसृष्टदृष्टिर्ददर्श। क्वचिदुभयतटनिखाततमालपल्लवकृतवनलेखाःकुमुदधूलिवालुकापुलिनमालिनीश्चन्दनरसेनप्रवर्त्यमानाःग
हनदिकाः। क्वचिद्विपुलमंजरीरचितरक्ताम्बराणांजलार्द्रवितानकानांतलेषुसिंदूरकुट्टिमेषुआस्तीर्यमाणानिरक्तपंकजशयनानि। क्वचिदेलारसेनसिच्यमानानिस्पर्शानुमेयरम्यभित्तीनिस्फटिक
भवनानि। क्वचिच्छिरीषपक्ष्मकृतशाड्वलानांमणात्स्वधारागृहाणांशिखरमारोप्यमाणानांधाराकदम्बधूसरितानांयंत्रमयूरकाणांकदम्बकानि। क्वचित्सहकाररससिक्तैर्जलपल्लवैराच्छाद्यमाना ५२
म्भजरःपर्णशालाः। क्वचित्क्रीडितकृत्रिमकरिकलभयूथकाकुलीक्रियमाणाःकाञ्चनकमलिकाः। क्वचिद्गंधोदककूपेषुवद्धकाञ्चनसुधापद्मकामयपीठेषुस्थूलघटीप्रत्यनादंउद्घाटितारकाणिकृतके
तकदलद्रोणिकानिकुवलयावलीतन्तुभिर्ग्रथ्यमानानिपत्रपुटवटीयंत्रकाणि। क्वचित्स्फटिकवलाकावलीवांतवारिधारालिखितेन्द्रायुधसलिलदन्तुरिततरंगासुहरिचंदनद्रवापिकासुशिशिरीक्रियमा
णाहारयष्टीः। क्वचिन्मुक्ताफलजोदराचितालवालकाननवरजस्थूलजलविंदुदुर्दिनमुत्सृजतःपत्रहस्तकान्। क्वचिद्विधुतपल्लवनिक्षिप्तसीकरानीतनीहाराभ्रमंतीर्यंत्रमयाःपत्रशकुनिश्रेणीः। क्व
चिन्मधुकरकिंकिणीपंक्तिपटुतरबाध्यमानाःकुसुमदामदोलाः। क्वचिद्दरान्तनिर्गतोत्तालनलिनीछदच्छादितमुखान्प्रवेश्यमानान्पीतकुंभान्। क्वचिद्घटितकदलीगर्भस्तंभदंडीनिबध्यमानानि
चारुवंशाकृतीनिकुसुमस्तवकातपत्राणि। क्वचिल्लम्बमानकर्पूरपल्लवरसेनाधिवास्यमानानिबिसतंतुमयान्यंशुकानि। क्वचिल्लवलीफलद्रवेणार्द्रीक्रियमाणास्तरुणाम्रकमंजरीकर्णपूरान्। क्व
चिद्दंष्ट्रोज्जिनीदलव्यजनैर्वीज्यमानानुपलभाजनभाजःश्रीतोयधिरसानन्यांश्चैवंप्रकारान्शिशिरोपचारोपकरणकल्पनाव्यापारान्परिजनेनकृतान्क्रियमाणांश्चवीक्षमाणोहिमगृहकस्य
मध्यभागंकुसुमगृहमिवसर्वचंदनवनदेवतानांप्रभवमिवसर्वचंद्रमणीनांनिवासमिवसर्वमाघमासयामिनीनांसंकेतसदनमिवसर्वप्रावृषांग्रीष्मोष्मापनोदेहृदमिवसर्वनिम्नगानां। वडवानलसं
तापापनोदनानिवासमिवसमिवसर्वसागराणां। वेधुनदहनदाहप्रतीकारस्थानमिवसर्वजलधाराणां। दर्पमिवहिमवतोजलक्रीडागृहकमिवप्रचेतसो। जन्मभूमिरिवसर्वचंद्रकलानामिनु

का॰द॰
७२

दृतमस्याः रविकणोऽस्मि केनेव देवीप्रसादेन गंतुं। सर्वथा गतोऽस्मि पितुरादेशादुज्जयिनीं प्रसंगतो जनकथाकीर्तनेषु स्मर्तव्यश्च खलु चंद्रापीडः स्वप्नेऽपि मा चैवं मंस्थाः यथा जीवन्पुनर्देवीचरणारविंदवंदनानंद
मननुभूय स्थास्यति चंद्रापीड इति। महाश्वेतायाश्च प्रदक्षिणं शिरसा पादौ वंदनीयौ मदलेखायाश्च कथनीयः प्रणामपूर्वमाश्लिष्य कंठग्रहो गाढमालिंगनीया च तमालिका। अस्मद्वचनादाश्लेषः प्र
ष्टव्यः कुशलं कादम्बरीपरिजनो रचिताञ्जलिना च भगवानामंत्रणीयो हेमकूट इत्येवमादिश्य तं सुहृद्वारदिशा साधनमलशयनाश्च नैः शनैर्गंतव्यमित्युक्त्वा वैशम्पायनं स्कंधावारभरे न्यस्य युक्तः स्व
यमपि च तथा रूढ एव मामनहेलाहर्षद्वेषाश्वकल्पितकेलासेन खुरताडचखंडितभुवा कात्रकुंजलतावनवाहिना तरुणतुरगप्रायेणाश्वसैन्येन तमेव लेखहारकं पर्याणलग्नमभिनवका
दम्बरीवियोगसम्भूयेनापि हृदयेनोज्जयिनीमार्गमप्यक्रांतस्थे। क्रमेण चातिप्रकृष्टप्रकांडपादपप्रायया मालिनीलतामंडपैर्मंडपितसकुस्थलतया गजपतिपातितपादपपरिहारवक्रीकृतमा
र्गया जनजनितदावानलपर्णकाषकोटिकृष्यकरितवीरपुषस्थानस्थानया महायाष्टप्रमलोत्कीर्णकांतारदुर्गया ऽक्षपितपथिकखंडितदलोत्क्षिप्ताम्लकीफलनिकरया विकासितमंज
रीजालोबिंदुरितजटैरुन्नतोत्कटपट्चरकर्पटध्वजचिह्नैः शिखिकास्थितस्युकपट्टविषयानुमितपथिकविश्रामैर्विश्राणकार्पटिकप्रस्फोटितधूलिधूसरसलपल्लांछितोपकंठैः पत्रसंकरसुरभी
कृताशिशिरपंकिलविवर्णास्वादुजलैर्ग्रंथितर्ग्रंथिग्रथितपर्णपुटतृणपूलीचिह्नानुमेयैर्जरत्कानारकूपैः सुलभसलिलतया नाभिलषितोद्देशया मधुविंदुस्यंदिपिंडखर्जूरवनराजिरजोधूसरितनी
शामिश्रकुंजकलताजालकैर्जटिलीकृतशिकताभिरश्वगोत्खातजवालुकाकूपिकोपलभ्यमानकलुषाल्पसलिलाभिः शुष्कगिरिनदिकाभिर्विषमीकृताजरालयाकुक्कुटकुलकौलेयकदर्शितानुगीय
मानगुल्मगहनग्रामकया आर्द्रस्ययातिविसमरव्याप्तलापरिणतैः विविक्तैः विम्बारुण्यातनयविसरैर्वासरैर्निःशेषीकृतकरम्बकाणामलीमसाश्यावकुलैः शिखरशेषैकपल्लवविडम्बितातपत्रैः
पार्श्वे रूढस्थितप्ररोहस्थूलस्थाणुमूलग्रंथिजटिलैः श्लेष्मदृहरितालकपिलपर्कैवणफविटपदलखचितरजिभिर्मगभयकृततृणपुंजकैर्विपाकपांडुभिः फलिनैः प्रियंगुप्रायैरटवीक्षेत्रै

विरलीकृतवनप्रदेशैः निरन्तरुरुसारकचंदनतरुपरिवद्धस्तवपिशितपिंडालिभैः लकुचैरभिनवशोणितारुणेन रक्तचंदनरसेन जिह्वालताललोहिनीभी रक्तपताकाभिः केशकलापकांतिना
बकुलमवामरावचूलेन प्रत्यग्रविशसिताना जीवानामिव वपुर्वैरूपरचितदंतमंडनं हाटकघटितबुद्बुदपुरःधर्घचंद्रखंडैरेवाचितं सुतमाहिषरक्षणावती दिनकर एव तारितशशिनेव विराजित
त्रिशूलशरीरावलावित्तमर्थं ग्रासंगिलोहश्रृंखलावलंबमानधर्घरखंडैः खट्टांगखंड्या च घटितके सरिसरटानुचिरश्चामरयाकांचनत्रिशूलिकया शिखिविततभस्थलयितस्ततः पथिकपुरुषोपहारसमा
गमिवालोकयंतं महाजीर्णकधाजं रक्तध्वजं ददर्श तदभिमुखश्च किंचिदध्वानं गत्वा केतकीसूचिखंडपांडुरेण वनदूरदेवताभरणेन परिगतां लोहितारुणेन चरकचामरावलिपरिकरांकाला
यसदर्पणमंडलमालासंबद्धरमुखमालामिव कपालाकुरुभीषणाभिभागेन सनाथीकृतद्वारदेशामभिमुखप्रतिष्ठितननिहितरक्तचंदनहस्तनया रुधिराक्तगामेयकस्तलास्फालितेनेवघोणि
तलोभलोलशिवासिसृमानरोहितलोचनेन लोहमहिषेणाध्यासितां जननिशिलावेदिकां क्वचित्क्रोत्पलैः शवशनिपातितानां वनमहिषाणामिव लोचनैः क्वचिद्गलितकुसुमैः केसरिणा
मिव करजैः क्वचित्किंशुककुसुमकुड्मलैः शार्दूलानामिव सरुधिरैर्नखरैः कृतपुष्पपुष्पप्रकरामन्यत्राकुंचितामिव कुटिलविषाणकोटिकूटैः पल्लविताभिव सरसजिह्वाछेदशतैः कुसुमि
तामिव रक्तनयनसहस्रैः फलितामिव मुंडमंडलैः उपहारहिंसार्थ यतीपाशखानरलिनिश्चलस्तनिलीनरक्तकुक्कुटकुलैः श्वमयादकालदर्शितकुसुमस्तबकैः रक्ताशोकविटपैर्भक्षितांगणां
बलिरुधिरपानतमयावेतालैरिवतालैरीयमानफलमुण्डोपहारांशं कांज्वरकं पितैरिवकदलिकावनैर्भयोत्कंटकितैरिव श्रीफलतरुमंडपैस्त्रासोर्ध्वकेशैरिव खर्जूरखनैः समन्तात्परिवृतां कनक
शिकुलकुंभविदलितमुक्ताफलानिरुधिरारुणानिव लोलिक्षिप्य लुब्धमुग्धस्तवकाकुग्रस्तमुक्तानि विकिरद्भिरंबिकापरिग्रहदुर्ललितैः कीरशकुंतैः केसरिकिशोरकैरिवमृत्योरेशांशभूतरुधिरद
र्दनोद्भूतमयूर्शापातितेनेव प्रतिबिम्बितेनारक्तता मेणसवित्रा नरीकृतैः सुतजनजलप्रवाहैः पिच्छिलीकृताजिरामवलम्ब्यमानदीपधूपरकांशुकेन ग्रथितशिरशिखालक्षयांतलिनपिष्टपिंडपांडुरि

का॰द॰ तथानरशिरोमालाभारिणा त्रायमाणसिंहमुखमध्यस्थितस्थूललोहकरकंकणतरवंशगर्भलांगलस्पीतनीललोहितदर्पणस्फुरितबुद्बुदमालंकपाटयुगंदधानेनगर्भगृहद्वारदेशेनदीयमानामत्रांबिकापद्मा
८० तिमिश्रसर्वपशुजीवितैरिवचरणमुपागतैरलक्तकपटैरविरहितचरणमूलांपतितकृष्णचामरप्रतिबिम्बानांचशिरःछेदलग्नकेशजालकानामिवपशुयद्दिशाप्रभृतीनांजीवविशसनशस्त्राणांप्रभा
भिर्दूरदृश्यांधकारतयापातालनिवासिनीमिवोपलभ्यमानांरक्तचंदनखचितसुरत्नपुलकितैश्चबिल्वपत्रदामभिर्वालकमुंडमालैरिवरक्तमंडनांशोणितताम्रकरंबकरुणार्कैरैश्वर्यमुपहारयदृष्टपु
रहितदृष्टोल्लसितरोमांचैरिवबाहुभिः कूष्माण्डुदहंतीचारुचामीकरपट्टप्रारंभेनचललाटेनप्रावसुन्दरी रचितसिंदूरतिलकविंदुनादाडिमीकुसुमकर्णपूरप्रभासेकलोहितायमानकपोलभित्तिनारुधि
रताम्बूलारुणिताधरपुटेनभ्रुकुटिकुटिलचक्षुषानयनेनमुखेनकुसुंभपाटलितदुकूलकल्पितयाचदेहलतयामहाकालाभिसारिकावेषविभ्रमंबिभ्रतीसंपिंडितनीलगुग्गुलुधूमांधकारीकृता
भिश्चप्रचलंतीभिर्गर्भगृहदीपिकाम्लताभिरकुलीभिरिवमहिषासुररुधिरारुणितत्वाल्लोहितीभिः स्कंधपीठकंडूयनचलितत्रिशूलदंडकृताघर्षणधवलमहिषमिवतर्जयंतीप्रचलकूर्चधरैःछा
गैरपिधनवृतैरिवस्फुरदधरपुटैरास्वुभिरपिजपपरैरिवकृष्णाजिनप्रावृताङ्गैःकुरंगैरपिप्रतिशयनैरिवज्वलितलोहितमूर्धरत्नरश्मिभिः कृष्णसर्पैरपिशिरोधृतमणिदीपकैरिवारा
ध्यमानांसर्वतः कठोरवायसगणेनचदृष्टनामस्तुतिपरेणेववक्ष्यमाणांस्थूलस्थूलैः।शिराजालकैर्गोधिकागोलिकाकृकलासकुलैरिवराधयस्थाणुचापांकयासमानूढैर्गवाक्षैर्जालस्मीपमुखातर
ल्पणस्थानीरविविस्फोटव्रणबिंदुभिः कल्माषितसकलशरीरेणकर्णवर्तंसंसंस्थापितयाच्चरपानुद्राक्षमालिकांदधानेनाम्बिकापादपतनश्यामललाटवर्धमानार्बुदेनकरातिरिक्तदंतादिडाञ्जनस्फु
रितैकलोचनतयात्रिकालमितस्लोचनाक्रांतदानादरस्कन्धोद्भीकृतदारुशलाकेनप्रत्यहंकटुकालाबुस्वेदप्रारब्धदंतुरतायतीकारेणकथंचिदस्थानदनोर्ध्वकायप्रहारतयाश्रुधैककभुजोपयानमर्दनव्यस
नेनोपर्युपर्यविश्रांतकटुकवार्तप्रयोगवर्धिततिमिरेणाश्रमभेदसंगृहीतवरहंसैरेणहुरीकोशकृतौषधांजनसंग्रहेणसूचीसूत्रशिरासंकोचितगमकशह्विलिनाकोषेयककोशावरणजातिवृणितचर

माणमित्याकर्ण्यचंद्रापीडः केदृशकधन्यास्पृहणीयाचपत्रलेखायामेवमनुबध्नातिदुर्लभोदेवीप्रसादः प्रवेश्यतामित्यभिधायपुनः स्कंधावारमेवाजगाम।प्रविशन्नेवपितुः समीपादागतम
भिज्ञाततरमालेखहारकमद्राक्षीत्।धृततुरंगमश्चप्रीतिविस्फारितेनचचक्षुषादूरादेवापृच्छत्-अंगकच्चित्कुशलीतातःसहसर्वेणपरिजनेनाम्बाचसर्वांतःपुरैरिति-अथासावुपसृत्यप्रणा
मानंतरं देवयथाज्ञापयसीत्यभिधायलेखद्वितयमर्पयांबभूव। युवराजस्तुशिरसिकृत्वा स्वयमेवतदुन्मुच्यक्रमशः पपाठ। स्वस्त्युज्जयिनीतःसकलराजन्यशिखंडशेखरीकृतचरणारविं
दः परममाहेश्वरो राजाधिराजोदेवस्तारापीडः सर्वसम्पदामायतनंचंद्रापीडमुदंच्यानुचूडामणिमरीचिचक्रचुम्बितमुत्तमांगेचुम्बन्नाह्लादयति।कुशलिन्यः प्रजाः किंतुकियानपिकालो भवतोदृ
ष्टस्यबलवदुत्कण्ठितंनोहृदयं-देवीचसहान्तःपुरैर्ग्लानिमुपनीता-अतोलेखवाचनविरतिरेवप्रयाणकारणतांनेतव्येति।शुकनासप्रेषिते द्वितीयेऽप्यमुमेवार्थंलिखितमवाचयत्।अस्मि
न्नेवावसरे समुपसृत्यवैशम्पायनोऽपि लेखद्वितयमपरमात्मीयमस्मादभिन्नार्थमेवादर्शयत्।अथयथाज्ञापयतितातइत्युक्त्वातथैवतुरगाधिरूढःप्रयाणपटहमदापयत्।समीपे स्थि
तंचमहतास्वीयेनपरिजनेनमहाबलाधिकृतंबलाहकपुत्रंमेघनादनामानमादिदेश।भवतापत्रलेखयासहागंतव्यंनियतंकेयूरकःपश्चादायाता।तावतीभूमिमागमिष्यतितन्मुखेनविज्ञायात्रागम्य
देवीकादम्बरी।नान्वियसात्रिभुवनवन्दनीयानिरनुरोधानिःपरिचयाचतुर्गृहाप्रकृतिर्मर्त्यानांयेषामकांडविसंवादिन्यः प्रीतयोनगणयंतिनिष्कारणवत्सलतामेवगच्छतामयात्मनोनीतः
स्नेहः कपटकूरजालिकांप्राप्तिलाभाक्तिरलीकाकाकुकरणकुशलतायातितमुपचारमात्रमधुरं धूर्ततायामर्पणंप्रकटितबाह्यनस्ययोर्भिन्नार्थत्वमप्रकांताबदाज्ञानावाअस्यानाहितप्रसादादित्थयो
भ्यादित्यपिवक्तव्यांनीता।जनयंतिहिपश्चाद्देवलक्षमभूमिपातितोव्यर्थाः प्रसादामृतहृदयोमहतां।नखलुतथादेवीप्रतिप्रवलल्लज्जातिभारसंथरमेतद्दयं यथामहाश्वेतांप्रतिनियतमेनामसलीकाधारोपण
वर्णितास्मद्वयासंभाषणस्थानपक्षपातिनीमसकृदुपालप्स्यतेदेवीनकिंकरोमिगरीयसीगुरोराज्ञाभवतिदेहमात्रकस्य-हृदयेनहेमकूटनिवासव्यसनिनालिखितंजन्मांतरसहस्रस्यदास्यपत्रं देव्याम

त्रिवप्रकाशयता हृदि शमपि सर्वविषयज्वलितदीपिकादाहव्रणविभावितं बहुसुखमिव प्रकटयता परिभवमपि निष्कारणात् कुष्ठजनपदजनपदाकृष्टिशतं सप्रवाहमिव दधानेन फलकवनलताविनिर्मितह
का॰द॰ कुसुमकरंडकेन वेणुलतारचितपुष्पपातनांकुशिकेन स्यामथमुक्तकालकंबलखंडखोलेन जरद्द्रविडधार्मिकेणाधिष्ठितां चंडिकामपश्यत्। तस्यामेव च वासमरचयत्। अथावतीर्य तुरगात्प्रवि
८९ श्य भक्तिप्रवणेन चेतसा प्रणनाम। कृतप्रदक्षिणश्च पुनः प्रणम्य प्रशान्तारदर्शनेन कुतूहलेन परिभ्रमन्नुद्देश एकं नमाक्रोशं तं द्रविडधार्मिकमेकदेशे दृष्ट्वा कादम्बरीविरहोत्कंठोद्वेगाद्रूयमानोऽपि
चक्राचिरं जहास। स्वगरयच्चतेन सार्धं संरंधकलहानुपहसतः स्वसैनिकानुपशांतवनेश्च कथमपि प्रियालापशतानुनयनैः प्रणयमुपनीय क्रमेणाजन्मभूमिं जातिं विद्यां च कलत्रमपत्यानि वि
भवं वयः प्रमाणं प्रव्रज्यायाश्च कारणं स्वयमेव पप्रच्छ। पृच्छ्यमानश्चासाववर्णयदात्मानं। अतीतस्वशौर्यरूपविभववर्णनवाचालेन तेन सुतरामरज्यत राजपुत्रो विरहातुरस्यापि विनोदनतामि
वागात्। उपजातपरिचयश्चास्मै ताम्बूलमदापयत्। अस्तमुपगते च भगवति समस्तभावावासिनि सुपयसाम्यनयारूपते लेसु राजसूनुसुखास्वादसक्तपर्यालोकक्षितितललुठनयां सुलस्टा
बधूजनानुमितोत्साहेषु गृहीतकतिपयशष्पकवलेषु पीतोदकेषु स्नानार्द्रपृष्ठतया विगतश्रमेषु तुरंगेषु। निखातकुंतपंक्तिसंयतेषु वाजिषु वाजिसमीपविरचितपर्णप्रस्तरे च द्विरसगमन
श्रिवत्रपरिकल्पितयामिके सुसुप्तसैनिकजने कृतबहुयामकप्रभापीततमसि दिवसावसाने दिवसरूपविराजमाने सेनानिवासे चंद्रापीडः परिजनेनैकदेशे संयतशेफद्रापुषस्यपुरः परिकल्पि
तं प्रतीहारनिवेदितं शयनीयमगात्। निषण्णस्य चास्य तत्क्षणमेव पस्पर्श दुःखासिका हृदयमरतिर्दुरगाद्या विसर्जयांचकार राजलोकं अतिबद्धभाने पिगोल्लापपार्श्वस्थान् निमीलित
लोचनो मुहुर्मुहुर्मनसा जगाम किंपुरुषमनम्यसेनाः स सस्मार हेमकूटस्य निष्कारणगंधर्वनामचिंतयत् महाश्वेतायाः दानं जीवितफलमभिललाष पुनः पुनः कादम्बरीदर्शनमयगताभिमानयेऽप्रालाय
नितरामस्पृहयत् मदलेखापरिचयाय तमालिकादृष्टुमाचकांक्ष केयूरकागमनमुत्प्रेक्षितं हिमगृहकमपश्यद्दुःखमरमायतं पुनरुक्तनिश्वासबबंध चाधिकां प्रीतिं शेषहारे यस्मात्स्थितां पुण्य

भागिनीममन्यत पत्रलेखां। एवं चानुपजातनिद्र एव तामनयन्निशां। उषसि चोत्थाय तस्य जरद्द्रविडधार्मिकस्येच्छानिष्टं धैर्यं नविसर्जैः एरयित्वा मनोरथमभिमतैश्चापि रमणीयेषु प्रदेशेषु निव
सन्न स्यैरेवाहोभिरुज्जयिनीमाजगाम। आकस्मिकागमनप्रहृष्टसंभ्रान्तानां पौराणामर्थकमलानीव नमस्कारांजलिसहस्राणि प्रतीछन्न कैश्चिदविज्ञातोऽविवेश नगरीं। अहमहमिक
याच प्रधावितात् अतिरभसहर्षविक्लवात् परिजनादुपश्रित्य चंद्रापीडो वर्तते इत्युपलभ्य पितास्य निर्भरानंदमन्दगमनो मंदरद्रव क्षीरोदजलमुज्झन्तीयांशुकममलमाकलितमाकर्षन्नेत्रजलविं
